॥ नमोऽस्तु तस्मै जिनशासनाय ॥

महोपाध्याययशोविजयविरचितवृत्तिसमन्विता

सूरिश्रेष्ठहरिभद्राचार्यविरचिता

श्रीमती

# योगविंशिका

## चन्द्रशेखरीयावृत्तिसहिता

### योगमाहात्म्यवर्णनम्

योगः सर्वविपद्वल्लीविताने परशुः शितः । अमूलमन्त्रतन्त्रं च, कार्मणं निर्वृतिश्रिय : ॥

भूयांसोऽपि हि पाप्मानः, प्रलयं यान्ति योगतः । चण्डवाताद् घनघना, घनाघनघटा इव ॥

क्षिणोति योगः पापानि, चिरकालार्जितान्यपि । प्रचितानि यथैधांसि, क्षणादेवाशुशुक्षणिः ॥

कफविपुण्मलामर्श - सर्वौषधिमहर्द्धयः । सम्भिन्नस्रोतोलब्धिश्च, यौगं ताण्डवडम्बरम् ॥

चारणाशीविषावधि - मनःपर्यायसम्पदः । योगकल्पद्रुमस्यैता, विकासिकुसुमश्रियः ॥

अहो योगस्य माहात्म्यं, प्राज्यं साम्राज्यमुद्वहन् । अवाप केवलज्ञानं, भरतो भरताधिपः ॥

पूर्वमप्राप्तधर्माऽपि, परमानन्दनन्दिता । योगप्रभावतः प्राप, मरुदेवा परं पदम् ॥

ब्रह्मस्त्रीभ्रूणगोघात-पातकान्नरकातिथेः । दृढप्रहारिप्रभृते-र्योगो हस्तावलम्बनम् ॥

तत्कालकृतदुष्कर्म-कर्मठस्य दुरात्मनः । गोप्त्रे चिलातिपुत्रस्य, योगाय स्पृहयेन्न कः ? ॥

तस्याजननिरेवास्तु नृपशोर्मोघजन्मनः । अविद्धकर्णो यो योग, इत्यक्षरशलाकया ॥

इति श्रीयोगशास्त्रस्य प्रथमप्रकाशे

कलिकालसर्वज्ञाः श्रीहेमचन्द्रसूरयः

# श्रीमती योगविंशिका

प्रेरणादाता

पं. चन्द्रशेखरविजयजी

प्रकाशक

कमल प्रकाशन ट्रस्ट

**પ્રકાશક :**
**કમલ પ્રકાશન ટ્રસ્ટ**
જીવતલાલ પ્રતાપશી સંસ્કૃતિ ભવન
૨૭૭૭, નિશા પોળ, ઝવેરીવાડ,
રીલિફ રોડ, અમદાવાદ-૧
ફોન : ૨૫૩૫૫૮૨૩, ૨૫૩૫૬૦૩૩

**પ્રેરક-પરિચય :**
સિદ્ધાન્તમહોદધિ, સચ્ચારિત્રચૂડામણિ,
સ્વ. પૂજ્યપાદ આ. ભગવંત શ્રીમદ્વિજય
પ્રેમસૂરીશ્વરજી મહારાજા સાહેબના વિનેય
**પૂ. પં. શ્રી ચન્દ્રશેખરવિજયજી**

**આવૃત્તિ :**
પ્રથમ સંસ્કરણ નકલ : ૫૦૦
તા. ૧૫-૦૨-૨૦૧૨, વિ. સં. ૨૦૬૮

મૂલ્ય [illegible]

**ટાઈપસેટિંગ :**
**અરિહંત ગ્રાફિક્સ**
ખાડિયા ચાર રસ્તા, અમદાવાદ.

**મુદ્રક :**
**ભગવતી ઑફસેટ**
૧૫/સી, બંસીધર એસ્ટેટ,
બારડોલપુરા, અમદાવાદ-૪.

## પ્રસ્તાવના

સૂરિપુરંદરશ્રી હરિભદ્રસૂરીશ્વરજી મહારાજા વિરચિત સુંદર ગ્રન્થ વિંશતિવિંશિકા !

એ ૨૦ વિંશિકામાંની એક એટલે યોગવિંશિકા !

એના ઉપર મહામહોપાધ્યાય યશોવિજયજી મહારાજાની યોગના રહસ્યોનું ઉદ્ઘાટન કરનારી રમણીય, મનોહર વૃત્તિ !

બે ય મહાપુરુષો જિનશાસનમાં - સંઘમાં એટલા બધા પ્રચલિત છે કે એમની ઓળખાણ આપવી એટલે 'માતા આગળ મોસાળના ગીત ગાવા' જેવું ગણાય. માટે જ તે પૂજ્યો અંગે કંઈપણ કહેવાનું છોડી દઈને આ ગ્રન્થ વિશે જ મહત્ત્વની બાબતો ટુંકમાં જણાવીશ.

→ આ ગ્રન્થ ઉપર ઓછામાં ઓછા પાંચેક વિવેચનો તો છપાઈ ચુકેલા છે, એટલે આ એક વધારાનું શા માટે ? એ પ્રશ્નનો ઉત્તર એટલો જ આપવાનો કે પ્રાયઃ તમામ પુસ્તકોમાં વિવેચન ગુજરાતી ભાષામાં છે. ગુજરાતી ભાષા પરિવર્તનશીલ છે, એ સૌ જાણે છે. માટે જ એ વિવેચનનો ભવિષ્યમાં ઉપયોગ દુષ્કર બને. જ્યારે પ્રસ્તુત ગ્રન્થમાં યોગવિંશિકાસૂત્ર + વૃત્તિ બંને ઉપર સંસ્કૃતવૃત્તિ છે, વર્ષો પછી પણ એનો ઉપયોગ થઈ શકે.

→ બધા ગુજરાતી વિવેચનોમાં પૂ.પાદ આ.દેવશ્રી અભયશેખરસૂરિજીનું વિવેચન વધુ સુંદર લાગ્યું છે, એટલે સંસ્કૃતવૃત્તિમાં એનો પણ આધાર લીધો છે.

→ યોગના પદાર્થો અતિ-અતિ-અતિ ગહન છે. જેટલીવાર યોગગ્રન્થો વાંચો, એટલીવાર કંઈ ને કંઈ નવું જ નીકળે, પ્રુફ જોવાના બહાને ઓછામાં ઓછી ત્રણેકવાર તો મેં મારી જ લખેલી ટીકા વાંચી, દર વખતે ઉમેરો-સુધારો કરવાનો થયો. એટલે મને લાગે છે કે બે મહાપુરુષોનો આ ગ્રન્થ રચતી વખતે જે અભિપ્રાય હશે, હું એ જ અભિપ્રાયને અનુસર્યો છું કે નહિ ? એ નિશ્ચિત કહી ન શકું. હા ! પ્રયત્ન પૂરો કર્યો છે, પણ છેવટે છદ્મસ્થ છું. જો મહાયોગી આનંદઘનજી એમ કહેતા હોય કે હેતુવિચારે રે ચિત્ત ધરી જોઈએ, અતિદુર્ગમ નયવાદ. આગમવાદે ગુરુગમ કો નહિ, એ સબળો વિષવાદ. પ્રભુના વચનોમાં નયોની વિચારણા સમજવી ખૂબ કઠિન છે. આગમના પદાર્થોમાં ગુરુગમ પણ નથી. અર્થાત્ આગમિક પદાર્થોમાં ગુરુપરંપરાના આધારે સર્વત્ર પદાર્થનો નિશ્ચય થઈ જ જાય... એવું નથી... તો હું શી રીતે એમ કહું ? કે મેં યોગના પદાર્થો બરાબર સ્પષ્ટ રીતે સમજી જ લીધા છે.

→ એટલે જ અલગ અલગ ત્રણ વિદ્વાન યુવાન મહાત્માઓ પાસે આખી વૃત્તિ સંશોધન કરાવી છે, તે મહાત્માઓની સ્પષ્ટ ના હોવાથી નામ લખી શકતો નથી. છતાં એ બધાએ સુચવેલા સુધારાઓ-વધારાઓ બાદ આ પુસ્તક પ્રકાશિત કરી રહ્યો છું.

→ નવાંગીવૃત્તિકાર શ્રી અભયદેવસૂરિજીએ સ્થાનાંગસૂત્રની વૃત્તિમાં છેલ્લે પ્રશસ્તિમાં સ્પષ્ટ શબ્દોમાં કહ્યું છે કે क्षुण्णानि सम्भवन्तीह.... નવેક કારણોસર મારી વૃત્તિમાં ભૂલો હોઈ શકે છે. ગીતાર્થો એ ભૂલોને સુધારી લે.

એવી જ વાત મારે કરવી છે, આમાં ભૂલો થઈ હોય, એ શક્ય છે. ગીતાર્થ સંવિગ્ન મહાત્માઓ એ ભૂલો સુધારીને મને અવશ્ય બતાવે.

→ માત્ર એક વિનંતિ – કોઈપણ પદાર્થ અંગે તમને ભૂલ લાગે, એટલે તરત જ એવું માની ન લેશો કે 'ભૂલ છે જ'. એ પણ શક્ય છે ને ? કે તમને ભૂલ લાગી, એ જ તમારી ભૂલ હોય. એટલે એ પદાર્થ પર ઉંડુ ચિંતન કર્યા બાદ બે-ત્રણ વિદ્વાનોની સલાહ લીધા બાદ એને ભૂલ તરીકે ગણવાનું, મને જણાવવાનું - પુછાવવાનું રાખશો. જેમ મેં ત્રણ વિદ્વાનોની સંમતિ બાદ જે સાચું લાગ્યું, તે લખ્યું. તેમ તમે પણ ત્રણ વિદ્વાનોની સંમતિ બાદ આમાં જે ખોટું લાગે, તે જણાવવાનું - પુછાવવાનું રાખશો.

→ છેલ્લે બે પરિશિષ્ટો લીધા છે. એમાં ય બીજા પરિશિષ્ટમાં પાંચ અનુષ્ઠાનોનું વર્ણન લીધું છે, જૈનદર્શનમાં એ અનુષ્ઠાનો કેવા સ્વરૂપે ઘટી શકે ? એ સમજાવવાનો પ્રયાસ કર્યો છે. પરિશિષ્ટ મોટું ન થઈ જાય, એ માટે તે તે ગ્રન્થોના પાઠોનો માત્ર સ્થાન-નિર્દેશ કરેલો છે, અત્રે એ આખા પાઠ લીધા નથી.

પૂજ્યપાદ ભવોદધિતારક શાસનપ્રભાવક ગુરુદેવશ્રી પંન્યાસપ્રવર શ્રીચન્દ્રશેખરવિજયજી મ.સાહેબે મને દીક્ષાના શરુઆતના દસ વર્ષ વ્યાખ્યાનાદિ કશું જ ન કરાવ્યું, માત્ર ને માત્ર ભણવામાં લગાડી દીધો, વિહારો પણ સાવ ઓછા કરાવ્યા, સાધુઓને અધ્યાપન કરાવવાની મને વારંવાર તક આપી, એ બધાના પ્રભાવે અને એમની અમીદૃષ્ટિના પ્રભાવે આ નાનકડું કામ શક્ય બન્યું છે. શી રીતે એમનો પરમોપકાર યાદ કર્યા વિના રહી શકું ?

જિનાજ્ઞાવિપરીત કંઈપણ લખાયું હોય, તો ત્રિવિધે ત્રિવિધે મિચ્છા મિ દુક્કડં.

**- ગુણહંસ વિજય**

**અમદાવાદ - તપોવન**

**શ્રાવણ સુદ-૧ સંવત ૨૦૬૭**

**સાંજે ૪-૪૫ કલાકે, રવિવાર**

## સમર્પણમ્

→ જે જીવો પ્રત્યે દયાળુ હતા, પણ પોતાના દોષો પ્રત્યે તો ક્રૂર જ હતા...
→ જે સ્ત્રીઓ પ્રત્યે તદ્દન નિર્વિકારી હતા, પણ પવિત્રતા નામની સ્ત્રીના તો પૂરેપૂરા રાગી જ હતા...
→ જે ત્રીજા મહાવ્રતના ધારક અને પાલક હતા, પણ છતાં જેઓએ હજારોના હૈયાને તો ચોરી જ લીધેલા...
→ જે હૈયાથી બાળક જેવા સાવ સરળ હતા, છતાં આંતરશત્રુઓની સાથે લડાઈમાં કપટ ખેલવામાં ભારે ચાલબાજ હતા...
→ જે પ્રશંસાને મહાપાપ માનતા, પણ પોતાની ! પરગુણપ્રશંસા તો જેમના જીવનનું અમૂલ્ય આભૂષણ હતું...
→ જે નિંદાને મહાપાપ માનતા, પણ પારકાની ! સ્વદોષનિંદા તો જેમના ચારિત્રજીવનનો પ્રાણ હતો...
→ જેમણે હદ બહારનો પરિગ્રહ ભેગો કરેલો, પણ માત્ર ને માત્ર આત્મગુણોના ખજાનાનો જ !
→ જે જીવનભર ખૂબ ખૂબ રડ્યા, પણ દુઃખો બદલ નહિ ! શાસનરાગ, જીવકરુણા, સ્વદોષપશ્ચાત્તાપ બદલ જ !
→ જે ડરપોક હતા, પણ દુઃખથી કે વિરોધીઓથી નહિ ! દુર્ગતિથી, પાપથી, જીવનમાં દોષો પ્રવેશી ન જાય એનાથી !
→ આશરે ૧૮૦૦૦ જેટલી ભવાલોચના વાંચવા છતાં ય જેમનામાં પરદોષદષ્ટિએ પ્રવેશ કર્યો ન હતો એ જ આશ્ચર્ય !
→ જે આચાર્યપદ માટે અત્યંત નિઃસ્પૃહ હતા, પણ તીર્થંકરપદ મેળવવા માટેની જેમની સ્પૃહા આશ્ચર્યજનક હતી !
→ હરડેનું નામ લેવા માત્રથી પેટનો કચરો ન નીકળે, પણ જેમનું નામ લેવા માત્રથી આત્માનો કચરો તો નીકળતો જ !
→ જે જીવનભર ખૂબ ખૂબ બોલ્યા, પણ માત્ર જીભથી નહિ, હૈયાથી પણ !
→ જેમણે ૩૦૦ આસપાસ પુસ્તકો લખ્યા, પણ માત્ર બોલપેન કે હાથથી નહિ, અંતરની આગથી પણ !
→ જેમણે ૮૦ જેટલા શિષ્યો બનાવ્યા, પણ સ્વસેવાદિ માટે નહિ, શાસનસુભટ બનાવવા માટે !
→ જેમની બાહ્ય ઓળખ આપવાની જૈનસંઘને જરૂર જ નથી, પણ જેમની આંતરિક ઓળખ મેળવવા માટે તો હું સાવ સાવ સાવ ગમાર છું, એવા ભવોદધિતારક

## પૂજ્યપાદ શાસનપ્રભાવક પંન્યાસપ્રવર ગુરુદેવશ્રી
## ચન્દ્રશેખરવિજયજી મ.સાહેબના

કરકમલમાં
આ ગ્રન્થનું સમર્પણ કરતા કૃતજ્ઞતાનો અનુભવ કરું છું.

લિ.
આપનો શિષ્ય
મુનિ ગુણહંસવિજય

# विषयानुक्रमः


| गाथाक्रमः | विषय : | पत्रक्रमांकः |
|---|---|---|
| १ | योगव्याख्या | २ |
| | भावरहिता क्रिया तुच्छा इति पदार्थः | ५ |
| | प्रणिधाननिरुपणम् | ७ |
| | प्रवृत्तिनिरुपणम् | १० |
| | विघ्नजयनिरुपणम् | १३ |
| | विघ्नजयानां समूहः प्रवृत्तिहेतुरिति पदार्थः | १७ |
| | सिद्धिनिरुपणम् | १८ |
| | विनियोगनिरुपणम् | २० |
| | धर्मव्याख्या | २२ |
| | व्यवहारतो योगनिरुपणम् | २४ |
| २ | स्थानादिपञ्चकनिरुपणम् | २५ |
| | स्थानादिषु कर्मज्ञानयोगविभागप्रदर्शनम् | २८ |
| ३ | स्थानादियोगानां स्वामिनिरुपणम् | २८-२९ |
| | अध्यात्मभावनाव्याख्या | ३१ |
| | आध्यानव्याख्या | ३२ |
| | समताव्याख्या | ३२ |
| | वृत्तिसंक्षयव्याख्या | ३२ |
| | अध्यात्मादिपञ्चकस्य स्थानादिपञ्चकान्तर्भाववर्णनम् | ३३ |
| | निश्चयं व्यवहारं चाश्रित्य योगस्वामिवर्णनम् | ३४ |
| | अतात्विकयोगस्वामिप्रदर्शनम् | ३५ |
| ४ | स्थानादिषु इच्छाप्रवृत्तिस्थिरसिद्धिभेदप्रदर्शनम् | ३६ |
| ५-६ | इच्छाव्याख्या | ३७ |
| | प्रवृत्तिव्याख्या | ३८ |
| | स्थिरव्याख्या | ३९ |
| | प्रवृत्तिस्थिरयोर्मध्ये भेदप्रदर्शनम् | ३९ |
| | सिद्धिव्याख्या | ४१ |
| | सिद्धिफलवर्णनम् | ४१ |
| | इच्छादीनां हेतुभेदवर्णनम् | ४२ |
| | इच्छादीनां अनुकम्पादिकार्यभेदवर्णनम् | ४३ |
| | अनुकम्पादीनां इच्छादिजन्यत्वम् | ४४ |
| | इच्छादीनां सम्यक्त्वस्य च अनुकम्पादिकारणत्वं केन प्रकारेणेति पदार्थः | ४५ |

| | | |
|---|---|---|
| ९-१०-११ | चैत्यवन्दने स्थानादीनां योजना | ४७-४८ |
| | भावचैत्यवन्दनम् | ४९ |
| | सापायनिरपाययोगयोः स्वरुपम् | ५० |
| | अर्थालम्बनयोगयोरभावे तद्धेत्वनुष्ठानरुपं चैत्यवन्दनम् | ५२ |
| १२ | चैत्यवन्दनस्य निष्फलत्वं विपरीतत्वं वा कथमित्येतद्वर्णनम् | ५३ |
| | चैत्यवन्दनस्य महामृषावादत्वं कथं ? इत्येतद्वर्णनम् | ५४ |
| | विषादिपञ्चकनिरुपणम् | ५६ |
| | विषानुष्ठानवर्णनम् | ५७ |
| | गरानुष्ठानवर्णनम् | ५८ |
| | अननुष्ठानवर्णनम् | ६० |
| | तद्धेत्वनुष्ठानवर्णनम् | ६० |
| | अमृतानुष्ठानवर्णनम् | ६१ |
| | विषादिषु योगयोगाभासत्वविवेकः | ६१ |
| १३ | चैत्यवन्दनानुष्ठानस्य योग्याः के ? इति प्रतिपादनम् | ६२ |
| | अपुनर्बन्धकानामपि चैत्यवन्दनयोग्यत्वप्रतिपादनम् | ६३ |
| | चैत्यवन्दनस्यायोग्याः के ? इति प्रतिपादनम् | ६४ |
| | तीर्थरक्षार्थमविध्यनुष्ठानमप्यादरणीयमिति पूर्वपक्षः | ६४ |
| १४ | अविध्यनुष्ठानेनैव तीर्थविच्छेद इति समाधानम् | ६५ |
| १५ | अविध्यनुष्ठानकारयितुर्गुरोस्तीर्थरक्षणेन गुण एवेति पूर्वपक्षः | ६७ |
| | तादृशगुरोर्महादुषणमिति प्रतिपादनम् | ६८ |
| | गुरोरविधिनिषेधेन विधिमार्गप्ररुपणमावश्यकं कर्तव्यमित्युपदेशः | ६९ |
| | अपात्रश्रोतृवर्णनम् | ७० |
| | अपात्रश्रोतुरर्थादिदाने गुरोस्तदधिकदोषत्वप्रतिपादनम् | ७० |
| | जीतव्यवहारेणाविध्यनुष्ठानस्यादरणीयत्वमिति पूर्वपक्षः | ७१ |
| १६ | लोकसंज्ञात्यागेन शास्त्ररहस्यपरिज्ञानेन च चैत्यवन्दनादौ प्रवृत्तिः कर्तव्येत्याद्युपदेशः | ७१-७२ |
| | जीतव्यवहारतात्विकस्वरुपम् | ७४ |
| | अतात्विकजीतव्यवहारस्वरुपम् | ७४ |
| | संविग्नजीतालम्बनोपदेशः | ७४ |
| | अशुद्धक्रियायाः शुद्धक्रियाहेतुत्वं कथमिति प्रतिपादनम् | ७५ |
| | विधिबहुमानरहिताविधिकर्तुरपेक्षया विधिबहुमानसहितस्य तदकर्तुर्भव्यत्वप्रतिपादनम् | ७६ |
| | विकलानुष्ठायिगीतार्थैः विधिप्ररुपणे प्रयत्नो विधेय इत्युपदेशः | ७८ |
| १७ | विध्यभिमानिनां बीजोच्छेदद्वारा महादोषभाक्त्वप्रतिपादनम् | ७९ |

| | | |
|---|---|---|
| १८ | प्रीतिभक्तिवचोऽसङ्गानुष्ठाननिरुपणम् | ८० |
| | प्रीत्यनुष्ठानवर्णनम् | ८१ |
| | भक्त्यनुष्ठानवर्णनम् | ८१ |
| | वचनानुष्ठानवर्णनम् | ८२ |
| | असंगानुष्ठानवर्णनम् | ८२ |
| | असंगस्यानालबनयोगत्वप्रतिपादनम् | ८३ |
| १९ | आलम्बनद्वयवर्णनम् | ८४ |
| | अरूप्यालम्बनस्यानालम्बनत्वम् | ८६ |
| | अनालम्बनयोगव्याख्या | ८६ |
| | केवलज्ञानप्रकाशे सति अनालम्बनयोगाभावः | ८८ |
| | केवलज्ञानोत्तरं सालम्बनयोगो भवतु इत्याशङ्का, तत्समाधानं च | ९० |
| | ध्यानस्य स्वरुपद्विकम् | ९२ |
| | जिनकल्पिकादीनां अनालम्बनयोगाभावापादनं, तत्समाधानं च | ९२ |
| | संसारिणामपि निरालम्बनध्यानं संभवति | ९३ |
| २० | निरालम्बनध्यानफलपरम्परावर्णनम् | ९४ |
| | असम्प्रज्ञातसमाधिवर्णनम् | ९४ |
| | प्रथमं परिशिष्टं - योगविंशिकावृत्तौ प्रतिपादितानि तत्तत्पदार्थानां लक्षणानि | ९७ |
| | द्वितीयं परिशिष्टं - पञ्च विषाद्यनुष्ठानानि | ९८ |

**नमोऽस्तु तस्मै जिनशासनाय**

महोपाध्याय यशोविजयकृतवृत्तिसमन्विता

सूरिपुरन्दरश्रीहरिभद्रसूरिकृतविंशतिविंशिकाप्रकरणान्तर्गता

# श्रीमती योगविंशिका

## तदुपरि च चन्द्रशेखरीया वृत्तिः

चन्द्र.: यदीयसम्यक्त्वबलात्प्रतीमो, भवादृशानां परमस्वभावम् ।
कुवासनापाशविनाशनाय नमोऽस्तु तस्मै जिनशासनाय ॥

सुविहितगच्छक्रियाधूर्यैः श्रीहरिभद्रसूरिभिः विंशतिविंशिकानामकं प्रकरणं विरचितम् । तत्र च प्रकरणे विंशतिर्विभागाः, एकैकस्मिंश्च विभागे विभिन्नविषयानाश्रित्य निरुपणम् । तत्र च योगविंशिकानामके विभागे योगनिरुपणं कृतम् । महोपाध्याययशोविजयैर्यद्यपि सकलस्यापि विंशतिविंशिकाप्रकरणस्य विवरणं कृतमित्यनुमीयते, तथाऽपि अधुना तु केवलं योगविंशिकानामकस्यैव प्रस्तुतप्रकरणैकविभागरुपस्य विवरणं प्राप्यत इति तेनैव संतोषः कार्यः ।

हरिभद्रसूरिवचनानि यथाऽतीवगभीराणि, तथैव यशोविजयवाचकानामपीति अतीव्रमतिमतां न सुखगम्यानि, ततश्च ते जीवा योग्या अपि प्रस्तुतप्रकरणरहस्यानि न प्राप्नुयुः । ततश्च तदुपकारार्थं प्रस्तुतग्रन्थोपरि श्रीयशोविजयवाचककृतविवेचनोपरि काचित्सरला वृत्तिरवश्यं कर्त्तव्येति अस्माकं मनसि सञ्जातम् । तादृशविचारप्रेरितेन गुणहंसविजयेन मयेयं चन्द्रशेखरीया वृत्तिरारभ्यते ।

यद्यपि योगविंशिकाग्रन्थोपरि अभयशेखरसूरिकृतं विवेचनमतीवाद्भूतमपूर्वरहस्योद्घाटकं योगमार्गवैशद्यकरं च अस्त्येव, तदपेक्षया चेयं वृत्तिरत्यन्तं जघन्यतमा, तथाऽपि तद् गुर्जरभाषानिबद्धं विस्तृतं चेति संस्कृतपठनरसिकानां सङ्क्षेपरुचीनां च उपकारार्थं इयं संस्कृतभाषायां वृत्तिः प्रारभ्यते, सा च प्रायः ससंक्षेपैव कर्तुमिष्यत इति उभयोरपि तया उपकारो भविष्यति ।

प्रस्तुतवृत्तेः 'चन्द्रशेखरीया' इति यन्नाम कृतं, तत्तु अस्मदनन्तोपकारिणां सुगृहीतनामधेयानां परमशासनप्रभावकानां विशिष्टसंयमपरिणतिशालिनां पंन्यासप्रवरश्रीचन्द्रशेखरविजयानां अभिधानं अनुसृत्येति ध्येयम् ।

अस्यां च चन्द्रशेखरीयावृत्तौ स्वशास्त्रबोधं अभयशेखरसूरिकृतविवेचनं स्वानुभवं चाश्रित्य मया परमार्थं प्रतिपादयितुं प्रयतिष्यते, सम्भवन्ति चात्र स्खलनाः, तच्छोधयन्तु गीतार्थबहुश्रुतभवभीरवो विशेषतश्च

योगमार्गकृतपरिश्रमा इति प्रार्थना मम सर्वान् प्रतीतीमां प्रस्तावनां कृत्वाऽधुना प्रकरणमेतत्प्रारभ्यते ।

यशो.: ॥ ऐँ नमः ॥

**अथ योगविंशिका व्याख्यायते**

**मुक्खेण जोयणाओ, जोगो सव्वो वि धम्मवावारो ।**
**परिसुद्धो विन्नेओ, ठाणाईगओ विसेसेण ॥१॥**

चन्द्र.: ऐँ नमः = सरस्वतीमन्त्रबीजमिदम् । तच्च महोपाध्याययशोविजयकृतेषु प्रायः सर्वेषु ग्रन्थेषु प्रारम्भे दृश्यते एव, तच्च श्रुतदेव्यनुग्रहेण इष्टकार्यस्य निर्विघ्नसमाप्त्यर्थं तैः कृतमिति ।

अथ = इदं च पदं मङ्गलरुपं, यदि वा आनन्तर्यार्थे । तथाहि - प्रस्तुतायाः योगविंशिकायाः या पूर्वा विंशिका, तद्व्याख्यानं कृत्वा तदनन्तरमियं योगविंशिका व्याख्यायते इति पूर्वविंशिकायाः व्याख्यानात्सकाशात्प्रस्तुतयोगविंशिकाव्याख्याऽनन्तरीभूतेति तत्प्रतिपादनपरमिदं '**अथ**' पदम् ।

प्रथमगाथान्वयस्त्वेवम् – परिशुद्धः सर्वोऽपि धर्मव्यापारः मोक्षेण योजनाद् 'योगः' विज्ञेयः, स्थानादिगतः परिशुद्धः सर्वोऽपि धर्मव्यापारो विशेषेण योगो विज्ञेय - इति ।

यशो.: **मुक्खेण त्ति । मोक्षेण = महानन्देन योजनात् सर्वोऽपि धर्मव्यापारः साधोरालयविहारभाषाविनयभिक्षाटनादिक्रियारुपो योगो विज्ञेयः,**

चन्द्र.: अत्र केचिन्मन्यन्ते यदुत "मोक्षे गतानां यथा दोषा न सन्ति, तथैव गुणा अपि न सन्ति, ततश्च तत्र सुखमपि नास्त्येव" इति ।

न चैतद्युक्तं, यदि हि मोक्षे सुखादयो गुणा अपि न स्युः, तर्हि तत्र गता जीवा अजीवा एव स्युः, अजीवानां एव सुखादिगुणविकलत्वात् । तस्मात् मोक्षे सुखादयो गुणा अवश्यं मन्तव्याः, अत एवात्र वृत्तिकृदाह-मोक्षेण = महानन्देन इति । तथा च मोक्षे महानन्दोऽस्ति, मोक्षो वा स्वयं महानन्दरुपोऽस्ति, ततश्च प्रतिपादितं मिथ्यामतं तिरस्कर्त्तव्यम् ।

सर्वोऽपि = न केवलं विनयस्तपः स्वाध्यायो वा एकादिरुपः, किन्तु सकलोऽपि इत्यपिशब्दार्थः ।

साधोः = अत्र 'साधोः' इति पदं उपलक्षणं मन्यव्यम् । तथा च साध्वीश्रावकश्राविकाप्रभृतीनां सर्वेषां सकलोऽपि धर्मव्यापारो योग इति ।

ननु किमिदमुपलक्षणमिति चेत् । स्वज्ञापकत्वे सति स्वेतरज्ञापकत्वं उपलक्षणत्वम् । अत्र साधुपदं यथा साधुरुपस्य स्वस्य ज्ञापकं = बोधकं भवति, तथैव साधुभिन्नानां साध्वीश्रावकश्राविकाणामपि ज्ञापकं

भवतीतीदं पदमुपलक्षणमुच्यते ।

ननु 'साधोः' इति स्थाने 'साधुसाध्वीश्रावकश्राविकाणां' इति यदि उक्तं स्यात्, तर्हि सूक्तं स्यात् । यतो हि गौरवास्पदं उपलक्षणं कर्त्तव्यं न स्यात् इति चेत्, सत्यं, तथापि साधु-साध्वीनां प्रायः सदैव धर्मव्यापारवत्त्वात् श्रावकादीनां च कदाचिदेव धर्मव्यापारवत्त्वात् योगस्वामित्वे साधु-साध्वीनामेव प्राधान्यं, तत्रापि साधूनां साध्व्यपेक्षया प्रधानतरत्वं, सङ्घस्य साधुप्रधानत्वप्रतिपादनात् । तस्मादत्र साधूनां एव साक्षाद् ग्रहणं कृतमिति ।

**आलयविहारेत्यादि** आलयः = उपाश्रयादिषु निवासः, विहारः = मासकल्पादिसमाप्तौ मासकल्पादियोग्ये स्थानान्तरे गमनम्, यदि वा ऋतुबद्धकाले अष्टसु स्थानेषु मासं मासं यावत् निवासः, वर्षाकाले च एकस्मिन्नेव स्थाने चतुर्मासपर्यन्तं निवासः । एतच्चोत्सर्गमार्गमाश्रित्य, अपवादतस्त्वन्यथाऽपि विज्ञेयम् । तथा भाषा = भाषणात्मिकाक्रिया । विनयः = ज्ञानविनयादिरनेकरुपः । भिक्षाटनं = गोचरीचर्या, तदादिरुपा याः क्रियाः, तादृशक्रियारुपो योगो विज्ञेय इति ।

अत्र प्रश्नः → आलयादिरुपाः क्रिया न योगः, अभव्यादीनां तासां सत्त्वेऽपि मोक्षेण सह योजनाभावात्, ततश्च न क्रियारुपः किन्तु भावरुपो योगः प्रतिपादनीयः, भावसत्त्वेऽवश्यं मोक्षेण योजनसम्भवात्, अभव्यानां भावाभावादेव मोक्षयोजनाभावात् ← इति ।

अत्र समाधीयते → न केवलं क्रियारुपो धर्मव्यापारो योगः, किन्तु परिशुद्धः क्रियारुपो धर्मव्यापारो योगः, तथा चाभव्यादीनां परिशुद्धस्य क्रियारुपधर्मव्यापारस्याभावादेव मोक्षाभावः ← इति ।

नन्वेवं परिशुद्धिमान् क्रियात्मको धर्मव्यापारो योग इत्यापन्नम्, तत्र च परिशुद्धिर्नाम भाव एव, ततश्च भाव एव योग इति वक्तव्यं, क्रियाग्रहणं तु न कर्त्तव्यं, निरर्थकत्वात् । तथाहि-यदि परिशुद्धिः स्यात्, तर्हि क्रियाऽभावेऽपि मोक्षः स्यादेव, यदि च परिशुद्धिर्न स्यात्तर्हि क्रियाबाहुल्येऽपि मोक्षो न स्यादेवेति क्रिया निरर्थकेति चेत् ।

एतत्तु निश्चयनयमतं, तन्मतेन भावस्यैव योगत्वात्, परन्तु व्यवहारनयमतेन भाव-समन्वितायाः क्रियाया एव योगत्वम्, क्रियायाः भावजननरक्षणसंवर्धनद्वारेण भावोपकारित्वात् ।

किञ्चानेकान्तवादमयजिनशासने किञ्चिदेकतरनयमतावलम्बनं सामान्यतो दुष्टम्, ततश्च उभयनयमतावलम्बनमेव सामान्यतः श्रेय इति कृत्वा वृत्तिकृता भावस्य क्रियायाश्चेत्युभयस्यात्रग्रहणं कृतम् । न तु केवलस्य भावस्य, केवलाया वा क्रियाया योगत्वं प्रतिपादितम्, इत्थं च भवत्यत्रोभयनयसमन्वय इति ।

किञ्चात्र प्रथमगाथायां 'विन्नेओ' इति पदेन योगस्य विज्ञानं कर्त्तव्यतया प्रतिपादितम्, यदि च योगः केवलं भावरुप एव प्रतिपाद्येत, तर्हि छद्मस्थानां भावस्य विज्ञानं दुःशकमिति कृत्वा योगविज्ञानं दुष्करमेव स्यात्, ततश्च 'योगविज्ञानं कर्त्तव्यं' इत्युपदेशोऽपि निरर्थकः स्यात् । यदि च योगो भावयुक्तक्रियारुपः प्रतिपाद्येत,

तर्हि नायं दोषः, यतो हि क्रिया तु प्रत्यक्षैव, तद्द्वारेण भावविज्ञानमपि अनुमानादिरुपं सुकरमिति भावयुक्तक्रिया सुखावबोधेति कृत्वा योगविज्ञानं सुकरमेवेति योगविज्ञानकरणोपदेशः सफलो भवेदिति कृतं प्रसङ्गेन ।

---

**<u>यशो.:</u> योजनाद्योग इति व्युत्पत्त्यर्थानुगृहीतमोक्षकारणीभूतात्मव्यापारत्वरूप-योगलक्षणस्य सर्वत्र घटमानत्वात् ।**

---

चन्द्र.: ननु भवतु नाम धर्मव्यापारो योगः, किन्तु सर्वोऽपि धर्मव्यापारः कथं योगो भवितुमर्हति । विहारादिरुपस्य धर्मव्यापारस्य योगत्वाश्रद्धानादिति चेत्, न, <u>योजनाद्योग</u> इत्यादि ।

अयं भावः, योजनाद् योगः इति हि योगपदस्य व्युत्पत्त्यर्थः, अनेनार्थेन योगलक्षणमिदं प्राप्यते यदुत मोक्षकारणीभूतात्मव्यापारत्वं योगत्वं इति । अस्य च लक्षणस्य न केवलं स्वाध्यायादौ, किन्तु विहारादिषु सर्वेषु धर्मव्यापारेषु घटमानत्वात् सर्वोऽपि धर्मव्यापारो योगो भवेदेवेति न काचित् क्षतिरिति ।

अत्र विनेयजनानुग्रहार्थं प्रथमं समासादिकं स्पष्टं दर्शयित्वा पश्चात्तस्य स्फुटार्थोऽपि प्रतिपादयिष्यते । → व्युत्पत्यर्थेण अनुगृहीतं यत् मोक्षकारणीभूतात्मव्यापारत्वरुपं योगलक्षणं, तस्य सर्वत्र घटमानत्वात् ← इति हि समासान्वयः कर्त्तव्यः । तत्रापि लक्षणस्य स्पष्टीकरणमिदं → मोक्षस्य कारणीभूतो य आत्मनो व्यापारः, तत्त्वं ← इति ।

ननु योजनाद् योग इति व्युत्पत्त्यर्थ एव कथं योगलक्षणं न कृतं इति चेत्, अभव्यादीनां शुभा क्रिया स्वर्गादिना सह अभव्यादीन् योजयतीति साऽपि 'योगः' इति मन्तव्यं स्यात्, सा चात्र न योगलक्षणस्य लक्ष्यं, मोक्षसाधकस्यैव व्यापारस्य योगलक्षणलक्ष्यत्वात् । तस्मात् न केवलं योगपदस्य व्युत्पत्त्यर्थो योगलक्षणं, किन्तु तेनानुगृहीतं = उपकृतं = प्राप्तं योगलक्षणमत्र ग्राह्यम् । तच्च मोक्षकारणीभूतात्मव्यापारत्वमिति ।

अधुना पदकृत्यं क्रियते ।

तत्र यदि "आत्मव्यापारत्वं योगत्वं" इत्येवोच्येत, तर्हि अभव्यादीनामात्मव्यापारेऽपि प्रस्तुतलक्षणगमनादतिव्याप्तिः । तस्मात् 'मोक्षकारणीभूत' इति विशेषणमत्र वक्तव्यम् । अभव्यादीनां आत्मव्यापारो न मोक्षकारणीभूत इति न स योग इति ।

यदि च केवलं 'मोक्षकारणीभूतत्वं योगत्वं' इत्येवोच्येत, तर्हि वस्त्रपात्रादीन्यपि मोक्षस्य निमित्तकारणानीति तान्यपि 'योग' इति वक्तव्यानि भवेयुः, न चैतदयुक्तं, तस्मात् 'आत्मव्यापार' इति वक्तव्यं, वस्त्रादीनि तु न आत्मव्यापारभूतानि, किन्तु जडानि इति न तानि योगः ।

एवं अन्यदपि यथायोगं चिन्तनीयम् ।

---

**<u>यशो.:</u> कीदृशो धर्मव्यापारो योगः ? इत्याह – परिशुद्धः प्रणिधानाद्याशयविशुद्धिमान्,**

अनीदृशस्य द्रव्यक्रियारूपत्वेन तुच्छत्वात् ।

---

चन्द्र.: प्रणिधानाद्याशयविशुद्धिमान् = आदिशब्दात् प्रवृत्तिविघ्नजयसिद्धिविनियोगपरिग्रहः ।

ननु प्रणिधानाद्याशयविशुद्धिमानेव धर्मव्यापारो योगः, न तु अन्य इति आग्रहः किमर्थं ? यः कोऽपि धर्मव्यापारो योगः कथं न भवेदिति जिज्ञासायामाह अनीदृशस्य = यः प्रणिधानाद्याशयविशुद्धिमान् नास्ति, तादृशस्य धर्मव्यापारस्येत्यर्थः । द्रव्यक्रियारूपत्वेन = भावरहिता या क्रिया सा द्रव्यक्रिया, तत्स्वरुपत्वेन तुच्छत्वात् = मोक्षात्मकफलासाधकत्वात् ।

अयं भावः, भावयुक्ता क्रिया भावक्रिया, भावरहिता तु क्रिया द्रव्यक्रिया । भावश्च प्रणिधानादिपञ्चविधाशयात्मकः, ततश्च यस्यां क्रियायां स नास्ति, सा क्रिया भावरहिता उच्यते, ततश्च सा क्रिया द्रव्यक्रिया उच्यते । या च द्रव्यक्रिया, सा इष्टफलं मोक्षं न साधयतीति कृत्वा तुच्छा, द्रव्यक्रियाया मोक्षासाधकत्वं तु "यस्मात् क्रियाः प्रतिफलन्ति न भावशून्याः" इति अनेन श्रीसिद्धसेनदिवाकरसूरिणा कल्याणमन्दिरस्तोत्रे स्पष्टं प्रतिपादितमेव । मोक्षासाधकत्वाच्च सा न योगः, मोक्षकारणीभूतस्यैवात्मव्यापारस्य योगत्वप्रतिपादनादिति । इदमत्र बोध्यम् - यः पञ्चविध आशयः, तत्रोत्तराशयसत्त्वे पूर्वाशयस्य अवश्यं सत्त्वम्, पूर्वाशयसत्त्वे तु उत्तराशयस्य विकल्पः, एकद्वित्र्याद्याशयसत्त्वेऽपि योगत्वं मन्तव्यमिति । अत्रार्थे साक्षिपाठमाह उक्तञ्च इत्यादि ।

---

**यशो.: उक्तं च - आशयभेदा एते, सर्वेऽपि हि तत्त्वतोऽवगन्तव्याः । भावोऽयमनेन विना, चेष्टा द्रव्यक्रिया तुच्छा ॥ (षोडशक ३-१२) एते = प्रणिधानादयः सर्वेऽपि कथञ्चित्क्रियारूपत्वेऽपि तदुपलक्ष्या आशयभेदाः, 'अयं' पञ्चप्रकारोऽप्याशयो भावः, अनेन विना 'चेष्टा' कायवाङ्मनोव्यापाररूपा द्रव्यक्रिया 'तुच्छा' असारा अभिलषितफलासाधकत्वादित्येतदर्थः ॥**

---

चन्द्र.: वृत्तिकृदेव साक्षिपाठस्यान्वयसहितमर्थमाह एते - प्रणिधानादय इत्यादि । कथञ्चिद् = कयाचिदपेक्षया तदुपलक्ष्या = तेन = क्रियारुपत्वेन उपलक्ष्या = अनुमेया इति भावः । आशयभेदाः = आत्मनोऽध्यवसायविशेषरुपाः ।

अयं भावः, प्रणिधानादयो बाह्यस्वरुपेण क्रियारुपा अपि सन्ति, तथाऽपि ते परमार्थतो न क्रियारुपाः, परन्तु क्रियया ज्ञेया आशयविशेषाः, यथा "अयं एतादृक्क्रियावान्, तस्मादयं प्रणिधानाद्याशयवान्" इति ।

पञ्चप्रकारोऽपि न केवलं प्रणिधानं, प्रवृत्तिर्वा किन्तु पञ्चप्रकारोऽपि इति अपिशब्दार्थः । कायवाङ्मनोव्यापाररुपा इति ।

ननु पञ्चप्रकारात्मक आशयो भाव:, भावश्च मनोव्यापाररुप:, ततश्च भावेन विना चेष्टा मनोव्यापारेण विनैव भवति। ततश्चात्र यदुक्तं "भावेन विना चेष्टा कायवाङ्मनोव्यापाररुपा" इति, तन्न घटते। यदि हि भावो नास्ति, तर्हि मनोव्यापाररुपा चेष्टा कथं स्यात् ? यदि च मनोव्यापाररुपा चेष्टाऽस्ति, तर्हि भावाऽभाव: कथं स्यादिति चेत्।

सत्यं, परन्तु अनेनैवैतद् ज्ञायते यदुत भावो मनोव्यापारश्च परस्परं भिन्न एव।

ननु तर्हि क: प्रणिधानादिरुपो भाव:, कश्च मनोव्यापार इति स्पष्टीक्रीयतामिति चेत् अत्र बहु वक्तव्यं, तथाऽपि सङ्क्षेपत: किञ्चिदुच्यते। मिथ्यात्वमोहनीयादिकर्मणां क्षयोपशमविशेष: भाव:, तादृशक्षयोपशमजन्यो जीवाध्यवसायश्च भाव:, तादृशो जीवोपयोगो मनोयोगात्मक एव, किन्तु सर्वोऽपि मनोयोग: प्रस्तुतभावरुपो न भवति, तादृशक्षयोपशमाभावभाविनो मनोयोगस्य प्रस्तुतभावत्वाभावात्। मनोवर्गणापुद्गलालम्बनजन्यो "मनोयोग" इत्यपरनामको जीवव्यापारो मनोयोग:।

अत्र चतुर्भङ्गी

(१) कस्यचित् क्षयोपशमोऽस्ति, तज्जन्यो मनोव्यापारोऽप्यस्ति। यथा साध्वादीनां मिथ्यात्वमोहनीयप्रभृतिकर्मणां क्षयोपशमोऽस्ति, तज्जन्यश्च मनोव्यापार: प्रतिदिनं स्वाध्यायविनयवैयावृत्त्यादिशुभक्रियासु शुभात्मकोऽस्त्येव।

(२) कस्यचित् क्षयोपशमोऽस्ति, तज्जन्यस्तु मनोव्यापारो नास्ति। यथा विग्रहगतौ अपर्याप्तावस्थायां च सम्यग्दृशां मिथ्यात्वमोहनीयादिक्षयोपशमोऽस्ति, परन्तु मन:पर्याप्त्यभावात् तादृशक्षयोपशमजन्यो मनोव्यापारो नास्ति।

(३) कस्यचित् क्षयोपशमो नास्ति, मनोव्यापारस्तु अस्ति। यथा अभव्यादीनां मिथ्यात्वमोहनीयादिकर्मक्षयोपशमो नास्ति, किन्तु स्वर्गादिसुखतीव्रवाञ्छा सम्भवति तेषां, ततश्च तत्प्राप्त्यर्थं स्वाध्यायादिषु योगेषु शुभो मनोव्यापारस्तु तेषां सम्भवत्येव, तेनैव तेषां ग्रैवेयकपर्यन्तदेवलोकसमुत्पादात्।

(४) कस्यचित् क्षयोपशमोऽपि नास्ति, मनोव्यापारोऽपि नास्ति। यथा निगोदजीवानामिति।

असारा = मोक्षात्मकफलरुपो य: सार:, तद्विरहितेति। स्वर्गादिरुपं फलं तु तस्या अपि अस्त्येव। परन्तु मोक्षापेक्षया स्वर्गादे: फलत्वमफलत्वरुपमेवेति।

एतदर्थ: = प्रस्तुता या 'आशयभेदा' इत्यादिरुपा कारिका, तस्या अयमनन्तरोदितोऽर्थ इति भाव:।

---

**<u>यशो.:</u> अथ के ते प्रणिधानाद्याशया:? उच्यते - प्रणिधानं प्रवृत्तिर्विघ्नजय: सिद्धिर्विनियोगश्चेति पञ्च। आह च- "प्रणिधि-प्रवृत्ति-विघ्नजय-सिद्धि-विनियोगभेदत: प्राय:। धर्मज्ञैराख्यात:, शुभाशय: पञ्चधाऽत्र विधौ।" (षो० ३-६) इति।**

तत्र 'हीनगुणद्वेषाभावपरोपकारवासनाविशिष्टोऽधिकृतधर्मस्थानस्य कर्तव्यतोपयोग:' प्रणिधानम् ।

---

<u>चन्द्र.:</u> <u>प्राय:</u> इति । ननु भावो यदि पञ्चप्रकारात्मक एव, तर्हि **प्राय:**पदोपादानं निरर्थकमेव इति चेत्, न, मूलभेदापेक्षया शुभाशय: पञ्चविध:, उत्तरभेदापेक्षया तु अनेकविध इति ज्ञापनार्थं प्राय:पदोपादानं संभाव्यते । यदि वा न केवलं प्रणिधानादिपञ्चप्रकाररुप एव शुभाशयो विद्यते, किन्तु तदन्योऽपि विद्यते इति ज्ञापनार्थं प्राय:पदोपादानम् ।

ननु प्रणिधानादिभिन्न: न कोऽपि शुभाशय: सम्भवतीति चेत् न, अस्या एव गाथाया विवरणेऽग्रे वृत्तिकृता प्रतिपादयिष्यते यदुत → रागादिमलविगमेन पुष्टिशुद्धिमच्चित्तमेव धर्म:, पुष्टिश्च पुण्योपचय:, शुद्धिश्च घातिकर्मणां पापानां क्षये या काचिन्निर्मलता । तदुभयञ्च प्रणिधानादिलक्षणेन भावेन अनुबन्धवद् भवति ← इति । अत्र च प्रथमं पुष्टिशुद्धिमच्चित्तं प्राप्यते, तदनुबन्धश्च प्रणिधानादिना भवतीति प्रतिपादितं, ततश्च ज्ञायते यदुत प्रथमं प्रणिधानादिकं विनाऽपि पुष्टिशुद्धिमच्चित्तात्मको धर्मस्तु अस्त्येव, सोऽपि च शुभाशय एवेति प्रणिधानादिकं विनाऽपि शुभाशयोऽस्त्येवेति कृत्वाऽत्र प्रायोग्रहणं युक्तमेवेति ।

किञ्च "सद्धर्मरागो मोक्षबीजं" इति वाचकैरेव प्रतिपादितं वैराग्यकल्पलतायां, तथा च तत्पाठ: → दृष्ट्वा सदाचारपरान्जनान्या शुद्धप्रशंसान्विततच्चिकीर्षा, सद्धर्मराग: स हि मोक्षबीजं, न धर्ममात्र: प्रणिधानरूप: ← इति । स च सद्धर्मराग: सामान्यत: प्रणिधानादिस्वरुपभिन्नत्वात् प्रणिधानादिभिन्न एव शुभाशय:, तस्मात् प्रणिधानादिभिन्नोऽन्योऽपि शुभाशय: सम्भवतीति । तदेवमादिप्रकारेण प्रायोग्रहणं युक्तमिति ।

<u>विधौ</u> = स्वाध्यायादिरुपे विहिताचारे इति भाव: ।

<u>तत्र</u> = पञ्चविधाशयमध्ये ।

<u>हीनगुणद्वेषाभावेत्यादि</u> हीनगुणद्वेषाभावविशिष्ट: परोपकारवासनाविशिष्ट: अहिंसादिधर्मस्थानकर्तव्यतोपयोग: प्रणिधानमिति सङ्क्षेपार्थ: ।

तथा हि प्रव्रज्याप्रतिपत्तिमान् मुनि: "मया षड्जीवनिकायहिंसात्यागोऽवश्यं कर्त्तव्य:" इत्युपयोगवान् भवति । अयं चोपयोग: प्रणिधानमुच्यते । अत्र ये षड्जीवनिकायहिंसां न त्यजन्ति, ये च व्यवहारतस्तत्त्यागवन्तोऽपि तत्पालनं न कुर्वन्ति, ते प्रकृतसाध्वपेक्षया हीनगुणा उच्यन्ते, तेषु द्वेषो न कर्त्तव्य:, यथा "एते हिंसका:, पापिष्ठा:, व्रतभञ्जका: धिगेतान्" इत्यादि ।

ननु तर्हि हीनगुणेषु को भावो धर्त्तव्य इति चेत् परोपकारकरणभाव:, अत एवाह <u>परोपकारवासनाविशिष्ट:</u> इति । अयं भाव: - "यत् धर्मस्थानं मया प्राप्तं, तदनेन न प्राप्तं, किन्तु यदि तस्याऽपि

प्रकृतधर्मस्थानस्य प्राप्तिर्भवेत् तर्हि अतीव शोभनं स्यात् "इत्यादि भावना रुपा या परोपकारवासना, सा प्रणिधानाशयस्यांशभूता । ये तु हीनगुणेषु द्वेषं कुर्वन्ति, ये वा "किं वा ममान्येषां चिन्तनेन, अहमात्मश्रेयः कुर्याम्," इत्यादिस्वार्थमात्रपरायणत्वेन परोपेक्षां कुर्वन्ति, तेषां अहिंसादिधर्मस्थानकर्त्तव्यतोपयोगः न प्रणिधानमिति ।

किञ्च न केवलं हीनगुणं प्रति एव, किन्तु समगुणं प्रत्यपि परोपकारवासना धारणीया । तथाहि - द्वौ संसारिणौ समकं प्रव्रजितौ, ततश्च प्रव्रज्यात्मकं गुणमपेक्ष्य ते समगुणाः, तत्र च ताभ्यां प्रव्रज्यापालने परस्परं उपकारकरणैकबद्धलक्ष्याभ्यां भवितव्यं, न स्वार्थमात्रपरायणाभ्यां इर्ष्यावासितान्तःकरणाभ्यां वा, तथा च द्वेषाभावो हीनगुणं प्रति, परोपकारवासना च समगुणं प्रति इत्येवं विवेक इति । यदि वा उचितं परोपकारं प्रति उपेक्षावान् भूत्वा न स्वाराधनां जडतया करोति, किन्तु तमपि यथोचितं करोत्येवेति सङ्क्षेपार्थः ।

अत्र बहु वक्तव्यं, तत्तु स्वयं तत्तद्धर्मस्थानमधिकृत्य विभावनीयम् ।

अत्रार्थे षोडशकप्रकरणगतां गाथां साक्षिपाठत्वेन प्रदर्शयन्नाह **उक्तं चे**त्यादि ।

---

**यशो.: उक्तं च - "प्रणिधानं तत्समये, स्थितिमत्तदधः कृपानुगं चैव । निरवद्यवस्तुविषयं, परार्थनिष्पत्तिसारं च ।" (षो० ३-७) 'तत्समये' प्रतिपन्नधर्मस्थानमर्यादायां 'स्थितिमत्' अविचलितस्वभावम्, 'तदधः' स्वप्रतिपन्नधर्मस्थानादधस्तनगुणस्थानवर्त्तिषु 'कृपानुगं' करुणापरम्, न तु गुणहीनत्वात्तेषु द्वेषान्वितम्, शेषं सुगमम् ॥**

---

चन्द्र.: वृत्तिकृत् स्वयमेव तदर्थं सान्वयं प्रतिपादयन्नाह **तत्समये** इत्यादि । **प्रतिपन्नधर्मस्थानमर्यादायां** इत्यादि । अत्र मर्यादा चतुर्विधा द्रव्यतः क्षेत्रतः कालतो भावतश्च । यथा सर्वथा प्राणातिपातविरमणात्मके धर्मस्थाने द्रव्यतो मर्यादा षट्स्वपि जीवनिकायेषु हिंसात्यागः, क्षेत्रतः मर्यादा सर्वलोके हिंसात्यागः, कालतो मर्यादा दिवा वा रात्रौ वा सर्वदा हिंसात्यागः, भावतो मर्यादा रागेण वा द्वेषेण वा सर्वप्रकारेण हिंसात्याग इति । एवं सर्वेषु धर्मस्थानेषु यथासम्भवं वाच्यम् ।

स्थितिमत् = अविचलितस्वभावं "विशिष्टपरिषहोपसर्गादिसंनिपातेऽपि सत्त्वमवष्टभ्य धर्मानुष्ठानेऽप्रमत्तेन भवितव्यं मया" इत्येवंविधं कर्त्तव्यतोपयोगस्य निश्चलत्वं यदि भवेत्, तर्हि तत् प्रणिधानं अविचलितस्वभावं निगद्यते । श्मशानोत्पन्नवैराग्यवत् यत्प्रणिधानं प्रवचनश्रवणादिनिमित्तकाले समुत्पद्यते, निमित्ताभावे तु अपगच्छति, न तत् प्रणिधानं अविचलितस्वभावमिति । अत्र बहु वक्तव्यं, तत्तु विस्तरभिया नोच्यते ।

अधस्तनगुणस्थानवर्तिषु = अत्र गुणस्थानपदं न प्रसिद्धानां चतुर्दशगुणस्थानानां प्रतिपादकमपि तु

व्युत्पत्त्यर्थमनुसृत्यानेकविधगुणस्थाननिरुपकं ग्राह्यम् । तथा हि अष्टमतपोऽपेक्षया षष्ठं तपः अधस्तनगुणस्थानं, तदपेक्षयाऽभक्तार्थः, तदपेक्षयाऽऽचामाम्लं, तदपेक्षया निर्विकृतिकं, तदपेक्षयैकाशनकं, तदपेक्षया द्व्यशनकं क्रमशोऽधस्तनगुणस्थानमित्येवंरीत्याऽनेकविधानि गुणस्थानान्यत्र ग्राह्याणि ।

करुणापरं इत्यादि । यदि शक्यं स्यात्, तर्हि अधस्तनगुणस्थानवर्तिनां समगुणस्थानवर्तित्वकरणप्रयत्नपरं, अधस्तनगुणस्थानवर्तिनां समगुणस्थानवर्तित्वकरणासम्भवे तु तदुपेक्षापरं इति भावः ।

यद्यपि जीवः करुणापरो भवति, न तु जीवगतं प्रणिधानं, तथाऽपि जीवप्रणिधानयोः परस्परं गुणगुणिभावेन कथञ्चिदभेदाद् प्रणिधानमपि करुणापरमत्रोक्तमिति न दोषः ।

शेषं = 'निरवद्यवस्तुविषयं' इत्याद्युत्तरार्द्धं सुगमम् = सुखबोध्यम् । तथाऽपि किञ्चिदुच्यते । प्रणिधानं स्वाध्यायतपोवैयावृत्त्यादिरुपाणि यानि निरवद्यवस्तूनि, तत्सम्बन्धि ग्राह्यम्, यत्तु प्रणिधानं सावद्यवस्तुसम्बन्धि यथा "अहं प्रभूतां विकृतिं प्रतिदिनं खादयिष्यामि, अहं मच्छत्रुं ताडयिष्यामि" इत्यादि, तत्तु अत्र न ग्राह्यम्, मोक्षप्रापकस्यैव प्रणिधानस्यात्राभिधानात्, सावद्यवस्तुविषयकस्य तु प्रणिधानस्य मोक्षप्रापकत्वाभावात् ।

न केवलमेतदेव, किन्तु निरवद्यवस्तुन्यपि यदि कुत्रचिदंशे सावद्यविषयकं प्रणिधानं स्यात्, तदा तत्सावद्यांशविषयकप्रणिधानमप्यत्र प्रतिषिद्धमिति बोध्यम् । तथाहि – "अहं प्रतिदिनं प्रभूतं स्वाध्यायं करिष्यामि, एतत्तु मम रुचितमपि । तथा तद्व्याजेन विकृतिलाभोऽपि मम भविष्यति, यतो हि अस्माकं गुरवः स्वाध्यायिने विकृतिं वितरन्ति" इति । अत्र हि शुभभावेन स्वाध्यायप्रणिधानं युक्तम्, किन्तु तत्र गृद्ध्या विकृतिपरिभोगप्रणिधानं तु सावद्यविषयकमिति तत्प्रणिधानं प्रकृतप्रणिधानरुपं नावगन्तव्यमिति भावः ।

एवं "गुरोरनुज्ञामगृहीत्वाऽपि अहं अमुकं ग्रन्थं तु पठिष्याम्येव, गुरोर्निषेधेऽपि तपः करिष्याम्येव" इत्यादि रुपाणि प्रणिधानान्यपि सावद्याविषयकानि अवगन्तव्यानि ।

अत्र शिष्यः प्राह → षोडशके निरवद्यवस्तुविषयकत्वं स्थितिमत्त्वं च प्रणिधानव्याख्यायामुक्तम्, वृत्तिकृता तु तन्नोक्तमिति न्यूनतादोषः ← इति ।

अत्र समाधानमिदं प्रतिभाति → हीनगुणद्वेषाभावपरोपकारवासनाविशिष्टोऽधिकृत-धर्मस्थानस्य कर्त्तव्यतोपयोगः प्रणिधानम् ← इति वृत्तिकृतोक्तम् । षोडशकगाथायां तु 'अधिकृतधर्मस्थानं' इति पदं नोपात्तं, ततश्च अधिकृतधर्मस्थानं निरवद्यमेव भवत्यन्यथा तस्य धर्मस्थानत्वस्यैव अभावः स्यादिति तत्पदेन वृत्तिकृताऽपि निरवद्यवस्तुविषयकत्वं गृहीतमेव । तथा षोडशकगाथायां 'कर्त्तव्यतोपयोगः' इति पदं नोपात्तम् । ततश्च "इदं मयाऽवश्यं कर्त्तव्यं" कर्त्तव्यतोपयोग एव अविचलितस्वभावत्वं ज्ञापयतीति तत्पदेन वृत्तिकृताऽपि अविचलितस्वभावत्वं गृहीतमेवेति न न्यूनतादोषः ।

इत्थं च षोडशकगाथायाः स्पष्टोऽर्थोऽयं → प्रणिधानं तत्समये स्थितिमत् = कर्त्तव्यतोपयोगरुपं, तदधःकृपानुगं चैव, निरवद्यवस्तुविषयं = धर्मस्थानात्मकवस्तुविषयं धर्मस्थानविधिविषयं च, परार्थनिष्पतिसारं

च ← इति ।

वृत्तिकृद्व्याख्यायाः स्पष्टोऽर्थोऽयं → हीनगुणद्वेषाभाव-परोपकारवासनाविशिष्टः अधिकृतधर्मस्थानस्य = निरवद्यवस्तुस्वरुपस्य कर्त्तव्यतोपयोगः = प्रतिपादितोऽविचलित परिणाम ← इति ।

**यशो.: अधिकृतधर्मस्थानोद्देशेन तदुपायविषय इतिकर्तव्यताशुद्धः शीघ्रक्रियासमाप्तीच्छादिलक्षणौत्सुक्यविरहितः प्रयत्नातिशयः प्रवृत्तिः ।**

चन्द्र.: अधुना वृत्तिकृत् द्वितीयाशयस्य प्रवृत्तिनामकस्य व्याख्यामाह अधिकृतधर्मस्थानोद्देशेन = प्रणिधानविषयीभूतं यत् स्वाध्यायादिरुपं धर्मस्थानं, तल्लक्ष्यीकृत्येति भावः, तदुपायविषयः = अधिकृतधर्मस्थानस्य ये उपायाः, तद्विषयः, तत्सम्बन्धी, तद्गत इति यावत् । इतिकर्त्तव्यताशुद्धः = "इदं अनुष्ठानं इति = अनेन शास्त्रोक्तेन विधिना कर्त्तव्यं, न तु तमतिक्रम्य" इत्येवंरुपाध्यवसायगर्भितो यथाशक्ति शास्त्रविधिपालनैकविषयः प्रयत्नातिशयः इत्यनेन सहान्वयः कर्त्तव्यः । तथा शीघ्रक्रिया इत्यादि । शीघ्रा या क्रियायाः समाप्तिः, तस्याः या इच्छा, तदादिलक्षणं यत् औत्सुक्यं, तेन विरहितः प्रयत्नातिशयः इति । 'स्वाध्यायादिरुपा धर्मस्थानक्रिया शीघ्रं समाप्तिं प्राप्नुयात्' इति हि अकाले इच्छा औत्सुक्यं, औत्सुक्यं च तत्त्वत आर्त्तध्यानमिति अशुभभावरुपं, स चाशुभभावः शुभाशये कथमुचितः स्यात् ।

किञ्च यथा नाटकादिरुपे इष्टे वस्तुनि "इदं नाटकं शीघ्रं समाप्तिमाप्नुयात्" इतीच्छा न भवति, तद्विपरीते तु धर्मोपदेशादौ अधर्मिणां "कदाऽयं धर्मोपदेशः समाप्तिमाप्स्यति ?" इत्यादिरुपा इच्छा भवति । ततश्चानेन ज्ञायते यदुत यत्रानुष्ठाने शीघ्रसमाप्तीच्छा, तत् तत्त्वतस्तदाऽनिष्टमेव तस्य, यत्र च सा नास्ति, तत् तदा तस्येष्टमेवेति । ततश्च धर्मस्थानक्रियाशीघ्रसमाप्तीच्छावतस्तत्त्वतः तदा तदनुष्ठानमनिष्टमिति सिद्धम् । धर्मानुष्ठानस्यानिष्टत्वं च धर्मपथ्येऽरुच्यात्मकं आत्मदोषं ज्ञापयति । तथा च षोडशके उक्तं यदुत 'भावारोग्ये सति विषयतृष्णादयो रोगविकारा न भवन्ति' इति, अर्थादापन्नं यदुत यदि विषयतृष्णादयो रोगविकाराः सन्ति, तर्हि रोगोऽप्यस्त्येव । रोगविकारेषु च धर्मपथ्येऽरुचिरपि प्रतिपादिता । ततश्च शीघ्रक्रियासमाप्तीच्छावतो धर्मपथ्येऽरुच्यात्मकस्य रोगविकारस्य सत्त्वात् भावारोग्याभावः सिद्ध्यति । तस्मात् धर्मानुष्ठाने प्रयत्नातिशयः अवश्यं प्रकृतौत्सुक्यविरहित एव युक्त इति । अत्र च विनेयजनानुग्रहार्थं षोडशकपाठः प्रदर्श्यते । → **आरोग्ये सति यद्वद् व्याधिविकारा भवन्ति नो पुंसां । तद्वद् धर्मारोग्ये पापविकारा अपि ज्ञेयाः । तन्नास्य विषयतृष्णा, प्रभवत्युच्चैः न दृष्टिसंमोहः । अरुचिर्न धर्मपथ्ये, न च पापा क्रोधकण्डुतिः ।** ←

ननु तत्र धर्मपथ्येऽरुचिरित्थं प्रतिपादिता → धर्मश्रवणेऽवज्ञा, तत्त्वरसास्वादविमुखता चैव धार्मिकसत्त्वासक्तिश्च धर्मपथ्येऽरुचेर्लिङ्गम् ← इति । अत्र धर्मश्रवणेऽवज्ञा, तत्त्वरसास्वादविमुखता, धार्मिकजीवसङ्गारुचिश्चेत्येवं त्रिविधं धर्मपथ्येऽरुचेर्लिङ्गं प्रतिपादितम्, न तु शीघ्रक्रियासमाप्तीच्छालक्षणं लिङ्गं,

ततश्च तादृशेच्छा न धर्मपथ्येऽरुचिर्गणयितुमुचितेति चेत्

न, तादृशेच्छावान् धर्मानुष्ठाने लीनो न भवति, ततश्च धर्मानुष्ठाने रतस्य यथा तत्त्वरसास्वादो भवति, तथाऽस्य न भवति, इत्थं च तत्त्वरसास्वादविमुखतारुपं धर्मपथ्येऽरुचेर्लिङ्गं अत्र शीघ्रक्रियासमाप्तीच्छायां घटत इति सा धर्मपथ्येऽरुचिर्गणयितुमुचितेति ।

एवं तादृशेच्छावान् धर्मश्रवणेऽवज्ञां प्राप्नोत्यंवेत्येवमपि तादृशेच्छा धर्मपथ्येऽरुचि, गणयितुमुचितेति ।

किञ्च यथा 'धर्मोपदेशक्रिया शीघ्रं समाप्ता भूयात्' इत्येवं इच्छावान् अधार्मिकः धर्मोपदेशश्रवणं कुर्वन्नपि न तथाविधेनातिशायिना प्रयत्नेन करोति, किन्तु सामान्यतः, एवं अत्रापि अधिकृतधर्मस्थानक्रियासमाप्तीच्छावान् जीवः तत्क्रियां मन्दोत्साहेनैव करोति, न तु प्रयत्नातिशयेनेति प्रकृतेच्छा प्रयत्नातिशयमेव विघटयतीति न कथमपीयमौचित्यं बिभर्तीति । अत्रापि बहु वक्तव्यं विस्तरभिया सङ्क्षिप्यते ।

<u>प्रयत्नातिशयः</u> न केवलं प्रयत्नः, किन्तु अतिशायी प्रयत्न एव प्रवृत्तिः इति ज्ञेयम् । प्रयत्नेऽतिशायित्वं तु प्रणिधानदार्ढ्येन धर्मानुष्ठानबहुमानेन चारित्रमोहनीयादिक्षयोपशमेन च संपन्नं भवतीति बोध्यम् ।

एवं वृत्तिकृदुक्तं प्रवृत्त्याशयलक्षणं वर्णयित्वाऽधुना तस्य भावार्थः प्रदर्श्यते ।

यथा कश्चिद् राजा कुम्भकारमादेशं प्रदत्तवान् "यथा ग्रीष्मकालोचिताः मदुपयोगिनो घटाः निर्माप्यन्ताम्, यदि त्वं मदाज्ञां सम्यक् पालयसि, तर्हि महत्प्राभृतं दास्यामि, आज्ञास्खलनया तु मद्द्वेषभाजनं भविष्यसि त्वं" इति ।

ततश्च स कुम्भकारो घटान् निर्मापयितुमारभत, स च जानाति यथा "सम्यगाज्ञापालने महान् लाभः, तत्स्खलनायां च महती हानिः" ततश्च स निश्चिनोति यथा "मया घटनिर्मापणेऽत्यन्तमप्रमत्तेन भवितव्यम्" इति ।

अत्र च स कुम्भकारः अद्य यावत् अनेकान् घटान् निर्मापितवानेव, तथाऽपि तत्र सामान्यजनार्थं घटान् निर्मापयन् स कुम्भकारः सामान्यप्रयत्नवानेवासीत्, अधुना तु घटान् निर्मापयन् स कुम्भकारः अत्यन्तमप्रमादेन प्रयत्नं करोतीति तस्य प्रयत्नातिशयोऽस्तीति वक्तुं शक्यते ।

तस्य च प्रयत्नातिशयस्य द्वौ विषयौ, उद्देश्यात्मकविषयः विधेयात्मकविषयश्च । तत्र कुम्भकारो यान् उद्दिश्य प्रयत्नातिशयं करोति, ते उद्देश्यात्मकविषयाः, तं च प्रयत्नातिशयं येषु वस्तुषु करोति, तानि वस्तूनि विधेयात्मकविषयाः । तथाहि – "मया रक्ताः श्वेताः श्यामाश्च घटाः निर्मापणीयाः, ततश्च मया रक्ता श्वेता श्यामा च मृद् आनेतव्या" इति चिन्तयित्वा स कुम्भकारो रक्तादिमृद आनयति । अत्र च रक्तादिघटानुद्दिश्य कुम्भकारेण मृत्सु प्रयत्नातिशयः कृतः, ततश्च घटाः उद्देश्यात्मकविषयाः, मृदश्च विधेयात्मकविषयाः । एवमेव कुम्भकारः घटानुद्दिश्य चक्रदण्डजलादिषु प्रयत्नातिशयं करोतीति चक्रादीन्यपि वस्तूनि विधेयात्मकविषया भवन्तीति ।

एतत्सर्वं अत्रोपनेयम् ।

तथाहि तीर्थकृता साधवे आदेशः प्रदत्तः यथा "अहिंसा पालनीया, सम्यक्तत्पालनेऽहं मोक्षं दास्यामि, विपरीतकरणे च भवम्" इति । ततश्च मोक्षेच्छुर्भवभीरुश्च मुनिः अहिंसायां प्रयत्नातिशयं करोति । तत्र "मयाऽहिंसा पालनीया, तदर्थं च मया षड्जीवनिकायपरिज्ञानं कर्त्तव्यं, शास्त्राभ्यासः कर्त्तव्यः" इत्यादि चिन्तयित्वा स मुनिः अहिंसाधर्मस्थानोद्देशेन अहिंसोपायेषु शास्त्राभ्यासादिषु प्रयत्नातिशयं करोति । अत्र च प्रयत्नातिशयस्य उद्देश्यात्मकविषयः अहिंसारुपं धर्मस्थानं, विधेयात्मकविषयश्च अहिंसापालनस्य उपायाः । अत एव वृत्तिकृतोक्तम् → अधिकृतधर्मस्थानोद्देशेन तदुपायविषय... ← इत्यादि ।

स च कुम्भकारः कुम्भकरणविधौ भृशमुपयुक्तो भवति, यतो हि यदि अविधिना घटान् निर्मापयेत्, तर्हि घटा न सम्यक् स्युः, ततश्च लाभहानिः शिक्षाप्राप्तिश्च ध्रुवा । विधिकरणे च वैपरीत्यम् । इत्थं च कुम्भकारस्य प्रयत्नातिशयो विधिशुद्धो भवति, अर्थात् इतिकर्त्तव्यताशुद्धो भवति ।

एतदत्रापि योज्यम् । साधोः प्रयत्नातिशयो विधिशुद्धः अर्थात् इतिकर्त्तव्यताशुद्धो भवति । अविधिकरणे जिनाज्ञाभङ्गेन लाभहानिव्ययप्राप्त्योर्ध्रुवत्वात् ।

तथा कुम्भकारः "शीघ्रमेव सर्वान् घटान् निर्माप्य राज्ञे ददामि" इति औत्सुक्यं विजहाति । यतो हि स जानाति यदुतौत्सुक्यकरणे घटनिर्मापणं सम्यक् न स्यात्, ततश्च राजद्वेषः अनिवार्यः स्यात् इति ।

एवमेव मुनिः "शीघ्रमेव सर्वं धर्मानुष्ठानं समापयामि" इतीच्छां विजहात्येव, तत्करणजन्यदोषाणां स्फुटज्ञानात् इति ।

ननु "शीघ्रक्रियासमाप्तीच्छादिलक्षण..." इत्यत्र यदादिपदं, तेन किं ग्राह्यं इति चेत्, क्रियाप्राप्यफलेच्छा प्रकृतानुष्ठानभिन्नस्य शुभानुष्ठानस्यापि चिकीर्षा च ग्राह्येति ।

एवं अनेकानि धर्मानुष्ठानानि विचार्याणि । अत्र तु दिग्दर्शनमात्रमेव कृतम् ।

अत्रार्थे वृत्तिकृत् षोडशकपाठमुपदर्शयन्नाह तत्रैव तु इत्यादि ।

---

यशो.: आह च – "तत्रैव तु प्रवृत्तिः, शुभसारोपायसङ्गतात्यन्तम् ।
[illegible] 'तत्रैव' अधिकृतधर्मस्थाने एव शुभः प्रकृष्टः सारो नैपुण्यान्वितो य उपायस्तेन संगता ।

---

चन्द्र.: वृत्तिकृदेव षोडशकपाठांशविवरणमाह तत्रैव = अधिकृतधर्मस्थाने एव इत्यादि । यस्मिन्धर्मानुष्ठाने प्रणिधानं कृतं, तत्रैवेति भावः । प्रवृत्तिर्हि प्रणिधानात् पश्चाद्भाविनी । ततश्च यत्रानुष्ठाने प्रणिधानमेव न भवेत्, तत्र प्रवृत्त्याशयोऽपि न भवेदेव । यद्यपि अभव्यादीनां चारित्रादिषु प्रणिधानं विनाऽपि प्रवृत्तिर्दृश्यते, तथाऽपि सा प्रवृत्तिः केवलं वाक्कायमनोचेष्टारुपैव, न तु प्रवृत्त्याशयरुपेति ।

ननु प्रवृत्तिः प्रवृत्त्याशयश्चेति द्वौ भिन्नौ पदार्थौ इति न वयमवबुध्याम इति चेत्, तर्हि श्रृणु, प्रवृत्तिः मनोगता वाग्गता कायगता च या चेष्टा, तद्रुपा, प्रवृत्त्याशयश्च मोहनीयादि कर्मक्षयोपशमविशेषरुपस्तज्जन्योपयोगरुपश्च आत्मगत इति । एतच्च प्राक्प्रतिपादितमेव ।

ननु प्रणिधानमपि मोहनीयादिक्षयोपशमविशेषः तज्जन्याध्यवसायरुपश्च, प्रवृत्तिरपि तथैव, ततश्च कोऽनयोर्भेद इति चेत्, प्रणिधानरुपात् प्रवृत्तिरुपः आशयः विशिष्टः इत्येतावान् भेदः यतो हि आशयपञ्चके उत्तरोत्तर आशयः पूर्वपूर्वस्मादाशयादधिकोत्तमः क्रमभावी चेति ।

<u>शुभः = प्रकृष्टः सारः = नैपुण्यान्वितो य उपाय</u> इत्यादि । अत्र उपायस्य द्वे विशेषणे प्रकृष्टः नैपुण्यान्वितश्च । तत्र हीन उपायः सम्पूर्णकार्यसाधको न भवति, तस्मादुपायः प्रकृष्टः अपेक्षणीयः । अर्थात् प्रवृत्तिर्न हीनेनोपायेनात्यन्तं सङ्गता, किन्तु कार्यसाधकेनोपायेनात्यन्तं सङ्गतेति । सोऽपि च प्रकृष्ट उपायो यदि अनिपुणतया प्रयुज्येत, तर्हि न सफलो भवेत्, तस्मात्स नैपुण्यान्वित आवश्यक इति ।

तथाहि क्रोधविजयार्थं क्रोधजनकनिमित्ताभावकरणमप्रकृष्टोपायः, ज्ञानादिभावनाभावनं प्रकृष्ट उपायः, प्रकृष्टोपायोऽपि निर्जने देशे प्रातःकालादिरुपे काले उचितासनेन ज्ञानादिभावना भावनरुपया निपुणतया प्रयोक्तव्यः, न तु जनाकुले देशे, मनसोऽस्वस्थतादशायां, अनुचितासनेन इत्यादिना, अनिपुणतया प्रकृष्टोपायस्यापि उपेयासाधकत्वात् । अत्राऽपि निपुणता यद्यपि जीवगता, तथाऽपि उपचारात् उपायस्य नैपुण्यान्वितत्वमुच्यत इत्यदोषः ।

---

**<u>यशो.:</u> विघ्नजयो नाम ''विघ्नस्य जयोऽस्मादि''ति व्युत्पत्त्या धर्मान्तरायनिवर्तकः परिणामः । स च जेतव्यविघ्नत्रैविध्यात्त्रिविधः, तथाहि-यथा कस्यचित्कण्टकाकीर्णमार्गावतीर्णस्य कण्टकविघ्नो विशिष्टगमनविघातहेतुर्भवति, तदपनयनं तु पथि प्रस्थितस्य निराकुलगमनसंपादकं, तथा मोक्षमार्गप्रवृत्तस्य कण्टकस्थानीय-शीतोष्णादिपरीषहै-रुपद्रुतस्य न निराकुलप्रवृत्तिः, तत्तितिक्षाभावनया तदपाकरणे त्वनाकुलप्रवृत्तिसिद्धिरिति कण्टकविघ्नजयसमः प्रथमो हीनो विघ्नजयः ।**

---

<u>चन्द्र.:</u> अथ तृतीयं विघ्नजयं आशयं व्याख्यानयति <u>विघ्नजयः</u> इत्यादि ।

ननु विघ्नजयस्तु विघ्नविनाशादिरुपो न जीवस्याशयरुपः, ततश्च तस्य तृतीयाशयत्वं कथं घटेतेत्याशङ्कायामाह <u>विघ्नस्य जयोऽस्मादित्यादि ।</u> तथा च यस्मात् जीवाशयविशेषात् धर्मविघ्नानां जयो भवति, स जीवाशयविशेष एव विघ्नजयो नाम तृतीय आशयभेद इति । अत्र च 'विघ्नस्य जयः इति विघ्नजयः' इति षष्ठीतत्पुरुषरुपां व्युत्पत्तिं परिहृत्य बहुव्रीहिसमासेन या व्युत्पत्तिः समादृता, तयाऽयमर्थः प्राप्यत इति ।

जेतव्येत्यादि जेतुं योग्यानि यानि विघ्नानि तेषां जघन्यमध्यमोत्कृष्टरुपत्वेन त्रिविधत्वादिति भाव: । तथा च यद्यपि विघ्नजय एकविध एव, तथापि तत्प्रतियोगिनां विघ्नानां त्रिविधत्वादेव विघ्नजयोऽपि त्रिविध: प्रतिपाद्यत इति ।

त्रिविधान् विघ्नजयान् क्रमशो निरुपयति तथाहि इत्यादि । सर्वं स्पष्टम् यावत् हीनो विघ्नजय: । नवरं शीतपरिषहबाधितस्याप्रमत्तभावेन प्रतिक्रमणादिक्रियारुपे मोक्षमार्गे न निराकुला प्रवृत्ति:, उष्णपरिषहबाधितस्य तु ग्रीष्मकाले भिक्षाटनस्थण्डिलभूमिगमनादिरुपे मोक्षमार्गे न निराकुलप्रवृत्ति: । एवमन्यानपि परिषहानाश्रित्य तत्तन्मोक्षमार्गांश्चाश्रित्य ज्ञातव्यम् ।

त्तितिक्षाभावनया = तेषां = परिषहाणां या तितिक्षाभावना = सहनकरणेच्छाया: परिशीलनम् तया । तदपाकरणे = परिषहाणां निराकरणे कृते सति । यद्यपि तितिक्षाभावनया शीतादिपरिषहा: नापगच्छन्ति, परन्तु शीतादिसत्त्वेऽपि जीवस्य ते परिषहा: तादृशभावनाप्रभावाद् बाधका न भवन्तीति तेषां परिषहस्वरुपमेव व्याहन्यते, तदपेक्षयैव तदपाकरणमत्र बोध्यम् ।

हीनो = द्वितीयतृतीयविघ्नजयापेक्षया जघन्य इति ।

---

**यशो.: तथा तस्यैव ज्वरेण भृशमभिभूतस्य निराकुलगमनेच्छोरपि तत्कर्तुमशक्नुवत: कण्टकविघ्नादधिको यथा ज्वरविघ्नस्तज्जयश्च विशिष्टगमनप्रवृत्तिहेतुस्तथेहापि ज्वरकल्पा: शारीरा एव रोगा विशिष्टधर्मस्थानाराधनप्रतिबन्धकत्वाद्विघ्नास्तदपाकरणं च "हियाहारा मियाहारा" ० (पिंडनिर्युक्ति-गा० ६४८) इत्यादिसूत्रोक्तरीत्या तत्कारणानासेवनेन, "न मत्स्वरूपस्यैते परीषहा लेशतोऽपि बाधका: किन्तु देहमात्रस्यैव" इति भावनाविशेषेण वा सम्यग्धर्माराधनाय समर्थमिति ज्वरविघ्नजयसमो मध्यमो द्वितीयो विघ्नजय: ।**

---

चन्द्र.: अधुना द्वितीयमाह तथा तस्यैव इत्यादि । कण्टकविघ्नादधिको इति । कण्टकविघ्ने सति विशिष्टगमनाभावेऽपि सामान्यगमनं तु भवति, ज्वरविघ्ने तु सामान्यगमनस्यापि प्रतिबन्ध इति कृत्वा ज्वरविघ्नस्याधिकत्वमिति ।

शारीरा एव रोगा इत्यादि । यथा दृष्टान्ते ज्वरादयो रोगा गृहीता:, तथा दार्ष्टान्तिकेऽपि ते एव ग्राह्या इति एव शब्दार्थ: ।

तदपाकरणञ्चेत्यादि अयं भाव: रोगाणामपाकरणं द्वाभ्यां प्रकाराभ्यां भवति, तत्र रोगाणां यानि कारणानि अहितामिताहारादिरुपाणि, तेषामनासेवनेन रोगाणामुत्पत्तिरेव न भवति, इत्थञ्च रोगोत्पत्तिनिवारणं एव

रोगापाकरणम् । यदि च निकाचितकर्मपारवश्यादिकारणात् रोगोत्पत्तिः स्यात्, तर्हि भावनाविशेषेण रोगास्तथा सोढव्या यथा ते सन्तोऽपि असत्कल्पा भवेयुः आराधनाप्रतिबन्धात्मकस्य स्वफलस्याकरणात् । इत्थं प्रकारद्वयेन रोगाणामपाकरणं सम्भवति । एवं च रोगापाकरणं सम्यग्धर्माराधनाय समर्थं भवति, अन्यथा तु रोगापाकरणाभावे सम्यग्धर्माराधनं न स्यादेवेति ।

तथा रोगोत्पत्तौ रोगकारणानां अहितादिरुपाणामाहाराणां त्यागेनापि तदपाकरणं सम्भवति ।

वृत्तिगतवाक्यान्वयस्त्वेवम् → 'हियाहारा मियाहारा' इत्यादिसूत्रोक्तरीत्या तत्कारणानासेवनेन 'न मत्स्वरुपस्यैते परीषहा लेशतोऽपि बाधकाः किन्तु देहमात्रस्यैव' इति भावनाविशेषेण वा तदपाकरणं च सम्यग्धर्माराधनाय समर्थमिति ← ।

पिण्डनिर्युक्तिगता संपूर्णा गाथा त्वियम् → हियाहारा मियाहारा अप्पाहारा य जे नरा । न ते विज्जा तिगिच्छंति, अप्पाणं ते तिगिच्छगा ← इति । तदर्थस्त्वयम् → ये नराः हिताहाराः = पथ्यभोजिनः, मिताहाराः = सप्रमाणभोजिनः प्रमाणातिरिक्ताभोजिन इति यावत् । न केवलं मिताहाराः किन्तु अल्पाहाराः = स्वप्रमाणात्किञ्चिन्न्यूनभोजिन इत्यर्थः । वैद्यास्तान् न चिकित्सन्ति, पथ्यमिताल्पभोजिनां रोगाभावेन चिकित्साऽविषयत्वात् । ते तु जनाः आत्मनश्चिकित्सकाः, आत्मविशुद्धिकर्तार इति भावः ।

ननु रोगापाकरणं चिकित्साकरणात्मकेन तृतीयप्रकारेणाऽपि सम्भवति, ततश्च स प्रकारः किमर्थं अत्र न प्रदर्शितः ? किं औषध्यादिसेवनेन रोगापाकरणं न भवतीति चेत् ?

सत्यं, किन्तु उत्सर्गतश्चिकित्सा निषिद्धा, तथा चोत्तराध्ययनसूत्रं "तेगिच्छं नाभिनंदेज्जा" इत्यादि । रोगकारणानासेवनं रोगसम्भवे च देहात्मविवेकभावना इति द्वावपि प्रकारौ उत्सर्गः, ततश्च उत्सर्गप्रकारनिरुपणेऽपवादप्रकारनिरुपणं न युक्तमित्येवमादिकारणवशात् चिकित्साप्रकारोऽत्र न प्रतिपादित इति उत्प्रेक्षामहे ।

मध्यमो = प्रथमापेक्षया तृतीयापेक्षया च मध्यवर्तीति भावः ।

---

**यशो.: यथा च तस्यैवाध्वनि जिगमिषोर्दिग्मोहविघ्नोपस्थितौ भूयो भूयः प्रेर्यमाणस्याप्यध्वनीनैर्न गमनोत्साहः स्यात्तद्विजये तु स्वयमेव सम्यग्ज्ञानात्परैश्चाभिधीयमानमार्गश्रद्धानान्मन्दोत्साहतात्यागेन विशिष्टगमनसम्भवस्तथेहापि मोक्षमार्गे दिङ्मोहकल्पो मिथ्यात्वादिजनितो मनोविभ्रमो विघ्नस्तज्जयस्तु गुरुपारतन्त्र्येण मिथ्यात्वादिप्रतिपक्षभावनया मनोविभ्रमापनयनादनवच्छिन्नप्रयाणसंपादक इत्ययं दिङ्मोहविघ्नजयसम उत्तमस्तृतीयो विघ्नजयः ॥**

---

चन्द्र.: अधुना तृतीयं विघ्नजयमाह यथा च तस्यैवेत्यादि । सर्वं सुगमम् । का पूर्वा दिक् का च पश्चिमा ? इत्यादिरुपो मनोविभ्रम एव दिङ्मोहः ।

तद्विजये तु इत्यादि । → स्वयमेव सम्यग्ज्ञानात् परैश्चाभिधीयमानमार्गश्रद्धानात् तद्विजये तु मन्दोत्साहतात्यागेन विशिष्टगमनसम्भवः ← इत्येवमत्रान्वयः कर्त्तव्यः । अयं भावः, प्रथमं पथिकस्य केनचित्कारणेन दिङ्मोहसम्भवेऽपि पश्चात् सूर्यादिलिङ्गदर्शनात् "इयमेव पूर्वा, मया अनयैव गन्तव्यम्" इत्यादिरुपेण स्वयमेव दिशां सम्यग्ज्ञानं भवति, तथा अन्येऽपि पथिकाः तस्य तथैव मार्गं अभिदधति, तस्य च तस्मिन् श्रद्धा भवति । एवं च स्वयं सञ्जातात् सम्यग्ज्ञानात् परैश्चाभिधीयमानमार्गश्रद्धानात् तस्य दिङ्मोहो विनश्यति, अयमेव तद्विजयः । ततश्च तस्य प्राक् या मार्गगमने मन्दोत्साहताऽऽसीत्, सा विनश्येत्, ततश्च भवत्येव विशिष्टगमनसम्भव इति ।

मिथ्यात्वादिजनितो मनोविभ्रमो विघ्नः इत्यादि । अत्र आदिपदात् ज्ञानावरणीयादिप्रकृतयो ग्राह्याः, मिथ्यात्ववत् ज्ञानावरणीयादिनाऽपि मनोविभ्रमो भवति, तेनापि मोक्षमार्गे विशिष्टगमनप्रतिबन्धश्च भवति । तत्र जमालिप्रभृतीनां मिथ्यात्वजनितो मनोविभ्रमो 'कृतमेव कृतं न क्रियमाणं कृतं' इत्यादिरुपः, 'सर्वं कार्यं नियतिमात्रजन्यं, न पुरुषकारकर्मादिजन्यम्' इत्यादिरुपो वा प्रसिद्ध एव । तच्छिष्यादीनां तु प्रज्ञापनीयानां गुरुनियोगमात्रादेव गुरुकथितपदार्थश्रद्धानवतां ज्ञानावरणीयादिजन्यो मनोविभ्रमः । स च सम्यग्ज्ञानप्राप्तिं यावत् मार्गविघ्नरुपः सञ्जातः, स्थविरप्रज्ञापनया सम्यग्ज्ञाने सति तादृशविघ्ननाशात् मोक्षमार्गप्रवृत्तिरप्रतिहता तेषां सञ्जातेत्यादि अतिगहनमिदं तत्त्वं सूक्ष्मधिया विवेचनीयमिति ।

तज्जयस्तु इत्यादि । → गुरुपारतन्त्र्येण मिथ्यात्वादिप्रतिपक्षभावनया वा मनोविभ्रमापनयनात् तज्जयस्तु अनवच्छिन्नप्रयाणसम्पादकः ← इत्येवमत्रान्वयः कार्यः ।

अयं भावः यदा मिथ्यात्वोदयादिना जिनवचने शङ्कादयो दोषाः प्रादुर्भवन्ति, तदा "तदेव निःशङ्कं सत्यं, यज्जिनैः प्रवेदितं" इति मनः सम्प्रधारणीयम् । एतादृशं मनः संप्रधारयन् जीवः शङ्कादिदोषरहितो भूत्वाऽऽराधको भवति । तथाहि - "आचामाम्लतपःकरणे रुक्षाहारत्वादिकारणवशादजीर्णत्वादयो दोषा भवन्ति", गुरुकुलवासे आधाकर्मप्रभृतयो दोषा भवन्ति" इत्यादिरुपाः विभ्रमाः मिथ्यात्वोदयादिना संभवन्ति, तत्र प्रस्तुतरीत्या मनः सम्प्रधारयन्जीवो धर्मस्याराधको भवतीति । अत्र च गणधराणां तत्कालीनमुनीनां च जिन एव गुरुः इति तेषां जिनपारतन्त्र्यं एव गुरुपारतन्त्र्यम् । जिनपारतन्त्र्यं नाम जिनकथितवचनेषु निर्विकल्पं श्रद्धानं स्वीकरणं च । ततश्च तेषां गुरुपारतन्त्र्येण मनोविभ्रमाणामपनयनं, ततश्च दिङ्मोहविघ्नजयस्ततश्च मोक्षमार्गे अनवरतं प्रयाणमिति । जिनाभावे तु "तदेव निःशङ्कं सत्यं, यद् गीतार्थसंविग्नैर्निगदितम्" इत्येवं मनः सम्प्रधारयन्तो जीवाः तादृशगुरुपारतन्त्र्येण मनोविभ्रमानपनीय दिङ्मोहविघ्नविजयवन्तो भवन्तीति ।

इत्थं च मिथ्यात्वोदयजन्यानां ज्ञानावरणाद्युदयजन्यानां वा मनोविभ्रमाणां शङ्काविपरीतश्रद्धाप्रभृतिरुपाणां

जयस्यैको हेतुर्गुरुपारतन्त्र्यं इति सिद्धम् । एतच्चाचाराङ्गभगवत्यादिसूत्रानुसारेण युक्तमेव । यतस्तत्र तादृशविभ्रमसद्भावे प्रस्तुतरीत्या तदपाकरणेन जिनाज्ञाराधकत्वं प्रतिपादितम् ।

केचित्तु गीतार्थादयः स्वयमेव मिथ्यात्वादीनां प्रतिपक्षभूतानि सम्यक्त्वादीनि भावयित्वा तद्द्वारा मनोविभ्रमानपनीय मोक्षमार्गाराधका भवन्तीति मिथ्यात्वादिप्रतिपक्षभावना प्रस्तुतविघ्नजयस्य द्वितीयो हेतुरिति सिद्धम् ।

उत्तमः = प्रथमद्वितीयापेक्षया महानित्यर्थः ।

---

**यशो.: एते च त्रयोऽपि विघ्नजया आशयरुपाः समुदिताः प्रवृत्तिहेतवोऽन्यतर-वैकल्येऽपि तदसिद्धेरित्यवसेयम् ।**

---

चन्द्र.: त्रयेऽपि = न तु केवलमेको द्वौ वा इत्यपिशब्दार्थः । समुदिताः = सह संस्थिताः प्रवृत्तिहेतवः = प्रवृत्तिनामको यो द्वितीयाशयस्तस्य हेतव इति ।

तथा च कस्यचिद् प्रथमविघ्नजये सत्यपि यदि द्वितीयो तृतीयो वा न स्यात्, तर्हि तस्य प्रवृत्त्याशयो न स्यात्, कारणाभावात् ।

एवं कस्यचित् उत्तमे विघ्नजये सत्यपि यदि द्वितीयः प्रथमो वा विघ्नजयो न स्यात्, तर्हि तस्यापि प्रवृत्त्याशयो न स्यात्, कारणाभावात् ।

ननु उत्तमे विघ्नजये सत्यपि प्रवृत्तिर्न स्यादित्येतदाश्चर्यमिति चेत्, न, विचित्रा हि जीवानां परिणामाः, अत एव केचित् जमालिप्रभृतयः परिषहादिविजेतारोऽपि उत्तमविघ्नजयाभावात् भ्रष्टाः, केचित्तु मरीचिप्रभृतयः उत्तमविघ्नविजेतारोऽपि प्रथमादिविघ्नजयाभावाद् भ्रष्टाः, न खलु मोहादिकर्मणां एक एव नर्त्तनप्रकार इति ।

ननु भवद्भिः प्रागेव प्रतिपादितम् यदुत "एते आशयाः क्रमशो भवन्ति" इति । ततश्च प्रथमं प्रणिधानं, तत्पश्चात्प्रवृत्तिः, तत्पश्चाच्च विघ्नजयः स्यात् । अधुना तु भवद्भिरुच्यते यदुत "विघ्नजयाः प्रवृत्तिहेतवः" इति । तदेतद् कथं घटते ? यदि हि विघ्नजयाः प्रवृत्तेः कारणानि, तर्हि प्रथमं विघ्नजयाः स्युः, तत्पश्चात्प्रवृत्तिः स्यात्;, कार्यस्य कारणानन्तरभावित्वात्, न तु प्रथमं प्रवृत्तिः, पश्चाच्च विघ्नजयः, कारणात् प्राक् कार्यस्यासम्भवात् इति चेत्,

न, प्रवृत्तिः द्विविधा सामान्या विशिष्टा च । तत्र सामान्या प्रवृत्तिः प्रणिधानानन्तरं भवति, सा च विघ्नजयं विनैव भवति । विशिष्टा प्रवृत्तिः विघ्नजयजन्येति विघ्नजयेभ्यः पश्चाद् भवतीति । इत्थं च विघ्नजयाः न सामान्यप्रवृत्तिं प्रति कारणानि, किन्तु विशिष्टप्रवृत्तिं प्रतीति सामान्यप्रवृत्तेः विघ्नजयप्राग्भावित्वेऽपि न क्षतिः ।

युक्तञ्चैतत् । यदि हि प्रथमं प्रणिधानं, द्वितीया विघ्नजयाः, तृतीया प्रवृत्तिरित्येवं क्रम इष्येत, तर्हि महत्यापत्तिः, तथाहि यदि हि विघ्नजयाद् अर्वाक् प्रवृत्तिरेव न स्यात्, तर्हि विघ्नाः कस्य प्रतिबन्धकाः स्युः,

प्रतिबध्यस्यैवाभावात् । न हि विघ्नाः प्रणिधानप्रतिबन्धकाः, यदि हि विघ्नाः प्रणिधानप्रतिबन्धकाः स्युः, तर्हि विघ्नजये सति प्रणिधानोत्पत्तिः स्यात्, न तु प्रवृत्तेः । प्रतिबन्धकविगमस्य प्रतिबध्यजनकत्वात् । तस्मादवश्यं मन्तव्यं यदुत विघ्नेभ्योऽर्वाक् सामान्या प्रवृत्तिरस्त्येव, सा च विशिष्टा भवन्ती विघ्नैः प्रतिबध्यते, तेषां विघ्नानां जयाश्च विशिष्टां प्रवृत्तिं जनयन्तीत्येवं प्रथमं प्रणिधानं, द्वितीया प्रवृत्तिः, तृतीया विघ्नजया इत्येव क्रमो युक्त इति युक्तमुत्पश्यामः ।

ननु का नाम सामान्या प्रवृत्तिः, का च विशिष्टा प्रवृत्तिरिति चेत्, विघ्नपूर्वकालीना प्रवृत्तिः सामान्या प्रवृत्तिः, विघ्नकालीना विघ्नोत्तरकालीना च प्रवृत्तिर्विशिष्टा इति सङ्क्षेपः ।

अत्र कुत्रचिद् विघ्नजयः इत्येकवचनान्तं कुत्रचिच्च 'विघ्नजयाः' इति बहुवचनान्तं पदमुपात्तम्, तत्तु विघ्नजयस्यैकरुपत्वात् विघ्नत्रैविध्येन च तस्य त्रिविधत्वादित्येवं विवक्षाद्वयमभिप्रेत्येत्यवगन्तव्यम्, न तु तत्र भ्रान्तिः कार्या इत्यलं प्रसङ्गेन ।

---

**यशो.: उक्तं च- "विघ्नजयस्त्रिविधः खलु, विज्ञेयो हीनमध्यमोत्कृष्टः ।**
**मार्ग इह कण्टकज्वरमोहजयसमः प्रवृत्तिफलः ॥" (षो०३-९) इति ॥**

---

चन्द्र.: वृतिकृदेव षोडशकगतां गाथां साक्षिपाठरुपतयाऽऽह विघ्नजयस्त्रिविध इत्यादि । प्रवृत्तिफलः = प्रवृत्तिः फलं यस्य स प्रवृत्तिफल, इति बहुव्रीहिसमासः कार्यः, न तु प्रवृत्तेः फलं इति प्रवृत्तिफलमित्येवं षष्ठीतत्पुरुषः, अन्यथा फलपदस्य नपुंसकलिङ्गत्वेन बहुव्रीहिं विनाऽत्र पुल्लिङ्गत्वं न स्यादिति ।

---

**यशो.: अतिचाररहिताऽधिकगुणे गुर्वादौ विनयवैयावृत्यबहुमानाद्यन्विता हीनगुणे निर्गुणे वा दयादानव्यसनपतितदुःखापहारादिगुणप्रधाना मध्यमगुणे चोपकारफलवत्यधिकृतधर्मस्थानस्याहिंसादेः प्राप्तिः सिद्धिः ।**

---

चन्द्र.: अधुना चतुर्थं सिद्धिनामकमाशयं प्रतिपादयति ग्रन्थकृत् अतिचाररहितेत्यादि । अयं भावः - अधिकृतधर्मस्थानस्याहिंसादेः प्राप्तिः सिद्धिः, अत्र केवला प्राप्तिरेव न सिद्धिः, किन्तु विशेषणचतुष्कान्विता प्राप्तिरेव सिद्धिः ।

तत्र अतिचाररहिता इति धर्मस्थानप्राप्तेः प्रथमं विशेषणम् । प्राक् धर्मस्थानप्राप्तिः सातिचाराऽपि स्यात्, सिद्धौ तु सा यथोत्सर्गापवादं निरतिचारा स्यात्, अर्थात् सा प्राप्तिः उत्सर्गमपवादं वाऽतिक्रम्य न प्रवर्तते इति ।

इदन्तु बोध्यम् उत्सर्गापवादौ प्रवृत्तिसम्बन्धिनौ, न तु परिणतेः । बाह्यप्रवृत्तौ शुभायामशुभायां वा परिणतौ समानायां न फलभेदः, किन्तु परिणतौ असमानायां बाह्यप्रवृत्तौ समानायामपि अवश्यं फलभेद इति सूक्ष्ममीक्षणीयम् ।

अधिकगुणे गुर्वादौ विनयवैयावृत्यबहुमानाद्यन्विता इति धर्मस्थानप्राप्तेः द्वितीयं विशेषणम् । तत्र प्रकृतधर्मस्थानापेक्षया येऽधिकगुणाः ते इह ग्राह्याः, न तु धर्मस्थानान्तरापेक्षया । यथा आचामाम्लादितपः कुर्वाणस्य साधोः अभक्तार्थादिकं तपः कुर्वाणाः स्वाध्यायादिधर्मस्थानान्तरापेक्षया हीनगुणा अपि तपोगुणापेक्षयाऽधिकगुणा एव । एवं अल्पं स्वाध्यायं कुर्वाणस्य अधिकस्वाध्यायं कुर्वाणास्तपोगुणापेक्षया हीनगुणा अपि स्वाध्यायगुणापेक्षयाऽधिकगुणा इति ।

इत्थं चात्र"अधिकदीक्षापर्याया गुर्वादय अधिकगुणा एव, हीनपर्यायाश्च हीनगुणा एव"इत्येवमादिक एकान्तो न कान्तः, गुर्वादीनामपि किञ्चिद्गुणापेक्षया शिष्यसकाशाद्धीनगुणत्वं, शिष्यस्य चाधिकगुणत्वमित्यादिकं सम्भवत्येव ।

यद्यपि परमार्थोऽयमेव, तथाऽपि व्यवहारोऽपि बलवानस्ति, ततः सामान्यतः शिष्यादीनामेव गुर्वादिषु अधिकगुणत्वबुद्ध्या विनयवैयावृत्यादिकरणं युक्तं, न तु गुर्वादीनां शिष्यादिषु अधिकगुणत्वबुद्ध्या तत्करणम् इति । विशेषतस्तु यथाशास्त्रं गीतार्थसकाशादवसेयमिति ।

'हीनगुणे निर्गुणे वा दयादानव्यसनपतितदुःखापहारादिगुणप्रधाना' इति अधिकृतो योऽहिंसादिरुपो गुणः, तदपेक्षया योऽल्पाहिंसादिगुणवान् स हीनगुणः, सर्वथाऽहिंसादि-गुणाभाववांस्तु निर्गुणः, ततश्च हीनगुणे निर्गुणे वा या दया = करुणा, दानं = यथासम्भवमन्नादिप्रदानं, यदि वा प्रकृतधर्मस्थानस्यैवानुकूला या कारणसामग्री, तद्दानमत्र ग्राह्यम् । व्यसनपतितदुःखापहारः = व्यसने = आपदि पतितानां यो दुःखस्यापहारः, तदादिगुणप्रधाना ।

यद्यपि "प्रणिधानात्मके प्रथमाशये हीनगुणे द्वेषाभावः कृपा च आसीदेव, ततश्च सिद्धौ किमधिकं ? यत्प्रागासीत्, तदेवात्र पुनरुक्तं" इति भवति कस्यचिदाशङ्का, तथाऽपि सा न युक्ता । यतो हि सिद्ध्यभावदशायां हीनगुणे कृपा सुकरा, न तु सिद्धौ सत्यां, उच्चस्थानवर्तित्वेन मानकषायसम्भवात्, तेन च हीनगुणे तिरस्कारादिसम्भवेन प्राग्भाविकृपादिगुणविनाशसम्भवात् । दृश्यते हि लोकेऽपि निर्धनतादशायां प्राचीननिर्धनमित्रेषु करुणां बिभ्राणः पुरुषः धनवत्तादशायां सत्यां करुणां परित्यज्य तिरस्कारं कुर्वन्निति तात्त्विकसिद्धौ पुनः निर्गुणे हीनगुणे च करुणागुणास्तित्वग्रहणं युक्तमेव । किञ्च प्रणिधाने केवलं करुणापरत्वं प्रतिपादितम्, न तु दानव्यसनपतितदुःखापहारत्वादिकम्, तदानीं तत्करणे तस्यासमर्थत्वात्, स्वस्यैव सिद्ध्यभावेन तादृशसामर्थ्याभावात्, प्रणिधानमात्रेण तत्करणस्य प्रायोऽसम्भवात् । नहि धनवत्ताप्रणिधानवान् निर्धनः निर्धनान्तरे कृपां धारयन्नपि तं धनवन्तं कर्तुं अर्हति, स्वस्य धनवत्ताप्रणिधानमात्रवत्त्वात् । सिद्धौ सत्यां तु तत्सामर्थ्यं भवतीति सिद्धौ दानादिगुणाधिकत्वमस्त्येव । दृश्यते हि पुरुषार्थादिना धनवत्तां प्राप्तः सत्यसुहृद् निर्धनं मित्रं धनवन्तं कुर्वन्निति तात्त्विकसिद्धौ इदं तृतीयविशेषणमपि सार्थकमेव ।

यथा हि लोकोऽपि पुरुषार्थादिना धनवत्ताप्राप्तावपि तद्धनं प्राचीनमित्रस्वजनादिषु सम्यगयोजयतो धनवतो धनवत्तां निन्दत्येव, तां धनवत्तां निर्धनतासकाशादपि जघन्यतमां च मन्यते । तथैव जिनशासने सैव

धर्मस्थानाप्तिः सिद्धिर्भण्यते, यस्यां सत्यां निर्गुणे हीनगुणे च न केवलं कृपैव किन्तु यथासम्भवं दानदुःखापहारादयोऽपि स्युरिति ।

किञ्च प्रणिधानदशायां कृपापरिणामश्चञ्चलः अत एव मन्दः, सिद्धिदशायां तु स स्थिर अत एव तीव्रः सन् यथासम्भवं दुःखापहारादिकं जनयत्येवेति मन्तव्यम् ।

किञ्च प्रणिधानदशायां प्रकृतधर्मस्थानाकर्तार एव हीनगुणाः, सिद्धिदशायान्तु प्रकृतधर्मस्थानकर्तारोऽपि अविधिना कुर्वन्तो हीनगुणाः इति हीनगुणभेदादुभयत्र हीनगुणद्वेषाभावग्रहणं न्याय्यमित्यादिकं अन्यदपि यथाशास्त्रं समाधानं समवसेयमिति ।

मध्यमगुणे चोपकारफलवती इति इदं धर्मस्थानप्राप्तेश्चतुर्थं विशेषणम् । स्वापेक्षया येऽन्ये अपि अधिकृतधर्मस्थानसिद्धिमन्तः, ते मध्यमगुणा उच्यन्ते । तेषु उपकारफलवती धर्मस्थान- प्राप्तिरेव तात्त्विकी सिद्धिरिति ।

अयमाशयः, समानधर्मस्थानवत्सु यदि मत्सरः स्यात्, तर्हि तद्धर्मस्थानाचरणे परस्परं साहाय्यकरणं न स्यात्, मात्सर्येण प्रतिबन्धात् । प्रत्युत "कथमपि अयं मत्समधर्मस्थानवान् मम सकाशाद्धीनधर्मस्थानवान् भवतु" इत्येवाशुभविकल्पः प्रयत्नश्च स्यात् । यद्येवं भवेत्, तर्हि सा धर्मस्थानप्राप्तिस्तात्त्विकी नास्त्येवेति मन्तव्यम् । अर्थात् सा सिद्धिनामक आशयो न कथयितुं शक्यते ।

यस्यां तु धर्मस्थानप्राप्तौ समधर्मस्थानवन्तं प्रति प्रमोदः, धर्मस्थानाचरणे साहाय्यकरणोल्लासादिकं च स्यात् सा प्राप्तिः मध्यमगुणे उपकारात्मकं फलं धारयन्ती सिद्धिनामक आशय उच्यते ।

---

**यशो.: उक्तं च - "सिद्धिस्तत्तद्धर्मस्थानावाप्तिरिह तात्त्विकी ज्ञेया ।**
**अधिके विनयादियुता, हीने च दयादिगुणसारा ॥" (षो०३-१०) इति ॥**

---

चन्द्र.: वृत्तिकृदेवात्रार्थे षोडशकगतां गाथां साक्षिपाठत्वेनोपदर्शयन्नाह सिद्धि इत्यादि । स्पष्टम् । नवरमत्र मध्यमगुणे उपकारफलवत्त्वविशेषणं न गृहीतं, तत्तु च शब्दाद् ग्राह्यम् ।

ननु अतिचाररहितत्वविशेषणमपि न दृश्यते इति चेत्, सत्यं, 'तात्त्विकी' इति पदस्य तद्विशेषणप्रतिपादकत्वान्न दोष इति सङ्क्षेपः ।

---

**यशो.: स्वप्राप्तधर्मस्थानस्य यथोपायं परस्मिन्नपि संपादकत्वं विनियोगः, अयं चानेक जन्मान्तरसन्तानक्रमेण प्रकृष्टधर्मस्थानावाप्तेरवन्ध्यो हेतुः ।**

---

चन्द्र.: अधुना पञ्चमं विनियोगाशयं प्रदर्शयन्नाह स्वप्राप्त इत्यादि । गीतार्थप्रभावका धर्मदेशनादिनोपायेन परान् स्वप्राप्तधर्मानुष्ठानानि प्रापयन्ति, सामान्यसाधवस्तु विशुद्धाचारपरिपालनादिना उपायेन परान्

स्वप्राप्तधर्मानुष्ठानानि प्रापयन्ति । एवमुपायानुसरणेनैव विनियोगः श्रेयान् । उपायोल्लङ्घनेन विनियोगकरणपुरुषार्थस्तु न शास्त्रानुसारी न वा तात्त्विकविनियोगसम्पादक इति बोध्यम् । न हि अगीतार्थस्य देशनाद्युपायेन विनियोगकरणं युक्तमित्येवमन्यदपि बोध्यम् ।

किञ्च परेषु धर्मस्थानप्राप्तिः स्वसदृश्येव भवतीति न नियमः, परेषां योग्यतानुसारेण हीनाधिकधर्मस्थानप्राप्तेरपि सम्भवात्, अकेवलिगुरूपदेशेन श्रोतुः केवलज्ञानं किं न समुत्पद्यते ? तत्र गुरोः सकाशात् श्रोतुः अधिकधर्मस्थानाप्तिर्भवत्येव, तत्र गुरोर्विनियोगाशय एव कारणम् ।

न केवलमेतावदेव, किन्तु गुरोः सर्वथा विनियोगाशयाभावेऽपि शिष्यस्य तन्निमित्ततामासाद्य फलप्राप्तिः संभवति, यथाऽभव्यगुरोः सकाशात्तच्छिष्यस्येति ।

इदमपि अत्र बोध्यम् ! उपायाभावे बाह्यतः विनियोगादर्शनेऽपि अन्तः विनियोगः सम्भवत्यपि, तस्य क्षयोपशमविशेषरुपत्वात्, क्षयोपशमविशेषस्य चात्मनिष्ठत्वात् । इत्थं च कश्चित् मूकपङ्गुकुब्जः बाह्यतो विनियोगाद्यभावेऽपि अन्तर्विद्यमानविनियोगप्रभावात् उत्कृष्टं धर्मस्थानं प्राप्नोत्यपि, तत्र न कश्चिद् दोषः । अतिगहनमिदं तत्त्वं सूक्ष्मधिया विभावनीयम् ।

<u>अयं च</u> = विनियोगाशयश्च <u>अनेकजन्मान्तरसन्तानक्रमेण</u> इत्यादि ।

अयं भावः जघन्यधर्मानुष्ठानसिद्धेरनन्तरं जघन्यधर्मानुष्ठानस्य विनियोगाशयं प्राप्नुवन् जीवः तत्प्रभावात् विशिष्टं पुण्यकर्म बद्ध्वा जन्मान्तरे मध्यमं धर्मानुष्ठानं प्राप्नोति, तत्र च मध्यमधर्मानुष्ठानसिद्धेरनन्तरं तद्विनियोगाशयं प्राप्नुवन् जीवः विशिष्टतरं पुण्यं बद्ध्वा पुनरपि जन्मान्तरे मध्यमतरं धर्मानुष्ठानं प्राप्नोतीत्येवंरुपेणानेकजन्मान्तरसन्तानक्रमेण स जीवः प्रकृष्टं अहिंसादि धर्मस्थानं प्राप्नोति, तस्य च <u>अवन्ध्यो</u> = सफलो, न कदाचिन्निष्फल इति यावत्, <u>हेतुः</u> कारणं विनियोगाशय एव ।

ननु कस्यचिज्जीवस्य विनियोगः तेनैव भवेन प्रकृष्टधर्मस्थानावाप्तेरवन्ध्यो हेतुः भवति, न तु अनेकजन्मान्तरसन्तानक्रमेण, तत्र किं वक्तव्यम् ? इति चेत्, अत्र अनेकजन्मान्तरसन्तानक्रम उत्कृष्टापेक्षयैव दृष्टव्यः, अन्यथा तु तेनैव भवेन प्रकृष्टधर्मस्थानप्राप्तिरपि उचितैवेति न विरोधः ।

---

**<u>यशो.:</u> उक्तं च "सिद्धेश्चोत्तरकार्यं, विनियोगोऽवन्ध्यमेतदेतस्मिन् । सत्यन्वयसंपत्त्या, सुन्दरमिति तत्परं यावत् ।।" (षो०३-११) <u>'अवन्ध्यं'</u> न कदाचिन्निष्फलं <u>'एतत्'</u> धर्मस्थानमहिंसादि, <u>'एतस्मिन्'</u> विनियोगे सति <u>'अन्वयसंपत्त्या'</u> अविच्छेदभावेन <u>'तत्'</u> विनियोगसाध्यं धर्मस्थानं सुन्दरम् <u>'इतिः'</u> भिन्नक्रमः समाप्त्यर्थश्च, यावत्परमित्येवं योगः, यावत् <u>'परं'</u> प्रकृष्टं धर्मस्थानं समाप्यत इत्यर्थः ॥**

---

चन्द्र.: अत्रार्थे वृत्तिकृदेव षोडशकगतां गाथां साक्षिपाठतयाऽऽह - उक्तञ्चेत्यादि ।

वृत्तिकृदेव गाथायाः अर्थमाह अवन्ध्यं इत्यादि ।

स्पष्टार्थस्त्वयम् - सिद्धेश्चोत्तरकार्यं = सिद्धेः पश्चात्कालभावि कार्यं विनियोगः अस्ति, एतस्मिन् = विनियोगे सति एतद् = विनियोगप्राक्कालप्राप्तं धर्मानुष्ठानं । अन्वयसंपत्त्या = विनियोगपश्चात्काले अनेकजन्मान्तरसन्तानक्रमेण मध्यमप्रकृष्टादिधर्मस्थानप्राप्तिसद्भावात् अवन्ध्यम् = सफलम् ।

तत् = विनियोगसाध्यं धर्मानुष्ठानं यावत्परमिति = यावत् उत्कृष्टधर्मस्थानस्य प्राप्तिः भवति, तावत् सुन्दरं = शोभनम् ।

अत्र गाथागतं 'इति' पदं 'प्राप्तिः' इत्यर्थकम्, तथा 'यावत्' इतिपदानन्तरं योज्यम् । जघन्यधर्मानुष्ठानोत्तमधर्मानुष्ठानान्तराले मध्यमादिरुपमनुष्ठानं सर्वं शोभनमेव भवतीति ।

---

**यशो.: इदमत्र हृदयम् धर्मस्तावद्रागादिमलविगमेन पुष्टिशुद्धिमच्चित्तमेव । पुष्टिश्च पुण्योपचयः, शुद्धिश्च घातिकर्मणां पापानां क्षये या काचिन्निर्मलता, तदुभयं च प्रणिधानादिलक्षणेन भावेनानुबन्धवद्भवति, तदनुबन्धाच्च शुद्धिप्रकर्षः सम्भवति, निरनुबन्धं च तदशुद्धिफलमेवेति न तद्धर्मलक्षणम्, ततो युक्तमुक्तम् "प्रणिधानादिभावेन परिशुद्धः सर्वोऽपि धर्मव्यापारः सानुबन्धत्वाद् योगः" इति ।**

---

चन्द्र.: एवं तावत् आशयपञ्चकं निरूप्याधुना वृत्तिकृत् योगविंशिकाप्रथमकारिकायाः सारमाह इदमत्र हृदयं इत्यादि । हृदयं = रहस्यं ।

ननु "पुष्टिशुद्धिमच्चित्तमेव धर्मः" इति ज्ञातं, "तत्कारणं तु रागादिमलविगम" इत्यपि ज्ञातम् । परन्तु पुष्टिर्नाम किं तत्त्वं ? शुद्धिर्नाम किं तत्त्वं ? इति चेत्, श्रुणु, पुष्टिश्च पुण्योपचयः = विशिष्टं पुण्यं इत्यर्थः । अत्र 'पुण्यचय' इति नोक्तं, किन्तु 'पुण्योपचय' इत्युक्तं, ततश्च 'विशिष्टं पुण्यं' गृह्यते । या काचिन्निर्मलता इति ।

इदन्तु बोध्यम् । अभव्यादीनामपि घातिकर्मणां महती स्थितिः ग्रन्थिसमीपावस्थान-कालेऽन्तःकोटाकोटिसागरोपमप्रमाणा जघन्या भवति, परन्तु तज्जन्या निर्मलता न मोक्षमार्गानुसारिणी । न केवलमेतावदेव, निगोदे गतानां तु जीवानां सागरोपममात्रा जघन्या स्थितिरपि सम्भवति, तथाऽपि न सा मोक्षानुकूला । तस्मात् स्थितिहानिमात्रजन्या निर्मलता नाऽत्रानुसन्धेया, किन्तु अपुनर्बन्धकावस्थाभाविनी या निर्मलता सा जघन्या शुद्धिः, तत्कालभाव्येव च विशिष्टं पुण्यं जघन्या पुष्टिः, एतदुभयसमन्वित-श्चापुनर्बन्धकस्याध्यवसायश्चित्तात्मकः जघन्यो धर्मः । इत्थं च धर्मस्यारम्भोऽपुनर्बन्धकादारभ्येति स्थितम् । उक्तं च यशोविजयैर्गुर्जरभाषानिबद्धस्तवने → અપુનર્બંધકથી માંડીને જાવ ચરમગુણઠાણ. ભાવ અપેક્ષાએ જિન

આણા, માર૨૭ ભાખે જાણ – ← इति । एवमध्यात्मसारेऽपि → अपुनर्बन्धकाद्यावद् गुणस्थानं चतुर्दशम् । क्रमशुद्धिमती तावत्क्रियाऽध्यात्ममयी मता । ← इति ।

तदुभयञ्च = तयोः = पुष्टिशुद्ध्योः उभयं तदुभयं । प्रणिधानादि इत्यादि । तथा च यद्यपि तदुभयं प्रणिधानादिकं विना उत्पद्यते नाम, तथाऽपि तदुभययोरनुबन्धस्तु प्रणिधानादिलक्षणेन भावेनैव भवति । यदि हि स भावो न स्यात्, तर्हि उत्पन्नमपि तत् अनुबन्धवन्न भवेत् । यथा गोशालकस्य सम्यग्दर्शनप्राप्तौ तदुभयमुत्पन्नमेव, तथाऽपि पश्चात् निकाचितकर्मादिकारणवशात् प्रणिधानाद्यभावेन, तदुभयमनुबन्धवन्न अभवत्, अत एव तस्यानन्तसंसारोऽभूत् । गुणसेनादीनां तु उत्पन्नं तदुभयं प्रणिधानादिभावेनानुबन्धवदभूदेवेति प्रसिद्धमेवेति ।

तदनुबन्धाच्च = पुष्टिशुद्ध्युभयानुबन्धाच्च शुद्धिप्रकर्षः सम्भवति । शुद्धिप्रकर्षो नाम सर्वेषां घातिकर्मणां सर्वथा क्षये सति या सम्पूर्णा निर्मलता जायते, सा ।

नन्वत्र तदुभयानुबन्धात् तदुभयप्रकर्ष एव प्रतिपादयितुं युक्तः, न तु केवलं शुद्धिप्रकर्षः । यतो हि यथा शुद्ध्यनुबन्धाच्छुद्धिप्रकर्षः, तथैव पुष्ट्यनुबन्धात्पुष्टिप्रकर्षोऽपि स्यादेव, स चात्र किमर्थं न प्रतिपादित इति चेत्, श्रुणु, शुद्ध्यनुबन्धाच्छुद्धिप्रकर्षः सर्वेषां भवति, सदृशश्च भवति । न हि तीर्थकरगणधरादीनां शुद्धिप्रकर्षे कश्चिदपि भेदोऽस्ति । किन्तु पुष्टिप्रकर्षः केषाञ्चिदेव भवति । तथाहि उत्कृष्टरसबन्धयुतं जिननामकर्म हि पुष्टिप्रकर्षो यदि गीयते, तर्हि तत्तीर्थकृतामपि केषाञ्चिदेव, तीर्थकृद्भिन्नानां तु सर्वथा नास्त्येव, जिननामस्यैवाभावात् । तस्मात् पुष्ट्यनुबन्धात्पुष्टिप्रकर्षो न वक्तुं युज्यत इति नात्र स उक्त इति ।

किञ्च शुद्धिप्रकर्षः शाश्वतः, पुष्टिप्रकर्षश्च न तथा इति न तद्ग्रहणं कृतम् ।

किञ्च मोक्षार्थं शुद्धिप्रकर्ष आवश्यकः, पुष्टिप्रकर्षस्तु न केवलमनावश्यक एव, किन्तु सतोऽपि तस्य विनाश एवावश्यकः, तं विना मोक्षाभावादिति । केवलं शुद्धिप्रकर्षसाधकसामग्रीप्राप्त्यर्थं पुण्यप्रकर्षस्यावश्यकत्वमिति ।

ननु 'तदनुबन्धाच्च शुद्धिप्रकर्षो भवति' इत्यत्र "तदनुबन्धाच्च = तदुभयानुबन्धाच्च" इत्येवार्थो लभ्यते । स च न युक्तः, यतो हि शुद्धिप्रकर्षः केवलं शुद्ध्यनुबन्धादेव भवेत्, पुष्ट्यनुबन्धाच्छुद्धिप्रकर्षः कथं स्यात् ? शुद्धिप्रकर्षस्य पुष्ट्यनुबन्धेन सह सम्बन्धाभावादिति चेन्न, यथा शुद्ध्यनुबन्धः शुद्धिप्रकर्षस्योपादानकारणं, तथा पुष्ट्यनुबन्धः शुद्धिप्रकर्षस्य निमित्तकारणम्, पुष्ट्यनुबन्धस्य शुद्धिप्रकर्षकारणीभूतप्रथम-संहननादिसामग्रीप्रापकत्वात् ।

ननु तदुभयं यदि, कदाचित् कुत्रचित्प्रणिधानादिभावेनऽनुबन्धवन्न स्यात्, तर्हि किं स्यादिति चेत् निरनुबन्धञ्च तत् = पुष्टिशुद्ध्युभयं अशुद्धिफलमेव = अशुद्धिरेव फलं यस्य तत्, तादृशमेव । न तु मनाक् शुद्धिफलकमपि इत्येवकारार्थः ।

यद्यपि तदुभयं न अशुद्धिं जनयति, तथाऽपि प्रणिधानाद्यभावेन तदुभयानुबन्धाभावेऽवश्यमशुद्धिरुत्पद्यत एव गोशालकादीनामिवेति तदुभयं उपचारात् निरनुबन्धं अशुद्धिफलकं गीयते । इति = एतस्मात्कारणात् न धर्मलक्षणं = न निरनुबन्धं तदुभयं 'धर्म' इति परमार्थतो वक्तुं युक्तमिति भावः ।

तथा च यद्यपि पूर्वं 'पुष्टिशुद्धिमच्चित्तमेव धर्म' इत्युक्तं, किन्तु निरनुबन्धस्य तस्य धर्मलक्षणत्वाभावात् 'सानुबन्धपुष्टिशुद्धिमच्चित्तं धर्मः' इति तात्त्विकं धर्मलक्षणमित्यवगन्तव्यम् । अत्र बहु वक्तव्यं, तत्तु विस्तरभिया नोच्यते ।

ततो = सानुबन्धतदुभयस्य धर्मलक्षणत्वात् युक्तमुक्तं श्रीहरिभद्रसूरिणेति शेषः । प्रणिधानादिभावेन परिशुद्धः इत्यादि सुगमम् ।

ननु गोशालकादीनां मरणकालीनः पश्चात्तापादिरुपः धर्मव्यापारो न प्रणिधानादियुक्तः, अत एव न परिशुद्धः, ततश्च किं स योगो न भण्यते ? परिशुद्धस्यैव धर्मव्यापारस्य योगत्वप्रतिपादनात् इति चेत्, यद्यपि स धर्मव्यापारः मोक्षेण सह परम्परयाऽपि योजनाद् योग एव, तथाऽपि अत्र योगस्य विशिष्टमेव लक्षणं प्रतिपादितम्, तस्मात् तदनुसारेण प्रणिधानादिरहितो धर्मव्यापारो योगो न स्यात्, अत्रापि बहु चिन्तनीयं, तत्तूपेक्ष्यत एव ।

---

**यशो.: यद्यप्येवं निश्चयतः परिशुद्धः सर्वोऽपि धर्मव्यापारो योगस्तथापि 'विशेषेण' तान्त्रिकसंकेतव्यवहारकृतेनासाधारण्येन स्थानादिगत एव धर्मव्यापारो योगः, स्थानाद्यन्यतम एव योगपदप्रवृत्तेः सम्मतत्वादिति भावः ॥१॥**

---

चन्द्र.: एवं निश्चयनयमतानुसारेण योगं निरुप्य व्यवहारनयमतानुसारेण तं निरुपयन्नाह तथाऽपि विशेषेण = तान्त्रिकेत्यादि तान्त्रिकाणां = शास्त्रकतृणां यः सङ्केतव्यवहारः 'अमुकं वस्तु अमुकेन पदेन वाच्यम्' इत्यादिरुपः, तत्कृतेन असाधारण्येन = इतरवस्तुभ्यः सकाशाद् वैशिष्ट्येन ।

अयं भावः, द्विविधो हि अर्थः व्युत्पत्त्यर्थो रुढ्यर्थश्च । तत्र शब्दस्य व्याकरणानुसारी अर्थो व्युत्पत्त्यर्थः । यथा "विशेषेण ईरयति कर्मपुद्गलानिति वीरः इति 'वीर' पदस्य व्युत्पत्त्यर्थः, अयं चार्थः सर्वेषु तीर्थकरेषु घटते, सर्वेषां तीर्थकृतां कर्मपुद्गलानां विशेषेणेरकत्वात् । एवमत्रापि 'मोक्षकारणीभूतात्मव्यापारत्वं योगत्वं' इति व्युत्पत्त्यर्थानुगृहीतलक्षणानुसारेण सर्वोऽपि परिशुद्धो धर्मव्यापारो योगः, सर्वस्य परिशुद्धधर्मव्यापारस्य मोक्षकारणीभूतात्मव्यापारत्वात् ।

परन्तु यथा इन्द्रैः 'वीर' इति सङ्केतव्यवहारः चरमतीर्थकृत्येव कृतः, ततश्च चरमतीर्थकृदेव वीरपदस्य रूढ्यर्थः, न तु ऋषभादयः । एवं तान्त्रिकैः 'योग' इति सङ्केतव्यवहारः स्थानादिष्वेव वक्ष्यमाणेषु कृतः, ततश्च वक्ष्यमाणानि स्थानादीन्येव योगपदस्य रूढ्यर्थः, न त्वालयविहारादयः, व्युत्पत्तेः सकाशाद् रूढेर्बलीयस्त्वमिति

न्यायस्य सर्वजनप्रसिद्धत्वात् ।

अत्र निश्चयनयानुसारेण योगपदं सर्वेषु परिशुद्धधर्मव्यापारेषु साधारणं अस्ति, किन्तु तान्त्रिकसङ्केतव्यवहारेण तु योगपदं इतरान् सर्वान् परिशुद्धधर्मव्यापारान् परिहृत्य स्थानादिष्वेव प्रयुज्यत इति कृत्वा स्थानादिषु तदसाधारणं भवति, अत एवात्र तान्त्रिकव्यवहारकृतेन असाधारण्येन इत्युक्तम् ।

तथा तान्त्रिका: = शास्त्रकारा इत्येकोऽर्थ: । एवं तन्त्रसम्बन्धी य: सङ्केतव्यवहार: स तान्त्रिक: सङ्केतव्यवहार इत्येवमप्यर्थो बोध्य: ।

स्थानादिगत एव = 'न त्वालयविहारादिगतोऽपि' इत्येवकारार्थ: ।

तत्र कारणमाह स्थानाद्यन्यतमे एव = स्थान उर्णे अर्थे आलम्बने निरालम्बने वा, न तु अन्यत्र योगपदप्रवृत्ते: = 'अयं योग:' इति व्यवहारस्य सम्मतत्वात् तान्त्रिकाणामिति शेष: ।

एवं प्रथमा कारिका व्याख्याता ।

---

**यशो.: स्थानादिगतो धर्मव्यापारो विशेषेण योग इत्युक्तम् तत्र के ते स्थानादय: ? कतिभेदं च तत्र योगत्वम् ? इत्याह –**

**ठाणुन्नत्थालंबण रहिओ तंतम्मि पंचहा ऐसो ।**
**दुगमित्थ कम्मजोगो, तहा तियं नाणजोगो उ ॥२॥**

---

चन्द्र.: अधुना द्वितीयकारिकाया: प्रस्तावनामारचयति वृत्तिकृद् स्थानादिगतो इत्यादि । तत्र = स्थानादिषु ।

द्वितीयकारिकाया अन्वयस्त्वेवम् → तन्त्रे एष: स्थानोर्णार्थालम्बनरहित: (इत्येवं) पञ्चधा भणित:, अत्र द्वयं कर्मयोग:, तथा त्रिकं ज्ञानयोगस्तु ← इति ।

---

**यशो.: 'ठाणुन्नत्थे'त्यादि । स्थीयतेऽनेनेति स्थानं आसनविशेषरूपं कायोत्सर्गपर्यङ्कबन्धपद्मासनादि सकलशास्त्रप्रसिद्धम्, उर्ण:-शब्द: स च क्रियादावुच्चार्यमाणसूत्रवर्णलक्षण:, अर्थ:- शब्दाभिधेयव्यवसाय:, आलम्बनं-बाह्यप्रतिमादिविषयध्यानम्, एते चत्वारो भेदा:, 'रहित:' रूपिद्रव्यालम्बनरहितो निर्विकल्पचिन्मात्रसमाधिरुप इत्येवं एष: योग: पञ्चविध: 'तन्त्रे' योगप्रधानशास्त्रे, प्रतिपादित इति शेष:,**

---

चन्द्र.: कायोत्सर्गेत्यादि । एतेषां स्वरुपं तु योगशास्त्रचतुर्थप्रकाशपर्यन्तवर्तिगाथाभ्योऽवसेयम् । सकलशास्त्रप्रसिद्धम् = न केवलं जैनशास्त्रे, किन्तु जैनेतरशास्त्रेऽपि अर्थरूपतया प्रसिद्धमिति भाव: ।

उर्णः = शब्द इति । ननु कर्म एव योगः कर्मयोगः इत्येवंरीत्या क्रियात्मको योगः कर्मयोगतयाऽत्र अभिप्रेतः । शब्दश्च न क्रिया, किन्तु पुद्गलवस्तु, ततश्च शब्दः कथं कर्मयोगः स्यादित्याशङ्कायामाह स च = शब्दश्च क्रियादौ = प्रतिक्रमणादौ उच्चार्यमाणसूत्रवर्णलक्षणः = उच्चार्यमाणानि यानि शक्रस्तवादिसूत्राणि, तदक्षरस्वरुपः । तथा च वचनक्रियाविशिष्ट एव शब्दः कर्मयोगः, न तु पुस्तकादौ लिखितः, ततश्च 'वचनक्रिया कर्मरुपा' इति तद्विशिष्टः शब्दोऽपि उपचारात्कर्मरुप इति कृत्वा स 'कर्मयोगः' इति वक्तुं शक्यते इति ।

अत्र 'क्रियादौ' इति अत्र आदिशब्दात् सूत्रपाठादिकं ग्राह्यम् ।

अर्थः इति । ननु 'नमोऽत्थु णं अरिहंताणं' इत्यादौ नमस्कारः भवनक्रिया तीर्थकृदन्यो वा कोऽप्यर्थः न ज्ञानरुपः, ततश्च अर्थः कथं ज्ञानयोगः स्यात् ? ज्ञानमेव योगः ज्ञानयोग इति समासरीत्या ज्ञानरुपस्यैव वस्तुनः ज्ञानयोगत्वादिति शङ्कायां अर्थपदस्य भावार्थमाह शब्दाभिधेयव्यवसायः इति । शब्देन अभिधातुं यो योग्यः, स अर्थः शब्दाभिधेयः कथ्यते, पदार्थ इति भावः । यथा नमस्कारः नमःशब्दाभिधेयः, भवनक्रिया 'अस्तु'शब्दाभिधेयः इत्यादि । तस्य व्यवसायो नाम तद्विषयकं ज्ञानं, तदेव अर्थात्मकः तृतीयो योगः । ततश्च शब्दाभिधेयव्यवसायस्य ज्ञानरुपत्वात् तादृशज्ञानरुपस्यार्थस्य ज्ञानयोगत्वकथनं युक्तमेवेति ।

अधुना चतुर्थं योगमाह आलम्बनं इति । ननु आलम्बनं नाम प्रतिमादिकं वस्तु, तच्च न ज्ञानं, ततश्च कथमालम्बनं ज्ञानयोगः ? इत्याशङ्कायामाह बाह्यप्रतिमादिविषयध्यानम् इति । तथा च न प्रतिमादिकं वस्तु अत्रालम्बनं, किन्तु प्रतिमादिवस्तुसम्बन्धि ध्यानमेवात्रालम्बनपदेन वाच्यम् । तच्च ध्यानमात्मगुणरुपं ज्ञानमेव, यतो हि एकाग्रतापन्नं ज्ञानमेव ध्यानम् । ततश्च तादृशमालम्बनं 'ज्ञानयोग' इति वक्तुं युक्तमेवेति ।

अधुना पञ्चमं योगमाह रहितः इति । ननु 'रहित' पदस्यार्थं न सम्यक् जानीमो वयं, केन रहित ? इति जिज्ञासा भवत्यस्माकमिति चेत्, सत्यं, अत एव वृत्तिकृत्स्पष्टार्थमाह रुपिद्रव्येत्यादि । तथा च जिनप्रतिमादिरुपं यद् रुपिद्रव्यात्मकमालम्बनं, तद्रहितः यः विकल्परहितः चिन्मात्रसमाधिः, स एव 'रहित'पदवाच्यो ज्ञानयोगः । अत्र चिन्मात्रे = ज्ञानमात्ररुपे आत्मन्येव यः समाधिः = लीनता स चिन्मात्रसमाधिः, स च ज्ञानरुप एवेति तस्य ज्ञानयोगत्वं युक्तम् । तथाऽनेनैतद् ज्ञायते यदुत अस्य समाधेरालम्बनं ज्ञानात्मक आत्माऽस्त्येव, परन्तु स अरुपी । ततश्चास्य समाधेः रुपिद्रव्यालम्बनेनैव रहितत्वम्, न तु अरुपिद्रव्यालम्बनेन रहितत्वम् । अत एव वृत्तिकृता 'रुपिद्रव्य' इत्यादि उक्तमिति ।

इदन्तु बोध्यम् । प्रथमं प्रतिमापुरःस्थितस्य प्रतिमालम्बनविषयकं ध्यानं प्रवर्तते, तदनु तत्रैव भावविशेषात् सत्यामपि प्रतिमायां तन्निरपेक्षस्य तस्य स्वाभ्यासानुसारेण निरालम्बनं ध्यानं प्रवर्तते, अभ्यासमन्दताकाले तन्निरालम्बनं ध्यानमल्पकालमेव तिष्ठति, पुनः प्रतिमालम्बनविषयकं तत्प्रवर्तते, तच्च प्रभूतकालं यावत्, पुनः तन्निरपेक्षस्य निरालम्बं, पुनः प्रतिमालम्बनविषयकं सालम्बनमित्येवंक्रमेण यथायथाऽभ्याससौष्ठवं जायते, तथा तथा निरालम्बनध्यानस्य कालः परिवर्द्धते, सालम्बनध्यानस्य कालो हीयते । ततश्चाभ्यासपराकाष्ठायां सत्यां

सालम्बनं सर्वथा विघटते, सततं निरालम्बमेव प्रवर्तते । तथा चोक्तमध्यात्मसारे यशोविजयवाचकैरेव → सालम्बनं क्षणमपि क्षणमपि कुर्यान्मनो निरालम्बम् । इत्यनुभवपरिपाकादाकालं स्यान्निरालम्बम् ← इत्यादि । अधिकन्तु तत्रैवानुभवाधिकारे दृश्यम् ।

प्रतिपादित इति शेषः = कारिकायां 'प्रतिपादित' इति पदं नोक्तं, तस्मात् तत् शेषरुपेण ग्राह्यमिति भावः ।

---

**यशो.: उक्तं च "स्थानोर्णार्थालम्बन-तदन्ययोगपरिभावनं सम्यक् । परतत्त्वयोजनमलं, योगाभ्यास इति समयविदः ॥" (षोड०१३-४) इति ।**

---

चन्द्र.: अत्रार्थे षोडशकगतां गाथां साक्षिपाठतया प्रदर्शयन्नाह स्थानेत्यादि । गाथासङ्क्षेपार्थस्त्वयम् → स्थानं च उर्णश्च अर्थश्च आलम्बनं च तदन्यश्च, इति स्थानोर्णार्थालम्बनतदन्याः, ते च अमी योगाश्च, तेषां परिभावनम् इति । सम्यक् एतत्परिभावनं अलं = समर्थं परतत्त्वयोजनम् = मोक्षयोजनकरं । एतच्च परिभावनं 'योगाभ्यास' इति समयविदः = शास्त्रविदो विदन्ति ।

अत्र तदन्यः तस्मात् आलम्बनादन्य तदन्यः = निरालम्बन इत्यर्थ इति अधिकम् ।

---

**यशो.: स्थानादिषु योगत्वं च "मोक्षकारणीभूतात्मव्यापारत्वं योगत्वम्" इति योगलक्षणयोगादनुपचरितमेव ।**

---

चन्द्र.: स्थानादिषु इत्यादि । अनुपचरितमेव = यथा घृतं आयुःकारणं इति कृत्वा 'घृतं आयुः' इत्युच्यते, परन्तु तत्कथनं कारणे कार्योपचारेण, ततश्च घृते आयुष्ट्वं उपचरितमेव । परन्तु घृते घृतत्वं तु अनुपचरितमेव, एवं घृते द्रव्यत्वादिकमपि अनुपचरितमेव, घृतस्य स्पष्टमेव द्रव्यत्वात्, तत्र केनापि प्रकारेणोपचाराकरणात् । एवं स्थानादीनि मोक्षकारणीभूतात्मव्यापाररुपाण्येवेति तेषु योगत्वमनुपचरितमेव, न तु केनाऽपि प्रकारेण उपचरितमिति ।

---

**यशो.: यत्तु "यमनियमप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि योगस्य" (पातं० सू० २-२९) इति योगाङ्गत्वेन योगरूपता स्थानादिषु हेतुफलभावेनोपचारादभिधीयत इति षोडशकवृतावुक्तं तत् "चित्तवृत्तिनिरोधो योगः" (पा०यो०द० १-२) इति योगलक्षणाभिप्रायेणेति ध्येयम् ॥**

---

चन्द्र.: ननु षोडशकवृत्तौ श्रीयशोभद्रसूरिणेत्थं उक्तं यदुत → यमनियमादयोऽष्टौ योगस्य अङ्गानि, तत्र आसनात्मकं योगाङ्गं स्थानं, धारणात्मकं योगाङ्गं अर्थः, ध्यानात्मकं योगाङ्गं आलम्बनं, समाध्यात्मकं योगाङ्गं

निरालम्बनमित्येवं स्थानादीनि यथासम्भवं तत्तद्योगरुपाण्येव सन्ति । ततश्च स्थानादीनि स्वयं न योगः, किन्तु योगस्याङ्गानि कारणानीति यावत् । कारणे च कार्योपचारः सम्भवतीति कृत्वा योगकारणेषु स्थानादिषु उपचारेण योगत्वं न तु अनुपचरितम् ← इति । एष षोडशकवृत्तिगतपाठस्य भावार्थः प्रदर्शितः ।

यशोविजयैस्तु स्थानादिषु योगत्वमनुपचरितमभिहितम् । ततश्च परस्परं विरोध इति चेत्, न, वृत्तिकृदेव सप्रश्नं समाधानमाह यत्तु इत्यादि । 'षोडशकवृत्तौ उक्तं' इत्येतावत्पर्यन्तः प्रश्नः तदनन्तरं तत् इत्यारभ्य ध्येयम् इत्येतावत्पर्यन्तं समाधानम् ।

समाधानभावार्थश्चायम् 'चित्तवृत्तिनिरोधो योगः' इति पतञ्जलिप्रणीतं योगलक्षणं, स्थानादीनि च न स्वयं चित्तवृत्तिनिरोधरुपाणि, किन्तु चित्तवृत्तिनिरोधकारणानि इति प्रस्तुतलक्षणानुसारेण तु स्थानादीनि कारणे कार्योपचारेणैव योगरुपाणि, ततश्च तेषु योगत्वं उपचरितमेव, नानुपचरितम् ।

अस्माभिस्तु नात्र पतञ्जलिप्रणीतं लक्षणं स्वीकृतम्, किन्तु मोक्षकारणी इत्यादिरुपम् । तदनुसारेण तु स्थानादिषु योगत्वं अनुपचरितमेवेत्येवं स्थानादिषु योगत्वस्य उपचरितत्वमनुपचरितत्वं च लक्षणद्वयाभिप्रायेणेति न कश्चिद् विरोध इति भावः ।

---

**यशो.: अत्र स्थानादिषु 'द्वयं' स्थानोर्णलक्षणं कर्मयोग एव, स्थानस्य साक्षादूर्णस्याप्युच्चार्यमाणस्यैव ग्रहणादुच्चारणांशे क्रियारूपत्वात् । तथा 'त्रयं' अर्थालम्बननिरालम्बनलक्षणं ज्ञानयोगः, 'तुः' एवकारार्थ इति ज्ञानयोग एव, अर्थादीनां साक्षाद् ज्ञानरूपत्वात् ॥२॥**

---

चन्द्र.: कर्मयोग एव = न तु ज्ञानयोगोऽपि इत्येवकारार्थः ।

उच्चार्यमाणस्यैव = न तु पुस्तकादिलिखितमात्रस्येत्येवकारार्थः ।

उच्चारणांशे = शब्दस्य स्वयं तु पुद्गलरुपत्वमेवेति स्वांशे तस्य क्रियारुपत्वं नास्त्येव, तस्मात् उच्चारणात्मकं यद् शब्दस्य विशेषणं, तदंशे शब्दस्य क्रियारुपत्वमभिहितम् ।

इति = यस्मात् 'तु' एवकारार्थः, तस्मात् ज्ञानयोग एव इत्येवमर्थो लभ्यते ।

व्याख्याता द्वितीयकारिका ।

अधुना तृतीयकारिकायाः प्रस्तावनामाह वृत्तिकृत् एष कर्मयोगो इत्यादि ।

---

**यशो.: एष कर्मयोगो ज्ञानयोगो वा कस्य भवतीति स्वामिचिन्तायामाह -**

**देस सव्वे य तहा, नियमेणेसो चरित्तिणो होइ ।**
**इयरस्स बीयमित्तं, इत्तुच्चिय केइ इच्छंति ॥३॥**

'देसे सव्वे य' त्ति । सप्तम्याः पञ्चम्यर्थत्वाद्देशतस्तथा सर्वतश्च चारित्रिण एव 'एषः' प्रागुक्तः स्थानादिरूपो योगः 'नियमेन' इतरव्यवच्छेदलक्षणेन निश्चयेन भवति, क्रियारूपस्य (ज्ञानरूपस्य) वाऽस्य चारित्रमोहनीयक्षयोपशमनान्तरीयकत्वात्, अत एवाध्यात्मादियोगप्रवृत्तिरपि चारित्रप्राप्तिमारभ्यैव ग्रन्थकृता योगबिन्दौ प्ररूपिता, तथाहि-'देशादिभेदतश्चित्रमिदं चोक्तं महात्मभिः । अत्र पूर्वोदितो योगोऽध्यात्मादिः संप्रवर्तते ॥३५७॥' इति । 'देशादिभेदतः' देश-सर्वविशेषाद् 'इदं' चारित्रं 'अध्यात्मादिः' अध्यात्मं १ भावना २ आध्यानं ३ समता ४ वृत्तिसंक्षयश्च ५

---

चन्द्र.: तृतीयकारिकाया अन्वयस्त्वेवम् → एष देशतश्चारित्रिण सर्वतश्च चारित्रिणो नियमेन भवति, अत एव इतरस्य बीजमात्रम् अस्ति । केचित् (तद् बीजमात्रं योगं) इच्छन्ति । ← इति ।

ननु कारिकायां 'देसे सव्वे य' इति सप्तमी विभक्तिरुपात्ता, अर्थस्तु पञ्चम्यनुसारेण क्रियते, तत्कथं घटेतेति शङ्कायामाह सप्तम्याः इत्यादि । चारित्रिण एव न तु देशविरतसर्वविरतभिन्नानां अविरतसम्यग्दृष्टिप्रभृतीनामित्येवकारार्थः ।

ननु कारिकायां एवकारो नास्ति, ततश्च वृत्तिकृता कथं स गृहीत इति चेत्, अग्रे स्फुटीभविष्यति, धीरो भव ।

नियमेन = इतरव्यवच्छेदलक्षणेन निश्चयेन अत्र द्वे मते स्तः, तत्र इतरेषां अपुनर्बन्धकाविरतसम्यग्दृष्टीनां व्यवच्छेदलक्षणेन निश्चयेन इति । चारित्रिण एव भवति, न तु अपुनर्बन्धकादीनामिति नियमपदस्यार्थः इति प्रथममताभिप्रायः ।

"इतरः = 'भवति वा न वा ?' इति विकल्पः निश्चयप्रतिपक्षः, तद्व्यवच्छेदलक्षणेन निश्चयेन" इति द्वितीयं मतम् । 'चारित्रिण एव भवत्येव' इत्यभिप्रायः । अत्र 'चारित्रिण एव भवति' इति एवकारस्तु वृत्तिकृता गृहीत एव, किन्तु 'चारित्रिणो भवत्येव, न तु भवत्यपि' इति द्वितीय एवकारस्तु नियमपदलभ्य इति ।

अत्र प्रथममताभिप्रायिणो वदन्ति → कारिकायां यत् नियमपदमुक्तं, तत् 'चारित्रिणो' इतिपदानन्तरं योज्यम् । वृत्तिकृता तु वृत्तौ तथैव योजितम्, पश्चाद् वृत्तौ 'नियमेन-इतरव्यवच्छेदलक्षणेन' इत्यादि यदुक्तम्, तत्तु द्विर्बद्धं सुबद्धं भवतीति न्यायेन युक्तमेव । तथा च "नियमेन चारित्रिण एव भवति" इत्येवमन्वयः, अत्र हि 'नियमेन' इति पदस्य 'एव' इतिपदस्य चार्थः समान एव, केवलं 'चारित्रिण एव योगो भवति' इति पदार्थदृढतार्थमेतदुक्तम् । ये तु 'चारित्रिण एव योगो भवत्येव' इत्येवं अर्थं कुर्वन्ति, तेषामभिप्रायो न सम्यक् प्रतिभाति यस्मात् मूलगाथायां एवकारप्रतिपादकं नियमपदं एकमेव, ततश्च तस्य स्थानद्वयेऽन्वयो न युक्तः । तथा वृत्तौ 'भवत्येव' इत्यर्थस्याप्रतिपादनात् एवकारद्वयग्रहणं अयुक्तमिति ।

यदि च 'चारित्रिणो योगो भवत्येव' इत्येवमर्थः क्रियेत, तर्हि महती आपत्तिः स्यात् । तथा हि – न हि साधवः सर्वदा स्थानादियोगवन्त एव, प्रमादाद्यवस्थायां तदभावात्, एवं न श्रावकाः सर्वदा स्थानादियोगवन्तः, पापव्यापारकाले स्थानादियोगानां सुतरामभावात् । ततश्च चारित्रिणो योगो भवत्येव इति वचनं न सत्यं, चारित्रिणो योगाभावस्याऽपि तत्तत्काले सम्भवात् ।

तस्मात् 'चारित्रिण एव योगो भवति' इत्येव मन्तव्यम्, न तु 'चारित्रिणो योगो भवत्येव' इत्यपि ← इति ।

द्वितीयमताभिप्रायिणस्तु वदन्ति → 'चारित्रिणो योगो भवत्येव' इति एवकारोऽपि युक्त एव । चारित्रिणः सर्वदा स्थानादियोगसद्भावात् । यच्च चारित्रिणः प्रमादाद्यवस्थायां पापव्यापारकाले वा स्थानाद्यभावो निगदितः प्रथममताभिप्रायिभिः, तत्र वयं पृच्छामः साधूनां प्रमादाद्यवस्थायां चारित्रं अस्ति न वा ? नास्तीति वक्तुं न शक्यते षष्ठगुणस्थाने प्रमादावस्थायां चारित्रसम्भवस्यानिवार्यत्वात् । यद्यस्तीति उच्यते, तर्हि प्रमाददशायामपि चारित्रं क्षयोपशमभावेनैव वक्तव्यम्, न तु बाह्यरुपतोऽपि, बाह्यतस्तदानीं प्रमादस्यैव भावात् । न हि प्रमादो बाह्यतश्चारित्रमिति वक्तुं शक्येत । एवमेव श्रावकाणां अब्रह्मादिपापव्यापारकालेऽपि देशतश्चारित्रं क्षयोपशमभावेनैव वक्तव्यम्, बाह्यरुपतस्तु अब्रह्मादिपापव्यापाराणां तदानीं सद्भावेन बाह्यतो देशचारित्रस्य वक्तुमशक्यत्वात् ।

एवं च यथा साधूनां श्रावकाणां च प्रमादकाले पापव्यापारकाले च क्षयोपशमभावेन चारित्रमिष्यते, तथैव तेषां प्रमादादिकाले क्षयोपशमभावेन स्थानादियोगः किं नेष्यते ?

क्षयोपशमभावेन वस्तुस्वीकारस्तु शास्त्रेऽन्यपदार्थेष्वपि दृश्यते । तथाहि मतिश्रुतज्ञानं उत्कर्षतः साधिकैषट्षष्ठिसागरोपमाणि यावत् प्रतिपादितम्, तत्र तावत्कालं नानवरतं उभयोपयोगो भवति, अपि त्वन्यतरस्यैव, ततश्चैकोपयोगकालेऽपि अन्यसद्भावः क्षयोपशमभावेनैव । एवं सम्यग्दर्शनं केवलद्विकं च आश्रित्य वाच्यम्, तत्रापि अस्यैव न्यायस्य स्थानप्राप्तत्वात् ।

ततश्च चारित्रिण एव योगो भवति इतिवद् 'चारित्रिणो योगो भवत्येव' इत्यपि एवकारः न्याय्य एव मन्तव्य इति ।

ननु तर्हि यशोविजयैः उपसंहारे → ततो देशतः सर्वतश्च चारित्रिणां एव स्थानादियोगप्रवृत्तिः सम्भवतीति सिद्धम् ← इत्येतावदेव किमर्थं उक्तं ? 'सम्भवत्येवेति सिद्धम्' इत्येवमपि एवकारः कथं न गृहीतः ? तस्माज्ज्ञायत एतद् यदुत <u>'सम्भवत्येव'</u> इत्येवकारो न यशोविजयाभिमत इति चेन्न, यस्मिन्विषये शङ्का, तद्विषयकमेव समाधानमुपसंहारश्च प्रतिपाद्यते इति विदितमेव । प्रस्तुते तु चारित्रिभिन्नस्य योगोऽस्ति न वा ? इति शङ्का, ततश्च समाधानमुपसंहारश्च तदनुसार्येव भवति, 'चारित्रिणो योगः सम्भवत्येव' इतिविषये शङ्काऽभावात् समाधाने उपसंहारे च तदुल्लेखो न भवत्येव, न तावन्मात्रेण कश्चिद् दोष ← इति ।

ननु प्रतिपादिते मतद्वये कतरन्मतं प्रमाणमिति चेत् ? बहुश्रुता यत्प्रमाणयन्ति, तदेवास्माकमपि

प्रमाणमित्यलं विस्तरेण ।

'स्थानादियोग: चारित्रिण एव भवति' इत्यत्र कारणमाह क्रियारुपस्येत्यादि । चारित्रेत्यादि । चारित्रमोहनीयस्य य: क्षयोपशम:, तन्नान्तरीयकत्वात् = तं अन्तराऽभावित्वादिति । तथा च यथा धूमो वह्निं विना न भवतीति कृत्वा धूमो वह्निमत्येव भवति । तथैव योगश्चारित्रक्षयोपशमं विना न भवतीति कृत्वा स योग: चारित्रक्षयोपशमवति चारित्रिण्येव भवतीति ।

अत एव = यस्माच्चारित्रिण एव योग:, नान्यस्य, तस्मादेव कारणात् अध्यात्मादियोगप्रवृत्तिरपि न केवलं स्थानादियोगप्रवृत्तिरेव इत्यपिशब्दार्थ: चारित्रप्राप्तिमारभ्यैव = न तु चारित्रात्प्रागपि इत्येवकारार्थ: । ग्रन्थकृता = हरिभद्रसूरिणा ।

योगबिन्दुगाथाभावार्थस्तु सुगम एव, नवरं चित्रं = अनेकविधं, इदं = चारित्रं अत्र = चारित्रे, न तु तत्प्राक् । पूर्वोदित: = योगबिन्दावेव प्रागुक्त: ।

---

**यशो.: तत्राध्यात्मं उचितप्रवृत्तेर्व्रतभृतो मैत्र्यादिभावगर्भं शास्त्राज्जीवादितत्त्वचिन्तनम् १, भावना अध्यात्मस्यैव प्रतिदिनं प्रवर्धमानश्चित्तवृत्तिनिरोधयुक्तोऽभ्यास: २,**

---

चन्द्र.: अध्यात्मादिपञ्चकस्य निरुपणं प्राय: सुगममेव, नवरं पदकृत्यं आवश्यकम् ।

तत्राध्यात्मलक्षणे शब्दपञ्चकस्य पदकृत्यं कर्त्तव्यम् ।

तथाहि व्रतभृत् मैत्र्यादिभावगर्भमपि शास्त्रात्तत्वचिन्तनं यदि अविनयादिरुपेणानौचित्येन कुर्यात्, तर्हि न तत् अध्यात्मम् । तस्मात् उचितप्रवृत्तिमत्त्वमवश्यं अपेक्षणीयम् ।

उचितप्रवृत्तिमानपि यदि अपुनर्बन्धकादिरेव स्यात्, न तु चारित्री, तदा तस्य तच्चिन्तनं न अध्यात्मं, व्रताभावात् । तस्मात् व्रतभृत्त्वं अपेक्षणीयम् ।

उचितप्रवृत्तिमान् व्रतभृत् यदि इर्ष्यादिभावगर्भं तत्त्वचिन्तनं कुर्यात् तर्हि न तदध्यात्मं, तस्मात् मैत्र्यादिभावगर्भत्वं अपेक्षणीयम् ।

यदि स स्वमतिमात्रविकल्पनेन तत्त्वचिन्तनं कुर्यात्, तदा स्वच्छन्दतामात्रपोषकत्वात् न तदध्यात्मम्, तस्मात् शास्त्रात् = शास्त्रानुसारि तत्त्वचिन्तनमपेक्षणीयम् ।

'मैत्र्यादि' इत्यत्रादिपदात् प्रमोदकरुणामाध्यस्थ्यादयो भावा ग्राह्या: ।

'जीवादि' इत्यत्रादिपदात् अजीवादीनि तत्त्वानि ग्राह्याणि ।

चित्तवृत्तिनिरोधयुक्त इति । अध्यात्मकाले हि अभ्यासाभावात् मनसस्तथाविधस्थैर्यं न भवति, ततश्च चित्तवृत्तयश्चञ्चला अपि भवन्ति, भावनायां तु अभ्यासरूपायां अभ्यासप्रभावादेव चित्तवृत्तीनां चाञ्चल्यं विघटदास्ते, ततश्च तादृशचित्तवृत्तिनिरोधयुक्त एवाभ्यासो भावना ।

'प्रतिदिनं' इदं च सामान्यतो ज्ञेयम्, तेन कदाचित् दिनद्वयाद्यन्तराले सत्यपि न भावनायाः क्षतिः ।

अध्यात्मस्यैव इति । न तु अध्यात्मातिरिक्तस्येति एवकारार्थः । तथा च जीवादितत्त्वचिन्तनं कृत्वा अजीवादितत्त्वान्तरचिन्तनं कुर्वाणस्य न तन्नूतनचिन्तनं भावना, किन्तु तन्नूतनमध्यात्ममेव, प्राक्कृतचिन्तनस्यैव अध्यात्मस्वरुपस्य पुनः पुनः अभ्यासो भावनेति ।

तथा हि इर्यायां प्रथमं उपयुक्तस्योपयोगोऽतिचञ्चलो भवति, ततश्च तदा तदध्यात्मम्, पुनः पुनरुपयुक्तस्योपयोगस्तु क्रमशः निश्चलो भवतीति तदा सा भावनेति ।

---

**यशो.: आध्यानं प्रशस्तैकार्थविषयं स्थिरप्रदीपसदृशमुत्पातादिविषयसूक्ष्मोपयोगयुतं चित्तम् ३,**

---

चन्द्र.: प्रशस्तेत्यादि । प्रशस्तो य उत्पातादिरुपो एक अर्थः, तद्विषयकम् । अत एव अनेकार्थे परिभ्रमणाभावात् स्थिरप्रदीपसदृशं । उत्पादादि इति । आदिपदात् व्ययध्रौव्यादिकम् । उत्पादादयो विषयाः सूक्ष्माः, ततश्च तद्गतं चित्तं सूक्ष्मोपयोगयुतं भवति । स्थूलविषयकं तु चित्तं स्थूलोपयोगयुतं भवति, तच्च आध्यानं न गणयितुमुचितम्, तस्मादत्र उत्पादादयः सूक्ष्मविषयाः गृहीता इति ।

---

**यशो.: समता अविद्याकल्पितेष्टानिष्टत्वसंज्ञापरिहारेण शुभाशुभानां विषयाणां तुल्यताभावनम् ४,**

---

चन्द्र.: अविद्येत्यादि । अविद्यया = मोहजनितेनाज्ञानेन कल्पिता या इष्टत्वानिष्टत्वसंज्ञा = 'इदं इष्टं इदं वा अनिष्टं' इत्यादि ज्ञानात्मिका, तस्याः परिहारेण शुभाशुभानां = अविद्यावतामपेक्षयैव शुभानां अशुभानां च विषयाणां = शब्दादीनां, तुल्यताभावनम् = समानताचिन्तनम् ।

अयं भावः - विषयाः स्वरुपतो न इष्टा न वाऽनिष्टाः, विष्टाया अनिष्टत्वेऽपि शूकराणामिष्टत्वात्, मिष्टान्नस्येष्टत्वेऽपि भृतोदराणामनिष्टत्वात् । ततश्च जीवा स्वेन मोहजनिताज्ञानेन विषयेषु इष्टत्वमनिष्टत्वं च कल्पयन्ति, अविद्यापरिहारे तु अविद्याकल्पितायाः इष्टत्वानिष्टत्वसंज्ञायाः परिहारो भवति ततश्च शुभाशुभानां विषयाणां समानताबुद्धिः प्रादुर्भवतीति ।

---

**यशो.: वृत्तिसंक्षयश्च मनोद्वारा विकल्परूपाणां शरीरद्वारा परिस्पन्दरूपाणामन्यसंयोगात्मकवृत्तीनामपुनर्भावेन निरोधः ५ ।**

---

चन्द्र.: मनोद्वारा इत्यादि । मनोद्वारा या विकल्परुपा वृत्तयो भवन्ति, शरीरद्वारा च याः परिस्पन्दरुपाः क्रियारुपाः वृत्तयो भवन्ति, तासां सर्वासां वृत्तीनां अपुनर्भावेन यो निरोधः स वृत्तिसंक्षयः ।

अपुनर्भावो नाम पुन र्न भवनम् ।

अत्र विकल्परुपा वृत्तयः मनोवर्गणापुद्गलजन्या इति कृत्वा अन्यसंयोगरुपाः, तथा परिस्पन्दरुपाः वृत्तयः औदारिकादिपुद्गलसंपर्कजन्या इति कृत्वा ता अपि अन्यसंयोगरुपाः, अत एव वृत्तौ "अन्यसंयोगात्मक" इति विशेषणं उपात्तम् ।

---

**यशो.: अथैतेषामध्यात्मादीनां स्थानादिषु कुत्र कस्यान्तर्भावः इति चेद् ? उच्यते - अध्यात्मस्य चित्रभेदस्य देवसेवाजपतत्त्वचिन्तनादिरूपस्य यथाक्रमं स्थाने उर्णेऽर्थे च । भावनाया अपि भाव्यसमानविषयत्वात्तत्रैव । ध्यानस्यालम्बने । समतावृत्तिसंक्षययोश्च तदन्ययोग इति भावनीयम् । ततो देशतः सर्वतश्च चारित्रिण एव स्थानादियोगप्रवृत्तिः सम्भवतीति सिद्धम् ।**

---

चन्द्र.: एते अध्यात्मादयो वस्तुतो न स्वतन्त्ररुपाः, किन्तु स्थानाद्यन्तर्गता एव, ततश्च यदि योगबिन्दौ अध्यात्मादयश्चारित्रप्राप्तिमारभ्यैवोक्ताः, ततः अर्थापत्त्या स्थानादिरुपा योगा अपि चारित्रप्राप्तिमारभ्यैव सिद्ध्यन्तीति । एतदेवाह अथैतेषामित्यादि । अध्यात्मादीनां मध्ये कस्य स्थानादीनां मध्ये कस्मिन् समावेश इति प्रश्नार्थः ।

चित्रभेदस्य = अनेकप्रकारस्य, अत एव देवसेवाजपतत्त्वचिन्तनादिरुपस्य । देवसेवा कायिकमध्यात्मं, जपो वाचिकं, तत्त्वचिन्तनं च मानसिकं, आदिशब्दादन्येऽपि कायिकवाचिकमानसिकभेदा ग्राह्याः । यथाक्रमं इति । देवसेवायाः स्थाने, जपस्य उर्णे तत्त्वचिन्तनस्य च अर्थे इति भावः । एतच्च युक्तमेव, यतो देवसेवा कायिकचेष्टारुपा स्थानमपि तथैव, एवं जपो वाचिकः, उर्णोऽपि तथैव, चिन्तनं मानसिकं अर्थश्च तथैवेति ।

ननु अनन्तरं अध्यात्मलक्षणे शास्त्राज्जीवादितत्त्वचिन्तनम् अध्यात्मं प्रतिपादितम् । तत्र देवसेवाजपौ तु नाध्यात्मतया प्रतिपादितौ, न वा 'जीवादितत्त्वचिन्तनादि' इत्येवं आदिपदमपि तत्र गृहीतम्, येन आदिपदाद् देवसेवाजपौ गृह्येते, ततश्चाधुना अध्यात्मस्य चित्रभेदानां देवसेवादिप्रभृतीनां कथनमपूर्वमेवेति चेत्,

सत्यं, प्राक्प्रतिपादितेऽध्यात्मे देवसेवादिकमुपलक्षणाद् ग्राह्यं, ततश्च न दोषः । यथौचित्यवतो व्रतभृतः मैत्र्यादिभावगर्भं शास्त्राज्जीवादितत्त्वचिन्तनम् अध्यात्मं, तथैव तादृशस्य तस्य तादृश्येव शास्त्राद् देवसेवा, तादृश एव च शास्त्राज्जपोऽध्यात्ममिति निष्कर्षः ।

किञ्च देवसेवादिष्वपि मानसिकं चिन्तनमस्त्येव, केवलं काययोगादिप्राधान्यं तत्र विवक्ष्यते । तथा च तत्राऽपि तादृशचिन्तनात्मकस्याध्यात्मस्य लक्षणमव्याहतमेवेति बोध्यम् ।

भावनाया अपि = न केवलमध्यात्मस्यैवेत्यपिशब्दार्थः ।

भाव्यसमानविषयत्वात् = भावनायाः विषयाः भाव्याः, भाव्याः एव समानाः विषयाः यस्याः, सा भावना

भव्यसमानविषया, केन समाना: ? इति चेत्, अध्यात्मेन समाना:, तथा च भावनाया अध्यात्मेन सह भाव्यसमानविषयत्वात् तत्रैव स्थाने उर्णे अर्थे चेति ।

अयं भाव:, अध्यात्मस्य ये विषया:, भावनाया अपि ते एव विषया:, न तु भिन्ना:, केवलं अध्यात्मस्यैवाभ्यासो भावनेत्येतावानेवानयोर्भेद:, ततश्च यदि अध्यात्मस्य स्थाने उर्णे अर्थे च समावेश:, तर्हि तत्समानविषयाया: भावनाया अपि स्थाने उर्णे अर्थे चैव समावेशो भवेदिति स्पष्टमेव ।

ध्यानस्यालम्बने इति । ध्यानस्य प्रशस्तैकार्थविषयकत्वात्, आलम्बनयोगस्यापि रुपिद्रव्यविषयकत्वप्रतिपादनात् ध्यानं परमार्थत आलम्बनयोगात्मकमेवेति ।

समतावृत्तिसंक्षययोश्च तदन्ययोगे रुपिद्रव्यालम्बनाभावादिति ।

उपसंहारमाह ततो इत्यादि ।

अध्यात्मादिपञ्चकं स्थानादिपञ्चकरुपमेव, न तु ततो भिन्नम् । ततश्च यदि अध्यात्मादिपञ्चकं चारित्रमारभ्यैव योगबिन्दावुक्तं, तर्हि स्थानादिपञ्चकमपि चारित्रमारभ्यैव सिद्ध्यति इति स्पष्टमेव ।

---

**यशो.: ननु यदि देशत: सर्वतश्च चारित्रिण एव स्थानादिर्योग: तदा देशविरत्यादिगुणस्थानहीनस्य व्यवहारेण श्राद्धधर्मादौ प्रवर्तमानस्य स्थानादिक्रियाया: सर्वथा नैष्फल्यं स्यादित्याशङ्क्याह - 'इतरस्य'-देशसर्वचारित्रिव्यतिरिक्तस्य स्थानादिकं 'इत एव' देशसर्वचारित्रं विना योगसम्भवाभावादेव 'बीजमात्रं' योगबीजमात्रं 'केचिद्' - व्यवहारनयप्रधाना इच्छन्ति ।**

---

चन्द्र.: अत्र शङ्कते ननु यदि इत्यादि । अयं भाव: य: परमार्थतो देशविरत: सर्वविरतो वा नास्ति, किन्तु सामायिकादिकां देशविरतिक्रियां भिक्षाटनादिकां वा सर्वविरतक्रियां करोति, तस्य सा क्रिया न योग:, चारित्राभावेन योगासम्भवात् । ततश्च सा क्रिया न मोक्षकारणम्, योगस्यैव मोक्षकारणत्वात् । ततश्च सा क्रिया सर्वथा निष्फला, मोक्षाकारणत्वादिति ।

समाधानमाह इतरस्य इत्यादि । अत्रायमन्वय:, केचिद् = व्यवहारनयप्रधाना: इत एव = देशसर्वचारित्रं विना योगसम्भवाभावादेव इतरस्य देशसर्वचारित्रिव्यतिरिक्तस्य स्थानादिकं बीजमात्रं = योगबीजमात्रं इच्छन्ति ।

यत: चारित्रं विना योगो नास्ति, तत एव चारित्ररहितानामपुनर्बन्धकादीनां स्थानादिकं यद्यपि योगो न, किन्तु योगस्य बीजमस्तीति व्यवहारनय इति भाव: ।

---

**यशो.: "मोक्षकारणीभूतचारित्रतत्त्वसंवेदनान्तर्भूतत्वेन स्थानादिकं चारित्रिण एव योग:, अपुनर्बन्धकसम्यग्दृशोस्तु तद्योगबीजम्" इति निश्चयनयाभिमत: पन्था: ।**

व्यवहारनयस्तु योगबीजमप्युपचारेण योगमेवेच्छतीति व्यवहारनयेनापुनर्बन्धकादयः स्थानादियोगस्वामिनः, निश्चयनयेन तु चारित्रिण एवेति विवेकः ।

---

चन्द्र.: ननु निश्चयनयोऽपि एतदेव मन्यते यदुत "चारित्ररहितानां स्थानादिकं न योगः, किन्तु योगबीजम्" इति । ततश्च निश्चयव्यवहारयोर्मध्ये को भेद इति आशङ्कायां स्पष्टार्थमाह मोक्षकारणीभूतेत्यादि । 'स्थानादिकं मोक्षकारणीभूतचारित्रतत्त्वसंवेदनान्तर्भूतत्वेन चारित्रिण एव योगः' इत्येवमन्वयः कार्यः ।

ननु चारित्रं तावत्प्रसिद्धमेव, तत्त्वसंवेदनं तु किं ? इति चेत्, अष्टकप्रकरणोक्तः षष्ठगुणस्थानभावी ज्ञानात्मको गुणविशेषः । तथा च तत्पाठः "विषयप्रतिभासं स्यादात्मपरिणतिमत्तथा । तत्त्वसंवेदनं चैव ज्ञानमाहुर्महर्षयः ।" इति ।

ननु चारित्रमपि षष्ठगुणस्थानभावी, तत्त्वसंवेदनमपि तथा, ततश्च कोऽनयोर्भेदः ? उभयमेकमेवेति चेत्,

न, चारित्रमत्र प्रधानतया क्रियारुपं ग्राह्यं, तत्त्वसंवेदनं च ज्ञानरुपं, ततश्च स्थानोर्णौ चारित्ररुपतया अर्थादयश्च तत्त्वसंवेदनतया चारित्रिण एव भवन्तीति तेषामेव योगः । अपुनर्बन्धकसम्यग्दृशोस्तु यद्यपि स्थानादिकमस्ति, तथाऽपि तत् चारित्रतत्त्वसंवेदनादिरुपं नास्तीति तन्न योगः, किन्तु योगबीजं इति निश्चयनयो मन्यते ।

व्यवहारनयस्तु ब्रूते, यद् योगबीजं, तदपि कारणे कार्योपचाराद् योग एवेति । ततश्च अपुनर्बन्धकादयोऽपि स्थानादियोगस्वामिन इति ।

---

यशो.: तदिदमुक्तम्-अपुनर्बन्धकस्यायं, व्यवहारेण तात्त्विकः । अध्यात्मभावनारूपो, निश्चयेनोत्तरस्य तु ॥३६९॥ (यो०बि०) अपुनर्बन्धकस्य उपलक्षणात्सम्यग्दृष्टेश्च 'व्यवहारेण' कारणे कार्यत्वोपचारेण 'तात्त्विकः' कारणस्यापि कथञ्चित्कार्यत्वात् । 'निश्चयेन' उपचारपरिहारेण 'उत्तरस्य तु' चारित्रिण एव ।

---

चन्द्र.: अत्रार्थे योगबिन्दुपाठमाह अपुनर्बन्धकस्येत्यादि । अयं = योगः । शेषं स्पष्टम् ।

वृत्तिकृदेव गाथाभावार्थमाह अपुनर्बन्धकस्य इत्यादि । कारणस्यापि यथा मृद् कथंचिद्घटरुपैव, अनागतकाले घटरुपतया परिणमनात् अधुना तस्यां योग्यतया घटो विद्यत एवेति सा योग्यतया घट एवेति भावः ।

---

यशो.: सकृद्बन्धकादीनां तु स्थानादिकमशुद्धपरिणामत्वान्निश्चयतो व्यवहारतश्च न योगः किन्तु योगाभास इत्यवधेयम् । उक्तं च-'सकृदावर्तनादीनामतात्त्विक उदाहृतः । प्रत्यपायफलप्रायस्तथा वेषादिमात्रतः ॥३७०॥' (यो०बि०) सकृद्-एकवारमावर्तन्ते उत्कृष्टां स्थितिं बध्नन्ति ये ते सकृदावर्तनाः, आदिशब्दाद्द्विरावर्तनादिग्रहः, 'अतात्त्विकः'

व्यवहारतो निश्चयतश्चातत्त्वरूपः ॥३॥

---

चन्द्र.: योगाभास इति । न योगो न वा योगबीजं, केवलं योगवदाभासत इति योगाभास इति ।

योगबिन्दुगाथान्वयार्थस्त्वेवम् → सकृदावर्तनादीनां वेषादिमात्रतः अतात्त्विकः तथा प्रत्यपायफलप्राय उदाहृतः ← इति । अत्र 'वेषादि' इत्यत्रादिपदात्क्रियादिपरिग्रहः । प्रत्यपायः दुर्गत्यादिरुपः ।

ननु सकृद्बन्धकादीनां योगः प्रत्यपायमेव जनयति, न तु अन्यत्किञ्चित् । ततश्च किमत्र प्रायःपदं उपात्तमिति चेत्,

कदाचित् सकृद्बन्धकस्य योगः कुग्रहनिवारणद्वारा प्रत्यपायं न जनयेदपीति तज्ज्ञापनार्थं प्रायःपदमुपात्तमिति ।

इत्थं च

निश्चयेन चारित्रिण एव योगः, अपुनर्बन्धकसम्यग्दृशां तु योगबीजमेव ।

व्यवहारेण चारित्रिणस्तु योग अस्त्येव, अपुनर्बन्धकसम्यग्दृशां योगबीजमपि कारणे कार्योपचाराद् योग एव ।

उभयनयेन सकृद्बन्धकादीनां न योगः न वा योगबीजं, किन्तु योगाभास इति स्पष्टम् ।

व्याख्याता तृतीया कारिका ।

---

**यशो.: तदेवं स्थानादियोगस्वामित्वं विवेचितम् अथैतेष्वेव प्रतिभेदानाह -**

**इक्किको य चउद्धा, इत्थं पुण तत्तओ मुणेयव्वो ।**

**इच्छा-पवित्ति-थिर, सिद्धिभेयओ समयनीईए ॥४॥**

**'इक्किक्को य'त्ति । 'अत्र' स्थानादौ 'पुनः' कर्मज्ञानद्विभेदाभिधानापेक्षया भूयः एकैकश्चतुर्द्धा 'तत्त्वतः' सामान्येन दृष्टावपि (?दृष्टोऽपि) परमार्थतः 'समयनीत्या' योगशास्त्रप्रतिपादितपरिपाट्या 'इच्छाप्रवृत्तिस्थिरसिद्धिभेदतः'-इच्छाप्रवृत्ति-स्थिरसिद्धिभेदानाश्रित्य 'मुणेयव्वो' त्ति ज्ञातव्यः ॥४॥**

---

चन्द्र.: अधुना चतुर्थकारिकायाः प्रस्तावनामारचयति वृत्तिकृत् तदेवं इत्यादिना । एतेष्वेव = स्थानादिष्वेव ।

चतुर्थकारिकान्वयस्त्वेवम् → अत्र पुनः एकैकः तत्त्वत समयनीत्या इच्छाप्रवृत्तिस्थिरसिद्धिभेदतश्चतुर्धा विज्ञेय ← इति ।

कर्मज्ञानेत्यादि । अयं भावः, पुनःशब्दः 'भूयः' इत्यर्थप्रतिपादकः, सकृत्किञ्चिन्निरुपणं कृत्वा द्वितीयवारं किञ्चिन्निरुपणे भूयोऽर्थकः पुनःशब्दो गृह्यते । ततश्च प्राक् किं निरुपणं कृतं, यदपेक्षया पुनःशब्दोऽत्र गृहीत इति वक्तव्यमेव । अत आह कर्मेत्यादि । तथा च प्राक् कर्मयोगो ज्ञानयोगश्चेत्येवं भेदद्वयाभिधानं कृतमधुना भूयः

स्थानादिः एकैकः चतुर्धा इत्येवमभिधीयत इत्यर्थः ।

सामान्येन दृष्टावपि परमार्थतः = सामान्यतः स्थानादिकस्य दृष्टिः (= दर्शनं) कृता, तथाऽपि विशेषतो यदि तस्य विचारणं क्रियते, तर्हि ।

(अत्र 'सामान्येन दृष्टोऽपि' इति पाठः सम्यक्प्रतिभाति, यतस्तत्र स्पष्टमर्थबोधो जायते । तथाऽपि अत्र मुद्रितपाठानुसारेण अस्माभिः 'दृष्टावपि' इत्यनुसृत्य व्याख्यानं कृतम् । तत्त्वमत्र गीतार्थगम्यम्)

व्याख्याता चतुर्थी कारिका ।

---

**यशो.: तानेव भेदान् विवरीषुराह -**

**तज्जुत्तकहापीईइ संगया विपरिणामिणी इच्छा ।**
**सव्वत्थुवसमसारं, तप्पालणमो पवत्ती उ ॥५॥**
**तह चेव एयबाहगचिंतारहियं थिरत्तणं नेयं ।**
**सव्वं परत्थसाहगरुवं पुण होइ सिद्धि त्ति ॥६॥**

---

चन्द्र.: अधुना पञ्चमी षष्ठी च ।

गाथाद्वयान्वयस्त्वेवम् → तद्युक्तकथाप्रीत्या सङ्गता विपरिणामिनी इच्छा भवति ।
सर्वत्रोपशमसारं तत्पालनं प्रवृत्तिस्तु ।
तथा चैव एतद्बाधकचिन्तारहितं स्थिरत्वं ज्ञेयम् ।
सर्वत्र परार्थसाधकरुपं पुनः सिद्धिर्भवतीति ←

---

**यशो.: 'तज्जुत्तकहा' इत्यादि । तद्युक्तानां-स्थानादियोगयुक्तानां कथायां प्रीत्या अर्थबुभुत्सयाऽर्थबोधेन वा जनितो यो हर्षस्तल्लक्षणया संगता-सहिता 'विपरिणामिनी'-विधिकर्तृबहुमानादिगर्भं स्वोल्लासमात्राद्यत्किञ्चिदभ्यासादिरूपं विचित्रं परिणाममादधाना इच्छा भवति, द्रव्यक्षेत्राद्यसामग्र्येणाङ्गसाकल्याभावेऽपि यथाविहितस्थानादियोगेच्छया यथाशक्ति क्रियमाणं स्थानादि इच्छारूपमित्यर्थः ।**

---

चन्द्र.: अर्थबुभुत्सया इत्यादि । स्थानादियोगयुक्तानां कथायाः श्रवणादर्वाक् "कीदृशा एतेषां स्थानादियोगा अभवन् ? ते महात्मानः कीदृशा उत्तमपरिणतिमन्त अभवन्" इत्यादिरुपा अर्थबुभुत्सा प्रवर्तते, तेन यो हर्षो श्रोतृणां भवति, साऽत्र प्रीतिः । एवं कथाश्रवणात् यः अर्थबोधो भवति, तेन यो हर्षो भवति, साऽपि प्रीतिरुच्यते ।

यथा हि नाटकप्रेक्षणरसिकानां विशिष्टतमनाटकप्रेक्षणावसरे प्राप्ते तत्प्रेक्षणादर्वाक्काले 'कीदृशं नाटकं

भविष्यति' इत्यादिरुपयाऽर्थबुभुत्सया नाटकप्रेक्षणजन्येन चार्थबोधेन हर्षो भवति, तथाऽत्रापि विज्ञेयम् । एवंविधया प्रीत्या संगता इच्छा भवति । तथा सा इच्छा विपरिणामिनी भवति । तत्र विपरिणामिनी इतिपदस्यार्थमाह विधिकर्तृ इत्यादि ।

अयं भावः – "ये स्थानादिषु विधिकर्तारः ते धन्या वन्दनीयाः पूज्याः प्रशंसनीयाश्च" इत्येवंविधं बहुमानं इच्छास्थानयोगवतो भवति । न च स केवलं बहुमानमेव बिभर्ति, किन्तु स्वस्य यः कश्चित्स्वल्पो मध्यमोऽधिको वा उल्लासो भवति, तदुल्लासानुसारेण स्वयमपि स्थानादियोगस्याभ्यासं करोति, स च अभ्यासः द्रव्यादिसामग्रीविकलतावशादविधियुक्तो भवति, ततश्चायं जीवः इच्छास्थानयोगवान् भण्येत । एवमेव इच्छोर्णयोगः, इच्छाऽर्थयोग इत्येवमादयोऽपि वक्तव्याः ।

गाथानुसारेण व्याख्यानं कृत्वाऽधुना वृत्तिकृत् निष्कर्षमाह द्रव्यक्षेत्राद्यसामग्र्येणेत्यादि ।

अयं भावः, ये द्रव्यक्षेत्रकालभावाः स्थानादियोगस्याङ्गभूताः कारणीभूता इति यावत्, ते यदि संपूर्णा न भवेयुः, तर्हि स्थानादियोगाङ्गानि एव सकलानि न सन्तीति अर्थात्सिद्धमेव, अङ्गसाकल्याभावे च स्थानादियोगाः यथाशास्त्रं न स्युरेव, कारणवैकल्ये कार्यवैकल्यावश्यंभावात् । तथाऽपि स जीवः शास्त्रानुसारिणां स्थानादियोगानां इच्छां मनसिकृत्य स्वशक्तिमनतिक्रम्यागोपयित्वा च प्राप्तसामग्र्यनुसारेण स्थानादिकं करोति, एवं क्रियमाणं स्थानादिकमेव इच्छारुपं स्थानादिकमित्युच्यते इति ।

अत्र विनेयजनानुग्रहाय दृष्टान्तः प्रदर्श्यते ।

शास्त्रानुसारिण्या जिनपूजाया अङ्गानि द्रव्यतः चन्दनदुग्धादीनि, क्षेत्रतो जिनमन्दीरादीनि, कालतो मध्याह्नकालादीनि, भावतो जिनपूजाविधिज्ञानजिनपूजागतसूत्रार्थज्ञानादीनि च ।

तत्र यः पूजकः शास्त्रीयजिनपूजाकर्तृविषयकं बहुमानं धरति, यथा 'पूजा यथाविधि कर्त्तव्या, ते च धन्याः, ये एवं कुर्वन्ति' इत्यादि, परन्तु प्रतिपादितानामङ्गानां मध्ये एकद्वित्र्याद्यङ्गाभावतः यदि शास्त्रानुसारिणीं जिनपूजां कर्तुं न समर्थो भवति । ततश्च शास्त्रानुसारिजिनपूजेच्छया प्राप्ताङ्गानुसारेण जिनपूजां करोति, ततश्च तस्य सा जिनपूजा इच्छास्थानं इच्छोर्णः इच्छार्थश्चेत्येवं सर्वं यथासम्भवं वाच्यम् ।

वृत्तिगतशब्दलेशार्थश्चायम् यथाविहितेत्यादि । यथाशास्त्रोक्तमिति । यथाशक्ति = शक्तिमनतिक्रम्य शक्तिमगोपयित्वा चेति ।

---

**यशो.: प्रवृत्तिस्तु 'सर्वत्र' सर्वावस्थायां 'उपशमसारं' – उपशमप्रधानं यथा स्यात्तथा 'तत्पालनं'-यथाविहितस्थानादियोगपालनम्, 'ओ' त्ति प्राकृतत्वात् वीर्यातिशयाद् यथाशास्त्रमङ्गसाकल्येन विधीयमानं स्थानादि प्रवृत्तिरूपमित्यर्थः ॥५॥**

---

चन्द्र.: अधुना प्रवृत्तिमाह सर्वत्रेत्यादि । सर्वावस्थायां इति । स्थानादियोगकरणकाले या या अवस्थाः सम्भवन्ति, तासु तासु सर्वासु अवस्थासु । उपशमप्रधानं = औत्सुक्यविरहितं रागद्वेषप्रशमभावान्वितमिति भावः ।

सारमाह वीर्यातिशयाद् = वीर्यान्तरायक्षयोपशमविशेषाद् जन्यो यो वीर्यातिशयः तस्मात्, वीर्यमान्द्ये हि यथाशास्त्रं पालनं प्रायोऽसंभवि, ततो यथाशास्त्रपालने वीर्यातिशयोऽत्यावश्यक इति तदुपादानं कृतमिति ।

---

**यशो.: 'तह चेव' त्ति । 'तथैव' प्रवृत्तिवदेव सर्वत्रोपशमसारं स्थानादिपालनमेतस्य पाल्यमानस्य स्थानादेर्बाधकचिन्तारहितं स्थिरत्वं ज्ञेयम् ।**

---

चन्द्र.: अधुना स्थैर्यमाह प्रवृत्तिवदेव इति । गाथागतस्य 'तह चेव' इतिपदस्यार्थः प्रवृत्तिवदेव । यथा प्रवृत्तौ सर्वत्रोपशमप्रधानं स्थानादिपालनं गृहीतं, तथैव स्थैर्येऽपि ग्राह्यम् इति । एतदेव स्पष्टमाह सर्वत्रोपशमेत्यादि । नवरं प्रवृत्तिसकाशात्स्थैर्ये यो विशेषस्तमाह पाल्यमानस्येत्यादि । स्थानादेः ये बाधकाः = अतिचाराः, तेषां या चिन्ता "ममानुष्ठाने एतेऽतिचारा भविष्यन्ति न वा ?" इत्यादिरुपा, तद्रहितं सर्वत्रोपशमसारं स्थानादिपालनं स्थिरत्वं ज्ञेयम् ।

---

**यशो.: प्रवृत्तिस्थिरयोगयोरेतावान् विशेषः-यदुत प्रवृत्तिरूपं स्थानादियोगविधानं सातिचारत्वाद्बाधकचिन्तासहितं भवति । स्थिररुपं त्वभ्याससौष्ठवेन निर्बाधकमेव जायमानं तज्जातीयत्वेन बाधकचिन्ताप्रतिघाताच्छुद्धिविशेषेण तदनुत्थानाच्च तद्रहितमेव भवतीति ।**

---

चन्द्र.: ननु प्रवृत्तिस्थिरत्वयोः स्वरुपमेकमेव निगदितम् यदुत – "सर्वत्रोपशमप्रधानं स्थानादिपालनम्" इति, ततश्च कोऽनयोर्विशेष इति जिज्ञासायामाह प्रवृत्तिस्थिरयोगयोः एतावान् एतावानेव, नाधिकः विशेषः = भेदः । स्थानादियोगविधानं = स्थानादियोगकरणं सातिचारत्वात् = अतिचारसहितत्वात्, बाधकचिन्तासहितं = अतिचारचिन्तायुक्तं भवति ।

नन्वभव्यादयोऽपि निरतिचारस्थानादिपालका भवन्तीति किं तेषां प्रवृत्तिस्थानादि भवन्ति इति चेत्, नैव भवन्ति, प्रणिधानाद्यभावात् ।

किञ्च चारित्रिण एव योग इति कृत्वा अभव्यादीनां चारित्राभावेन प्रवृत्तिस्थानादीनां योगाभासत्वात्, अपुनर्बन्धकताद्यभावेन योगबीजस्याऽप्यसम्भवादिति स्पष्टमेव ।

किञ्च शुभाशयाभावेन तेषां सदैव भावात्मकाङ्गवैकल्यं भवेदेवेति अङ्गसाकल्यस्य कदापि तेषामसम्भवात् प्रवृत्तिस्थानादि दूरापास्तमेवेति सङ्क्षेपः ।

स्थिररुपं तु स्थानादि अभ्याससौष्ठवेन इत्यादि ।

अयं भाव:, प्रवृत्तिरुपं स्थानादि प्रारम्भदशायामेव प्रवृत्तिरुपं, यदा तु निरन्तराभ्यासकरणात् अभ्यासदाढ्यं भवति, तदा तदेव स्थानादि स्थिररुपमुच्यते । तच्च स्थिररुपं स्थानादि अतिचाररहितमेव जायते । सकृद् द्विः त्रिः वा जायमानं प्रवृत्तिरुपं तद् अभ्याससौष्ठवं नापन्नं, किन्तु अनेकशो जायमानं तत् निरतिचारं भवति, निरतिचाररुपत्वेन चाभ्याससौष्ठवं प्राप्नोति । ततश्च पुनरपि यन्नूतनस्थानादिकं कर्तुमारभ्यते, तत् अनेकशः प्राक्कृतस्थानादिसमानमेव अस्ति इति कृत्वा "यदि प्राक्कालीनानि एतानि प्रभूतानि स्थानादीनि निरतिचाराणि सञ्जातानि, तर्हि इदं नूतनं तत्सदृशमेवेति निरतिचारमेव भविष्यति" इति दृढविश्वासः प्रादुर्भवति, ततश्च प्राक्सम्भवन्त्याः अतिचारचिन्तायाः प्रतिघातो भवति, नूतनायाश्चातिचारचिन्तायाः शुद्धिविशेषप्रभावादुत्पत्तिरेव न भवतीति एवं प्राक्कालीनचिन्तया नूतनचिन्तया च रहितमेव स्थानादिकं भवतीति तत् स्थिररुपं स्थानादि कथ्यते ।

यदि वा प्रवृत्तौ सातिचारत्वात् अतिचारचिन्ता भवति, स्थिरतायान्तु यद्यतिचारयिन्ता भवेत्, तर्हि अभ्याससौष्ठवेन निरतिचारस्यैवानेकशो जातत्वात् 'अनेकशः मया कृतमिदं, न कोऽप्यतिचारः सञ्जातः, तस्मान्नैव भविष्यत्यतिचारः' इत्येवं अतिचारचिन्तायाः प्रतिघातो भवति । तथाऽभ्याससौष्ठवोत्पन्नविश्वासादिप्रभावादतिचारचिन्ताया उत्थानमेव न भवतीति उत्थिताया प्रतिघातो नूतनायाश्चानुत्थानमित्येवं स्थिररुपं स्थानादि बाधकचिन्तारहितमेव भवतीति ।

अत्रापि विनेयजनानुग्रहाय दृष्टान्तः प्रदर्श्यते ।

मुग्धजनः प्रथमं गुर्वादिपरिचयात् प्रतिक्रमणं कर्तुं प्रारभते, तत्र प्रथमं तु विधिकर्तृबहुमानगर्भं विधियुक्तप्रतिक्रमणकरणेच्छायुक्तं द्रव्याद्यभावेन विधिविकलं प्रतिक्रमणं करोतीति तत्प्रतिक्रमणं इच्छारुपम् ।

यदा तु स जनः द्रव्यादिसाकल्यं प्राप्नोति, तदा स सकृत् द्विः त्रिश्च विधिसमन्वितं प्रतिक्रमणं करोति, परन्तु अद्ययावत् अतिचारसद्भावात् तस्यातिचारभयं तु विद्यते, किन्तु यथा यथा तस्य प्रथमं द्वितीयं तृतीयं चतुर्थं पञ्चमं इत्येवंक्रमेण प्रतिक्रमणानि निरतिचाराणि संजायन्ते, तथा तथा तस्यातिचारभीतिर्हीयते । एवं च शततमादिरुपं प्रतिक्रमणं सर्वथाऽतिचारचिन्तारहितं भवति, तत् स्थिररुपं प्रतिक्रमणम्, तत्प्राक्कालीनानि तु अतिचाररहितान्यपि विविधातिचारचिन्तासमन्वितानि प्रतिक्रमणानि प्रवृत्तिरुपाण्येव । अत्र च यत् शततमादिरुपं प्रतिक्रमणं, तत् प्राक्कालीनैः अतिचाररहितैः नवनवतिसंख्याकैः प्रतिक्रमणैः सह समानमेव, ततश्च शततमप्रतिक्रमणारंभकालादर्वाक् तस्यैवंविधोऽध्यवसायो भवति यथा "नवनवतिप्रमाणानि प्रतिक्रमणानि मम सर्वथा निरतिचाराणि सञ्जातानि, ततश्चेदं कर्तुमारभ्यमाणं शततमं प्रतिक्रमणं निरतिचारमेव भविष्यति, न लेशतोऽपि चिन्ता कर्त्तव्या" इति । इत्थं च शततमे प्रतिक्रमणे प्राक्कालीननवनवतिविशुद्धप्रतिक्रमणसमानत्वात् अद्य यावत्सम्भवन्त्याः क्रमशो हीयमानाया अतिचारचिन्तायाः सर्वथा प्रतिघातो भवति । नवनवतिविशुद्धप्रतिक्रमणाराधनाजन्येन च शुद्धिविशेषेण नूतनाया अतिचारचिन्ताया उत्पादो न भवतीति ।

अतिसूक्ष्ममिदं तत्त्वं प्रशमदृष्ट्या निभालनीयम् ।

यशो.: 'सर्वं' स्थानादि स्वस्मिन्नुपशमविशेषादिफलं जनयदेव परार्थसाधकं स्वसन्निहितानां स्थानादियोगशुद्ध्यभाववतामपि तत्सिद्धिविधानद्वारा परगतस्वसदृशफलसंपादकं पुनः सिद्धिर्भवति ।

चन्द्र.: अधुना सिद्धिरुपं स्थानादि प्रदर्शयति । सर्वं इत्यादि । जनयदेव = न त्वजनयदपि इत्येवकारार्थः । स्वार्थासाधकस्य स्थानादिकस्य परार्थसाधकत्वेऽपि तात्त्विकसिद्धित्वायोगात् । स्थानादियोगशुद्ध्यभाववतामपि स्थानादियोगशुद्धिमतां तु तत्सिद्धिप्राप्तिकारापणं सुकरमेवेत्यपिशब्दार्थः ।

अयं भावः - स्थानादियोगशुद्ध्यभाववन्तो नाम इच्छास्थानादिमन्तः, अपि शब्दात् प्रवृत्तिस्थानादिमन्तः स्थिरस्थानादिमन्तश्च ग्राह्याः, एतेषां सर्वेषां सिद्धिस्थानादिविधानद्वारा परेषु स्वसदृशं फलं जनयतीति । अत्र च स्वस्य सिद्धौ सत्यामपि परेषु सिद्धिविधानं परेषां पात्रतां अपेक्षते, ततश्च पात्रताऽभावे सिद्धिविधानं न स्यात्, पात्रतामन्दतायां सिद्धिविधानं मन्दं स्यात्, एवं इच्छास्थानादिमतः सिद्धिस्थानादिकं प्रायो विलम्बेन स्यात्, स्थिरस्थानादिमतस्तु सिद्धिस्थानादिकं शीघ्रं स्यात् समीपसमीपतरत्वादित्यत्र बहु वक्तव्यं, तत्तु विस्तरभियोपेक्ष्यते । तत्सिद्धिविधानद्वारा = स्थानादिसिद्धिकारापणद्वारा परगतेत्यादि स्वसन्निहितेषु परेषु स्वगतस्य स्थानादिरुपस्योत्पादकत्वमिति भावार्थः, यादृशं स्थानादि स्वेन प्राप्तं, तादृशमेव स्थानादि स्वसान्निध्यं प्राप्तानां जीवानां प्रापकं स्वस्थानादि सिद्धिरुपं स्थानादि कथ्यते ।

यशो.: अत एव सिद्धाऽहिंसानां समीपे हिंसाशीला अपि हिंसां कर्तुं नालम्, सिद्धसत्यानां च समीपेऽसत्यप्रिया अप्यसत्यमभिधातुं नालम् । एवं सर्वत्रापि ज्ञेयम् । 'इतिः' इच्छादिभेदपरिसमाप्तिसूचकः । अत्रायं मत्कृतः संग्रहश्लोकः 'इच्छा तद्वत्कथाप्रीतिः, पालनं शमसंयुतम् । पालनं (प्रवृत्तिः) दोषभीहानिः, स्थैर्यं सिद्धिः परार्थता ॥१॥" इति ॥६॥

चन्द्र.: अत एव यतः सिद्धिरुपं स्थानादि स्वसन्निहितेषु स्वसदृशमेव स्थानादि जनयत्येव तस्मादेव कारणात् सिद्धाहिंसानां इत्यादि । हिंसाशीला अपि आस्तां तावदहिंसाप्रिया इत्यपिशब्दार्थः । असत्यप्रिया अपि = आस्तां तावत्सत्यप्रिया इत्यपिशब्दार्थः । एवं = प्रतिपादितं तत्त्वं सर्वत्रापि = चौर्याब्रह्मपरिग्रहादिष्वपि, न केवलं हिंसाऽसत्ययोरेव इत्यपिशब्दार्थः । इतिः = गाथागतं 'इति' पदं ।

अत्र = इच्छादिप्रतिपादनावसरे मत्कृतः = अत्र यशोविजयाः अस्मत्सर्वनामप्रयोगेण आत्मानं दर्शयन्ति, ततश्च यशोविजयकृत एव स श्लोक इति । सङ्ग्रहश्लोकः = यतः अस्मिन् श्लोके इच्छादीनां चतुर्णामपि

समावेशो भवति, तस्मादयं 'सङ्ग्रहश्लोक' इत्युक्तः ।

श्लोकार्थः सुगम एव ।

व्याख्याता पञ्चमी षष्ठी च कारिके ।

---

यशो.: उक्ता इच्छादयो भेदाः, अथैतेषां हेतूनाह -

**एए य चित्तरूवा, तहाखओवसमजोगओ हुंति ।**

**तस्स उ सद्धापीयाइजोगओ भव्वसत्ताणं ॥७॥**

---

चन्द्र.: अधुना सप्तमी व्याख्यायते ।

एतेषां = इच्छादीनां

सप्तमगाथान्वयार्थस्त्वेवम् → एते च चित्ररुपाः तस्य श्रद्धाप्रीत्यादियोगतो भव्यसत्त्वानां क्षयोपशमयोगतो भवन्ति ← इति ।

---

यशो.: 'एए य' त्ति । 'एते च' इच्छादयः 'चित्ररूपाः' - परस्परं विजातीयाः स्वस्थाने चासङ्ख्यभेदभाजः, 'तस्य तु' अधिकृतस्य स्थानादियोगस्यैव श्रद्धा-इदमित्थमेवेति प्रतिपत्तिः, प्रीतिः तत्करणादौ हर्षः, आदिना धृतिधारणादिपरिग्रहस्तद्योगतः 'भव्यसत्वानां' मोक्षगमनयोग्यानामपुनर्बन्धकादिजन्तूनां 'तथाक्षयोपशमयोगतः' तत्तत्कार्यजननानुकुलविचित्रक्षयोपशमसंपत्त्या भवन्ति,

इच्छायोगादिविशेषे आशयभेदाभिव्यङ्ग्यः क्षयोपशमभेदो हेतुरिति परमार्थः । अत एव यस्य यावन्मात्रः क्षयोपशमस्तस्य तावन्मात्रेच्छादिसंपत्त्या मार्गे प्रवर्तमानस्य सूक्ष्मबोधाभावेऽपि मार्गानुसारिता न व्याहन्यत इति संप्रदायः ॥७॥

---

चन्द्र.: परस्परं विजातीयाः = इच्छायां इच्छात्वजातिः, प्रवृत्तौ प्रवृत्तित्वजातिः, इत्येवमेते परस्परं विरुद्धजातिमन्तः नहि इच्छात्वं प्रवृत्तौ वर्तते, न वा प्रवृत्तित्वं इच्छायां । स्वस्थाने च असङ्ख्येयभेदभाजः = इच्छाया असङ्ख्येयभेदाः, एवं प्रवृत्तेरपि, एवं स्थैर्यादेरपीति भावः । धृतिधारणादिपरिग्रहः अत्रादिपदात् अनुप्रेक्षाध्यानपरिग्रहः, धृत्यादीनामर्थस्तु ग्रन्थान्तरादवसेयः ।

मोक्षगमनयोग्यानां इति । ननु अचरमावर्तिनोऽपि जीवा मोक्षगमनयोग्याः सम्भवन्ति, परन्तु तेषां एते स्थानादयो न भवन्त्येवेति अत आह अपुनर्बन्धकादिजन्तूनां इति । तथा चात्र भव्या अपि अपुनर्बन्धकादिदशायुक्ता एव ग्राह्याः, न त्वचरमावर्तिप्रभृतय इति न दोषः ।

तथाक्षयोपशमयोगतः = तत्तत्कार्येत्यादि । इच्छास्थानादिप्रवृत्तिस्थानादिरुपाणि यानि तत्तत्कार्याणि, तेषामपि प्रतिभेदरुपाणि यानि असंख्येयकार्याणि, तेषां यज्जननं = उत्पत्तिः, तदनुकूला ये विचित्राः = असंख्येयप्रकाराः क्षयोपशमाः = मोहनीयादिकर्मसम्बन्धिनः क्षयोपशमाः, तत्सम्पत्त्या = तत्प्राप्त्या भवन्ति ।

परमार्थमाह इच्छायोगादिविशेषे = इच्छास्थानादिरुपे विंशतिप्रकारात्मके योगे प्रतिभेदापेक्षया च असंख्येयप्रकारात्मके योगे आशयभेदाभिव्यङ्ग्यः = श्रद्धाधृतिधारणाऽनुप्रेक्षाध्यानादिरुपा ये आशयभेदाः, तैः अभिव्यक्तिमापन्नः क्षयोपशमभेदो हेतुः = कारणमिति ।

अयं भावः, श्रद्धाद्याशयभेदैः क्षयोपशमभेदः अभिव्यक्तो भवति, अभिव्यक्तश्च स इच्छास्थानादीनां हेतुर्भवति ।

अत एव = यतो हि श्रद्धाद्याशयभेदा असंख्येयप्रकाराः, ततश्च तदभिव्यङ्ग्या क्षयोपशमप्रकारा अपि असंख्येयप्रकाराः, ततश्च तज्जन्या इच्छायोगादिविशेषा अपि असंख्येयप्रकाराः, ततश्चेच्छायोगादिषु जघन्योत्कृष्टप्रकारमध्ये महदन्तरं सम्भवत्येव, परन्तु यथोत्कृष्टप्रकारवान् मोक्षमार्गानुसारी, तथैव जघन्यादिक्षयोपशमवन्तोऽपि, मोहनीयादिक्षयोपशमसद्भावात् । तस्मात् यस्य जीवविशेषस्य यावन्मात्रः जघन्यमध्यमोत्कृष्टान्यतरमात्रासमन्वितः क्षयोपशमः, तस्य जीवविशेषस्य तावन्मात्रेच्छादिसम्पत्त्या = जघन्यमध्यमोत्कृष्टान्यतरमात्रेच्छायोगादिप्राप्त्या मार्गे मोक्षपथि प्रवर्तमानस्य सूक्ष्मबोधाभावेऽपि = ज्ञानावरणाद्युदयजनितजडतावशात् तादृशसूक्ष्मज्ञानाभावेऽपि माषतुषादिवत् मार्गानुसारिता न व्याहन्यते । श्रद्धाद्याशयभेदाभिव्यङ्ग्यैः क्षयोपशमभेदैः उत्पन्नानामसङ्ख्येयप्रकाराणा-मिच्छायोगादीनामन्यतरस्यापि स्वामिनोऽपुनर्बन्धकादयो मोक्षमार्गानुसारिण एव इति भावः ।

अत्र प्रसङ्गानुसारेण इच्छास्थानादियोगानां विंशतिर्भेदा प्रदर्श्यन्ते ।

(१) इच्छास्थानं, (२) प्रवृत्तिस्थानं, (३) स्थिरस्थानं, (४) सिद्धिस्थानं, (५) इच्छोर्णः, (६) प्रवृत्त्युर्णः, (७) स्थिरोर्णः, (८) सिद्ध्युर्णः, (९) इच्छार्थः, (१०) प्रवृत्त्यर्थः, (११) स्थिरार्थः, (१२) सिद्ध्यर्थः, (१३) इच्छालम्बनं, (१४) प्रवृत्त्यालम्बनं, (१५) स्थिरालम्बनं, (१६) सिद्ध्यालम्बनं, (१७) इच्छानिरालम्बनं, (१८) प्रवृत्तिनिरालम्बनं, (१९) स्थिरनिरालम्बनं, (२०) सिद्धिनिरालम्बनं ।

व्याख्याता सप्तमी कारिका ।

---

**यशो.: इच्छादीनामेव हेतुभेदमभिधाय कार्यभेदमभिधत्ते**

**अणुकंपा निव्वेओ, संवेगो होइ तह य पसमु त्ति ।**
**एएसिं अणुभावा, इच्छाईणं जहासंखं ॥८॥**

---

चन्द्र.: अथाष्टमीकारिकायाः प्रस्तावनामारचयति वृत्तिकृत् । इच्छादीनामेव = येऽधुनाऽभिहिताः तेषामेव,

न त्वन्येषामित्येवकारार्थः । हेतुभेदमभिधाय क्षयोपशमात्मकस्य हेतोः भेदं प्रागेव कथयित्वाऽधुना कार्यभेदं = इच्छादिजन्यानां कार्याणां भेदं अभिधत्ते ।

अष्टमीकारिकाया अन्वयस्त्वेवम् → एतेषामिच्छादीनां यथासङ्ख्यमनुभावाः अनुकंपा निर्वेदः संवेगः प्रशमश्च भवति ← इति ।

---

**यशो.: 'अणुकंप' त्ति । 'अनुकम्पा' - द्रव्यतो भावतश्च यथाशक्ति दुःखितदुःख-परिहारेच्छा, 'निर्वेदः' नैर्गुण्यपरिज्ञानेन भवचारकाद्विरक्तता, 'संवेगः' मोक्षाभिलाषः, तथा 'प्रशमश्च' क्रोधकण्डूविषयतृष्णोपशमः, इत्येते 'एतेषां' इच्छादीनां योगानां यथासङ्ख्यं अनु-पश्चाद् भावाः 'अनुभावाः' - कार्याणि भवन्ति ।**

---

चन्द्र.: द्रव्यतो भावतश्चेत्यादि । अयमाशयः, अनुकम्पा द्विविधा, द्रव्यतोऽनुकम्पा, भावतश्चानुकम्पा । तत्र ये दारिद्र्यादिदुःखपीडिताः, 'तेषां दुःखं अहं यथाशक्ति परिहरामि' इति या इच्छा, सा द्रव्यतोऽनुकम्पा । ये तु धर्महीनाः, मिथ्यात्वादिदोषदुःखिताः, 'तेषां दोषात्मकं दुःखमहं यथाशक्ति परिहरामि' इति या इच्छा, सा भावतोऽनुकम्पेति ।

नैर्गुण्यपरिज्ञानेन = 'सर्वथा गुणविरहितोऽयं भवः' इत्येवंरुपेण ज्ञानेन भवचारकाद् = संसारात्मकाद् कारागृहात् विरक्तता = वैराग्यम् ।

संवेगः = मोक्षालिभाषः । मतान्तरेण निर्वेदसंवेगयोर्व्याख्या विपरीताऽपि गीयते । क्रोधकण्डु इत्यादि । क्रोधात्मिका या कण्डुः, विषयाणां च शब्दादिरुपाणां या तृष्णा, तदुभयस्य उपशमः । यथासङ्ख्यं इति । इच्छायोगजन्याऽनुकम्पा, प्रवृत्तियोगजन्यो निर्वेदः, स्थिरयोगजन्यः संवेगः, सिद्धियोगजन्यश्च प्रशम इति ।

---

**यशो.: यद्यपि सम्यक्त्वस्यैवैते कार्यभूतानि लिङ्गानि प्रवचने प्रसिद्धानि तथापि योगानुभवसिद्धानां विशिष्टानामेतेषामिहेच्छायोगादिकार्यत्वमभिधीयमानं न विरुध्यत इति दृष्टव्यम् ।**

---

चन्द्र.: ननु अनुकम्पादयश्चत्वारः सम्यक्त्वजन्याः सन्तः सम्यक्त्वस्यैव कार्यभूतानि लिङ्गानि, अनुकम्पादिभिः सम्यक्त्वानुमानात् । अत्र तु भवता ते इच्छादियोगजन्या उच्यन्ते, तदेतत् कथं सङ्घटत इति चेत्,

सत्यं, यद्यपि सम्यक्त्वस्यैव = न तु इच्छादियोगानामपीत्येवकारार्थः, प्रवचने = जिनागमे ।

एवं पूर्वपक्षं सत्यीकृत्याऽपि अपेक्षाभेदमवलम्ब्य समाधानमाह तथाऽपि इत्यादि । योगानुभवसिद्धानां = इच्छादियोगस्य यः पञ्चमादिगुणस्थानभावी अनुभवः, तेन प्राप्तानाम्, अत एव विशिष्टानां = सम्यक्त्वजन्यानां

चतुर्थगुणस्थानभाविनां अनुकम्पादीनामपेक्षयोत्तमानां <u>एतेषां</u> = <u>अनुकम्पादीनां</u> <u>इह</u> = प्रस्तुतग्रन्थे <u>इच्छायोगादिकार्यत्वमित्यादि</u>।

अयमाशयः - अनुकम्पादयो द्विविधाः, सामान्या विशिष्टाश्च, तत्र प्रवचने येऽनुकम्पादयः सम्यक्त्वजन्या अभिहिताः, ते सामान्याः चतुर्थगुणस्थानभाविनः। ये तु अत्रोक्ताः, ते विशिष्टाः पञ्चमादिगुणस्थानभाविनः। सामान्याः सम्यक्त्वजन्याः, विशिष्टास्तु इच्छायोगादिजन्याः। चतुर्थगुणस्थाने इच्छायोगादीनां निश्चयतोऽभावान्न विशिष्टा अनुकम्पादयस्तत्र भवन्तीति न परस्परं विरोध इति।

---

**<u>यशो.:</u> वस्तुतः केवलसम्यक्त्वलाभेऽपि व्यवहारेणेच्छादियोगप्रवृतेरेवानुकम्पादि-भावसिद्धेः। अनुकम्पादिसामान्ये इच्छायोगादिसामान्यस्य तद्विशेषे च तद्विशेषस्य हेतुत्वमित्येव न्यायसिद्धम्।**

---

<u>चन्द्र.:</u> एवं तावन्निश्चयनयमतानुसारेण चतुर्थगुणस्थाने इच्छादीनामभावमङ्गीकृत्योक्तम्। परन्त्वेवं सति अनुकम्पादीन् प्रति कारणभेदः स्यात्, सामान्यान् प्रति सम्यक्त्वं, विशिष्टान् प्रति च इच्छादियोगः। एतच्च न युक्तं, कार्यसादृश्ये कारणसादृश्यस्यैव युक्तत्वात्। यदि हि सामान्या विशिष्टाश्च अनुकम्पादयः अनुकम्पात्वादिना सदृशाः, तर्हि तान् प्रति सामान्यं विशिष्टं च केवलं सम्यक्त्वमेव कारणं मन्तव्यं, यदि वा सामान्या विशिष्टा वा केवला इच्छादियोगा एव कारणं मन्तव्यं, येन कारणमेकमेव मन्तव्यं स्यात्।

यथा हि सामान्यघटे सामान्या मृद्, विशिष्टघटे च विशिष्टा मृद् कारणं भवेत्, परन्तु सामान्यघटे मृद्, विशिष्टे च तन्त्वादिकमित्येवं कारणभेदस्तु नैव स्यात्। एवं सामान्यानुकम्पादिषु सामान्यं सम्यक्त्वं सामान्या वा इच्छादियोगाः कारणं, विशिष्टानुकम्पादिषु विशिष्टं सम्यक्त्वं विशिष्टा वा इच्छादियोगा कारणमित्येव युक्तम्। परन्तु सामान्यानुकम्पादिषु सम्यक्त्वं विशिष्टानुकम्पादिषु तु इच्छादियोगा इत्येवं तु न कथमपि युक्तम्।

ततश्च वृत्तिकृत्समाधानान्तरमाह <u>वस्तुतः</u> इत्यादि। <u>केवलसम्यक्त्वलाभेऽपि</u> = विरत्यभावसत्त्वेऽपीति भावार्थः। <u>व्यवहारेण</u> = न तु निश्चयतः। <u>इच्छादियोगप्रवृत्तेरेव</u> = न तु सम्यक्त्वात्सकाशात् इत्येवकारार्थः। <u>तद्विशेषे च</u> = अनुकम्पादिविशेषे च <u>तद्विशेषस्य</u> = इच्छादियोगविशेषस्य <u>हेतुत्वम्</u> = कारणत्वम्। <u>इत्येव</u> = "न त्वेकत्र सम्यकत्वमपरत्र इच्छादिः कारणमिति" इत्येवकारार्थः। <u>न्यायसिद्धम्</u> = युक्तिसङ्गतम्।

तथा च यथा सामान्यघटं प्रति सामान्या मृद् कारणं, एवं सामान्यानुकम्पादीन् प्रति सामान्या योगाः कारणम्।

यथा विशिष्टघटं प्रति विशिष्टा मृद् कारणं, एवं विशिष्टानुकम्पादीन् प्रति विशिष्टा योगाः कारणम्।

ननु एवं सति सम्यक्त्वं अनुकम्पादिकं प्रति कारणं न स्यात् इत्येव भवदभिप्राय आपन्नः, तथा च सति प्रवचनविरोधः, प्रवचने सम्यक्त्वस्य अनुकम्पादिजनकत्वप्रतिपादनात् इति चेत्,

न, यदि हि सम्यक्त्वमात्रं अनुकम्पादिजनकं स्यात्, तर्हि सम्यक्त्वोत्पादकालानन्तर-मेवानुकम्पादिकं स्यात्, कारणे सति शीघ्रमेव कार्यभावात् । यथा सम्यक्त्वोत्पादानन्तरमेवास्तिक्यं प्रादुर्भवति । ततश्च सम्यक्त्वमवश्यं आस्तिक्यकारणम् । परन्तु अनुकम्पादयस्तु सम्यक्त्वलाभात्पश्चात्क्रमभाविनः प्रदर्शिताः, ततश्च ज्ञायते यदुत सम्यक्त्वमात्रं नानुकम्पादिकारणम् ।

तदेवं स्थिते इदमत्र तत्त्वं ।

अपुनर्बन्धकस्य इच्छादियोगाः जघन्यानुकम्पादिकारणानि ।

सम्यग्दृष्टेः सम्यक्त्वं इच्छादियोगाश्च मध्यमानुकम्पादिकारणानि ।

विरतस्य तु विरतिरिच्छादियोगाश्च उत्कृष्टानुकम्पादिकारणानि ।

इत्थं च सम्यक्त्वस्य यदनुकम्पादिजनकत्वमुक्तं, तत् संघटत एव । केवलं सम्यक्त्वस्य न जघन्यानुकम्पादिजनकत्वं, तथा मध्यमानुकम्पाजनकत्वमपि न इच्छादियोगसाहाय्यं विना, किन्तु इच्छादियोगसहितस्यैव सम्यक्त्वस्य मध्यमानुकम्पादिजनकत्वम् । उत्कृष्टनुकम्पादिजनकत्वमपि न चारित्रं इच्छादियोगं च विना, किन्तु तदुभयसहितस्यैवेति सर्व सुस्थम् ।

---

**यशो.: अत एव शमसंवेगनिर्वेदानुकम्पाऽऽस्तिक्यलक्षणानां सम्यक्त्वगुणानां पश्चानुपूर्व्यैव लाभक्रमः प्राधान्याच्चेत्थमुपन्यास इति सद्धर्मविंशिकायां प्रतिपादितम् ॥८॥**

---

चन्द्र.: अत एव = यतः इच्छा, प्रवृत्तिः, स्थिरः, सिद्धिश्चेत्येवंक्रमेण योगप्राप्तिः, यतश्चैव अनुकम्पादीनां इच्छादिजन्यत्वात् प्रथमं इच्छाजन्याऽनुकम्पा, तदनु प्रवृत्तिजन्यो निर्वेदः, तदनु स्थिरजन्यः संवेगः, तदनु च सिद्धिजन्यः प्रशम इति सम्भवति, तस्मादेव कारणात् शमसंवेगेत्यादि । पश्चानुपूर्व्यैव = न तु पूर्वानुपूर्व्या, न वा युगपदेव ।

यदि हि पूर्वानुपूर्व्या लाभः स्यात्, तर्हि प्रथमं प्रशमलाभः स्यात्, न तु अनुकम्पायाः । ततश्च इच्छायोगस्य कार्यमनुकम्पा न स्यात्, इच्छायोगसत्त्वेऽपि प्रशमस्यैव लाभात्, अनुकम्पाया अलाभाच्च । ततश्चेच्छायोगस्यानुकम्पाजनकत्वकथनं व्याहन्येत ।

यदि हि युगपदेव लाभः स्यात्, तर्हि इच्छायोगाद् युगपदेव सर्वेषां लाभात् इच्छायोग एव सर्वेषां हेतुः स्यात्, तथा च सति इच्छा अनुकम्पायाः, प्रवृत्तिः निर्वेदस्येत्येवंक्रमेण या हेतुता प्रतिपादिता, सा न घटेत ।

परन्तु पश्चानुपूर्व्यैव लाभक्रमः प्रतिपादितः, तस्मात्सर्वं घटते । यतः सम्यक्त्वं इच्छा प्रवृत्तिः स्थिरः सिद्धिश्चेत्येवंक्रमेण कारणानि उत्पद्यन्ते, कार्याणि च पश्चानुपूर्व्यनुसारेण आस्तिक्यानुकम्पानिर्वेदसंवेगशमरुपाणि भवेयुः, ततश्च यथासङ्ख्यं सम्यक्त्वादास्तिक्यं, इच्छायाः सकाशात् अनुकम्पा इत्येवं कार्यकारणभावः स्यात्, स च अत्रापि प्रतिपादित इति सर्वं विरोधरहितमेव ।

ननु यदि पश्चानुपूर्व्यैव लाभः, तर्हि एतेषामुपन्यासोऽपि किं लाभक्रमानुसारेण न कृतः ? किमर्थं यस्यान्तिमो लाभः, तस्योपन्यासः प्रथमः ? इति आशङ्कायामाह प्राधान्याच्च = अनुकम्पादीनां मध्ये यः प्रधानः, स प्रथममुपन्यस्तव्य इत्येवं प्राधान्यविवक्षया इत्थं = प्रशमसंवेगादिक्रमेण उपन्यासः इति सद्धर्मविंशिकायां = विंशतिविंशिकाप्रकरणान्तर्गतायां प्रतिपादितम् ।

व्याख्याता अष्टमी कारिका ।

---

**यशो.: तदेवं हेतुभेदेनानुभावभेदेन चेच्छादिभेदविवेचनं कृतम्, तथा च स्थानादावेकैकस्मिन्निच्छादिभेदचतुष्टयसमावेशादेतद्विषया अशीतिर्भेदाः संपन्ना, एतन्निवेदनपूर्वमिच्छादिभेदभिन्नानां स्थानादीनां सामान्येन योजनां शिक्षयन्नाह-**

**एवं ठियम्मि तत्ते, नाएण उ जोयणा इमा पयडा ।**
**चिइवंदणेण नेया, नवरं तत्तण्णुणा सम्मं ॥९॥**

---

चन्द्र.: अधुना नवमीं कारिकां व्याख्यानयन् प्रथमं प्रस्तावनामारचयति वृत्तिकृत् । तदेवं इत्यादिना । हेतुभेदेन = क्षयोपशमभेदात्मकेन अनुभावभेदेन च = अनुकम्पाद्यात्मककार्यभेदेन च ।

एतद्विषयाः = स्थानादिविषया अशीतिर्भेदा संपन्नाः ।

ननु कथमशीतिः ? स्थानादिपञ्चके इच्छादिचतुष्टयसमावेशाद् विंशतिरेव स्यात् । न च इच्छादिचतुष्टयस्यानुकम्पादिचतुष्कात्मककार्यसमावेशेन षोडशविधानम्, ततश्च स्थानादिपञ्चके इच्छादिषोडशकभेदसमावेशादशीतिभेदत्वमिति वाच्यम् । यतो हि इच्छायोगस्य अनुकम्पामात्रजनकत्वं, न तु निर्वेदादिजनकत्वमपि, येन इच्छायोगे अनुकम्पादिचतुष्कसमावेशः स्यात् । ततश्च षोडशविधत्वनिरुपणं न सङ्गतं भवति इति चेत्,

अत्राभयशेखरसूरिकृतानि समाधानानि तत्कृतगुर्जरभाषाविवेचनादवसेयानि, विस्तरभिया नात्रोच्यन्ते, केवलं अशीतिर्भेदाः इति स्थाने विंशतिर्भेदाः इति पाठः सम्भवतीति सुबोधं एकं समाधानमिति ।

तथा "प्रीतिभक्तिवचोऽसङ्गैः स्थानाद्यपि चतुर्विधम्" इति ज्ञानसारपाठात् स्थानादिपञ्चकस्य प्रीत्यादिचतुष्कसमावेशेन विंशतिविधत्वं सिद्धम्, तेषां च विंशतिभेदानां इच्छादिभेदचतुष्कसमावेशेना- शीतिभेदत्वं स्यादिति द्वितीयं समाधानमिति ।

एतन्निवेदनपूर्वं अशीतिभेदनिवेदनपूर्वकं । सामान्येन योजनां = 'स्थानादीनि कथं कर्त्तव्यानि' इति पद्धतिं शिक्षयन्नाह

नवम्या कारिकाया अन्वयस्त्वेवम् → एवं तत्त्वे स्थिते नवरं तत्त्वज्ञेन चैत्यवन्देनेन ज्ञातेन इयं प्रकटा योजना सम्यग् ज्ञेया ← इति ।

यशो.: 'एवं' इत्यादि । 'एवं' अमुना प्रकारेणेच्छादिप्रतिभेदैरशीतिभेदो योगः, सामान्यतस्तु स्थानादिः पञ्चभेद इति 'तत्त्वे' योगतत्त्वे 'स्थिते' व्यवस्थिते 'ज्ञातेन तु' दृष्टान्तेन तु चैत्यवन्दनेन इयं 'प्रकटा' क्रियाभ्यासपरजनप्रत्यक्षविषया 'योजना' प्रतिनियतविषयव्यवस्थापना, 'नवरं'-केवलं तत्त्वज्ञेन 'सम्यग्' अवैपरीत्येन ज्ञेया ॥९॥

चन्द्र.: क्रियाभ्यासेत्यादि । क्रियाया अभ्यासे परो यो जनः, तत्प्रत्यक्षविषयेति ।

प्रतिनियतेत्यादि । अस्मिंश्चैत्यवन्दने अयं स्थानयोगस्य विषयः, अयं चोर्णयोगस्य, अयं अर्थयोगस्य, अयं चालम्बनस्येत्येवं तत्तद्योगस्य यो यः विषयः, तत्तद्व्यवस्थापना ।

केवलं तत्त्वज्ञेन इति । अतत्त्वज्ञस्य तादृशयोजनाज्ञानस्य सम्यक्प्रकारेणासम्भवात् ।

व्याख्याता नवमी कारिका ।

यशो.: तामेवाह -

अरिहंतचेइयाणं, करेमि उस्सग्गं एवमाइयं ।
सद्धाजुत्तस्स तहा, होइ जहत्थं पयन्नाणं ॥१०॥
एयं चऽत्थालंबणजोगवओ पायमविवरीयं तु ।
इयरेसिं ठाणाइसु, जत्तपराणं परं सेयं ॥११॥

चन्द्र.: तामेव = प्रकटां योजनामेव

दशम्या एकादश्याश्चान्वयोऽयम्

→ श्रद्धायुक्तस्य 'अरिहंतचेइयाणं करेमि उस्सग्गं' इत्येवमादिकं तथा यथार्थं पदज्ञानं भवति । एतच्चार्थालम्बनयोगवतः प्रायोऽविपरीतं तु । इतरेषां स्थानादिषु यत्नपराणां परं श्रेयः ← इति ।

यशो.: 'अरिहंत' इत्यादि । 'अरिहंतचेइयाणं करेमि काउस्सग्गं' एवमादि चैत्यवन्दनदण्डकविषयं 'श्रद्धायुक्तस्य' क्रियास्तिक्यवतः 'तथा' तेन प्रकारेणोच्चार्यमाणस्वरसंपन्मात्रादिशुद्धस्फुटवर्णानुपूर्वीलक्षणेन 'यथार्थं'-अभ्रान्तं पदज्ञानं भवति, परिशुद्धपदोच्चारे दोषाभावे सति परिशुद्धपदज्ञानस्य श्रावणसामग्रीमात्राधीनत्वादिति भावः ॥१०॥

चन्द्र.: क्रियास्तिक्यवतः = चैत्यवन्दनक्रियायां श्रद्धावतः, एष च चरमावर्ती एव भवति, अचरमावर्तिनः क्रियास्तिक्यासम्भवात्, क्रियास्तिक्यस्य चरमावर्तलिङ्गत्वात् ।

उच्चार्यमाणेत्यादि । उच्चार्यमाणा ये स्वराः, याः संपदः, याश्च मात्राः, तदादिभिर्विशुद्धा ये स्फुटा वर्णाः, तेषां याऽऽनुपूर्वी क्रमापरपर्याया, तत्स्वरुपेणेत्यर्थः ।

श्रद्धावतोऽभ्रान्तपदज्ञानभवने कारणमाह परिशुद्धेत्यादि । दोषाभावे = बधिरतादिदोषाभावे सति । श्रावणेत्यादि यत् श्रवणेन्द्रियजन्यं प्रत्यक्षं, तत् श्रावणं, तस्य या सामग्री = कारणसमूहः, तन्मात्रापेक्षत्वादित्यर्थः । यदि हि गुर्वादिकृतः पदोच्चारः शुद्धः स्यात्, यदि च श्रोतुः कर्णेन्द्रियगतदोषाभावश्च स्यात्, तर्हि श्रोतुः परिशुद्धपदज्ञानकरणे श्रावणसामग्रीमात्रस्यैवापेक्षा भवति, सा च सामग्री शब्दपुद्गलश्रवणेन्द्रियसम्बन्धः शब्दश्रवणोपयोगः शब्दसमीपवर्तित्वादिकं चेत्येवमादिरुपा । ततश्च युक्तमुक्तं श्रद्धावतः तथाऽभ्रान्तं पदज्ञानं भवतीति ।

नन्वत्र उर्णयोगस्य विषयः प्रतिपादितः, स्थानस्य तु न, ततश्च तद्विषयः कः इति चेत् उपलक्षणात्स अवसेयः, स च प्रतिक्रमणादौ कर्त्तव्यतयोक्तः योगमुद्राजिनमुद्रामुक्तासुक्तिमुद्रा पञ्चाङ्गप्रणिपातादिस्वरुपः ।

---

**यशो.: 'एयं च' त्ति । 'एतच्च' - परिशुद्धचैत्यवन्दनदण्डकपदपरिज्ञानम्, अर्थः- उपदेशपदप्रसिद्धपदवाक्यमहावाक्यैदंपर्यार्थपरिशुद्धज्ञानम्, आलम्बनं च-प्रथमे दण्डकेऽधिकृततीर्थकृद्, द्वितीये सर्वे तीर्थकृतः, तृतीये प्रवचनम्, चतुर्थे सम्यग्दृष्टिः शासनाधिष्ठायक इत्यादि, तद्योगवतः - तत्प्रणिधानवतः 'प्रायः' - बाहुल्येन 'अविपरीतं तु' - अभीप्सितपरमफलसंपादकमेव, अर्थालम्बनयोगयोर्ज्ञानयोगतयोपयोगरूपत्वात्, तत्सहितस्य चैत्यवन्दनस्य भावचैत्यवन्दनत्वसिद्धेः, भावचैत्यवन्दनस्य चामृतानुष्ठान-रूपत्वेनावश्यं निर्वाणफलत्वादिति भावः ।**

---

चन्द्र.: एतच्चेत्यादि । परिशुद्धपदपरिज्ञानं अर्थादियोगवतः प्रायः अविपरीतमेवेति सामान्यतोऽन्वयार्थः । विशेषार्थस्तु प्रदर्श्यते । तत्रोपदेशपदग्रन्थे प्रसिद्धा ये पदार्थवाक्यार्थमहावाक्यार्थैदम्पर्यार्थाः, तैः परिशुद्धं यज्ज्ञानं, तदेवार्थः ।

तत्र 'सर्वे जीवा न हन्तव्याः' 'कारणे सति यतनयाऽऽधाकर्म भुञ्जीयात्' इत्यादिरुपाणां वाक्यानां बोधः पदार्थः,

"यदि सर्वेषामपि जीवानां हननं न कर्तव्यं, तर्हि आधाकर्मभक्षणानुमतिः कथं युक्ता ? तत्र जीवहननावश्यंभावात्, तथा च परस्परं विरोधः" इत्येवं वाक्यद्वयमध्ये विरोधाभासो वाक्यार्थः ।

"प्रमादयोगाद् प्राणव्यापरोपणं एव हिंसा। ततश्च कारणे सति यतनयाऽऽधाकर्मादिभक्षणं प्रमादाभावान्न हिंसा इति न परस्परं विरोध" इत्येवं विरोधपरिहारज्ञानं महावाक्यार्थः

"जिनवचनं नः सर्वत्र प्रमाणम्" इत्येवं जिनवचनबहुमानप्रभृतिभावोल्लास ऐदम्पर्यार्थः। एतेषां चतुर्णां ज्ञानमत्र अर्थयोगरुपं ग्राह्यम्। केवलं प्रकृते चैत्यवन्दनसूत्रसम्बन्धिनां पदार्थादिचतुष्कानां ज्ञानं ग्राह्यमिति।

प्रथमे दण्डके = 'अरिहंतचेइआणं'इत्यादिरुपे। द्वितीय दण्डके = सव्वलोए अरिहंतचेइयाणं इत्यादिरुपे। तृतीये = 'पुक्खरवरदीवड्ढे' इत्यादिरुपे। चतुर्थे = 'सिद्धाणं बुद्धाणं' इत्यादिरुपे।

तत्प्रणिधानवतः = अर्थालम्बनात्मकयोगद्वयोपयोगवतः। अभीप्सितेत्यादि। अत्राभीप्सितं परमफलं मोक्षः, तस्य सम्पादकमेव, न त्वसम्पादकमपीत्येवकारार्थः।

ननु 'परिशुद्धपदपरिज्ञानं अर्थालम्बनयोगवतो बाहुल्येन मोक्षसम्पादकमेव' इत्यत्र किं कारणमिति चेत्? अर्थालम्बनयोगयोः इत्यादि। यतो हि एतौ द्वौ ज्ञानयोगौ, ततो हि तौ उपयोगरुपौ, यतश्च तौ उपयोगरूपौ, ततः ताभ्यां युक्तं चैत्यवन्दनं भावचैत्यवन्दनं सिद्ध्येत् उपयोगयुक्ताया क्रियायाः भावक्रियात्वात्। भावचैत्यवन्दनं च विषगराननुष्ठानतद्धेत्वनुष्ठानेभ्य उपरिवर्ति अमृतानुष्ठानम्, ततश्च तत् अवश्यं मोक्षफलकं भवत्येवेति भावार्थः। एतदनुसारेण वृत्तिपाठोऽध्यवसेयः।

---

**यशो.: प्रायोग्रहणं सापाययोगवद्व्यावृत्त्यर्थम्। द्विविधो हि योगः-सापायो निरपायश्च, तत्र निरुपक्रम(? मं)मोक्षपथप्रतिकूलचित्तवृत्तिकारणं प्राक्कालार्जितं कर्म अपायस्तत्सहितो योगः सापायः, तद्रहितस्तु निरपाय इति,। तथा च सापायार्थालम्बनयोगवतः कदाचित्फलविलम्बसम्भवेऽपि निरपायतद्वतोऽविलम्बेन फलोत्पत्तौ न व्यभिचार इति प्रायोग्रहणार्थः।**

---

चन्द्र.: ननु यदि भावचैत्यवन्दनमवश्यं मोक्षसाधकं, तर्हि मूले पायमविवरीयं तु इत्यादिना प्रायोग्रहणं किमर्थं कृतं? यदि हि तु शब्दं गृहीत्वा 'तस्य मोक्षसाधकत्वमेव' इति प्रतिपादयितुमिष्यते, तर्हि प्रायोग्रहणं कृत्वा 'तस्य मोक्षसाधने विकल्पयुक्तत्वं' इति किमर्थं सूच्यते? इत्याशङ्कायामाह प्रायोग्रहणं सापाययोगवद्व्यावृत्त्यर्थम् = यः सापायो योगः, तद्वन्तो ये जीवाः, तेषां या व्यावृत्तिः = निषेधः, तदर्थम्। तथा च परिशुद्धपदपरिज्ञानं निरपायार्थालम्बनयोगाभ्यां सहितस्यावश्यं मोक्षसाधकमिति भावः।

अत्र प्रसङ्गात् सापायनिरपाययोगयोः स्वरुपं प्रदर्शयन्नाह द्विविधो हि इत्यादि। मोक्षपथेत्यादि। मोक्षमार्गस्य या प्रतिकूला चित्तवृत्तिः विषयकषायादिरुपा, तस्याः कारणं प्राक्कालार्जितं = प्रस्तुतयोगात्पूर्वस्मिन्काले बद्धं कर्म = मिथ्यात्वमोहनीयादि अपायः, तत्सहितो योगः सापायः इति। यद्यपि

स जीवस्तादृशापायसहितो भवति, तथाऽपि जीवे योगो वर्तते, अतो योगोऽपि अपायसहितो वक्तुं शक्यत एव। तद्रहितस्तु = अपायरहितस्तु योगो निरपायः इति।

अयं भावः भावचैत्यवन्दनानुष्ठानवान् जीवो यदि निरुपक्रममोहनीयादिकर्मसत्तावान् न स्यात्, तर्हि भावचैत्यवन्दनप्रभावात् सत्तागतानां सोपक्रममोहनीयादिकर्मणां विनाशात् शीघ्रमेव मोक्षमाप्नुयात्। यदि तु स जीवो निरुपक्रममोहनीयादिसत्तावान् स्यात्, तर्हि सत्यपि भावचैत्यवन्दने तत्कर्मणां क्षयो न स्यात्, ततश्च शीघ्रमेव मोक्षो न स्यात्, परन्तु यदा निरुपक्रमकर्मणां विपाकोदयानुभवाद् विनाशः स्यात्, तदा तत्पश्चात्कालभाविनो भावचैत्यवन्दनाद्यनुष्ठानान्मोक्षः स्यादिति वर्तमानं भावचैत्यवन्दनं तु मोक्षसाधकं न स्यादेवेति।

अत्रेदं बोध्यं सापाययोगवतोऽनुष्ठानं शीघ्रमेव मोक्षसाधकं न भवति, परम्परया तु तस्यापि मोक्षसाधकत्वं न विरुद्धम्।

निष्कर्षमाह तथा च इत्यादि। सापायेत्यादि। निरुपक्रममोहनीयादिकर्मसत्तायुक्तो योऽर्थालम्बनयोगः, तद्युक्तस्य कदाचित्फलविलम्बसम्भवेऽपि = कदाचिन्मोक्षप्राप्तौ विलम्बे सत्यपि निरपायतद्वतो = निरुपक्रमकर्मसत्ताविरहितार्थालम्बनयोगवतः अविलम्बेन = शीघ्रमेव फलोत्पत्तौ मोक्षप्राप्तौ न व्यभिचारः = न योगसत्त्वेऽपि मोक्षात्मककार्याभवनरुपोऽन्वयव्यभिचार इति।

अयमाशयः, यदि हि प्रायोग्रहणं न क्रियेत, तर्हि सापाययोगवतां व्यवच्छेदो न स्यात्, तर्हि अयमर्थो भवेत् यदुत 'परिशुद्धपदपरिज्ञानं अर्थालम्बनयोगवतां अवश्यं मोक्षसाधकम्' इति। तथा चार्थालम्बनयोगवतां तज्ज्ञानं कारणं, मोक्षश्च कार्यमिति कार्यकारणभावः स्यात्, ततश्च सापाययोगवतां तादृशकारणं अस्ति, किन्तु मोक्षो नास्तीति अन्वयव्यभिचारः स्यात्।

प्रायोग्रहणात्तु नेयमापत्तिः, यतो हि प्रायःपदेन सापाययोगवतां व्यवच्छेदः कृतः, ततश्च निरपाययोगवतां परिशुद्धपदपरिज्ञानं कारणं मोक्षश्च कार्यमित्यर्थो भवति। तत्र च न कोऽपि व्यभिचारः, निरपाययोगवतां परिशुद्धपदपरिज्ञानेनावश्यं मोक्षसद्भावादिति।

अत्र 'निरपाययोगवतां परिशुद्धपदपरिज्ञानं' इति वा उच्यतां "भावचैत्यवन्दनादि" इति वोच्यताम्, न तत्र कश्चिद् भेद इति। ननु अत्र सापायार्थालम्बनयोगवतः कदाचित्फलविलम्ब-सम्भवेऽपि इत्याद्युक्तं, तत्र 'कदाचित्' इतिपदं न घटते, यतो हि सापाययोगवतामवश्यं फलविलम्बो भवेदेवेति 'कदाचित्फलविलम्बो भवेत्' इति न वक्तुं युक्तमिति चेत्,

सत्यं, यथा निरुपक्रमं कर्म अपायः, तथैव निरुपक्रमसदृशं कर्मापि अपायः, तच्च सामान्यतो विपाकोदयानन्तरमेव विनश्यति, न तु अध्यवसायप्रभावात्प्रदेशोदयेनैव। तथाऽपि अध्यवसायो यदि विशिष्टः स्यात्, तर्हि तत्कर्म विपाकोदयं विनाऽप्यपगच्छेत्, एवं च तस्य फलविलम्बो न स्यात्।

तथा च सापाययोगवन्तो द्विविधाः, निरुपक्रमकर्मवन्तो निरुपक्रमसदृशकर्मवन्तश्च । तत्र निरुपक्रमकर्मवतामवश्यं फलविलम्बो भवति, निरुपक्रमसदृशकर्मवतां तु फलविलम्बो न स्यादपि इति कृत्वा कदाचित् पदमुपात्तमिति बोध्यम् ।

अथवा 'तवसा उ निकाइयाणं पि' इति पाठाद् ज्ञायते यदुत क्षपकश्रेण्यात्मकध्यानतपसा निरुपक्रमाणामपि कर्मणां क्षयो भवत्येव, ततश्च निरुपक्रमकर्मवतामपि क्षपकश्रेणीसद्भावे फलविलम्बो न स्यात्, तस्मात् तेषां फलविलम्बोऽवश्यंभावी नेति कृत्वा कदाचित्पदमुपात्तमिति ।

---

**यशो.: 'इतरेषां' अर्थालम्बनयोगाभाववतामेतच्चैत्यवन्दनसूत्रपदपरिज्ञानं 'स्थानादिषु यत्नवतां'-गुरूपदेशानुसारेण विशुद्धस्थानवर्णोद्यमपरायणानामर्थालम्बनयोगयोश्च तीव्रस्पृहावतां 'परं'-केवलं श्रेयः, अर्थालम्बनयोगाभावे वाचनायां पृच्छनायां परावर्तनायां वा तत्पदपरिज्ञानस्यानुप्रेक्षाऽसंवलितत्वेन 'अनुपयोगो द्रव्यम्' इति कृत्वा द्रव्यचैत्यवन्दनरूपत्वेऽपि स्थानोर्णयोगयत्नातिशयादर्थालम्बनस्पृहयालुतया च तद्धेत्वनुष्ठानरुपतया भावचैत्यवन्दनद्वारा परम्परया स्वफलसाधकत्वादिति भावः ॥११॥**

---

चन्द्र.: परं = केवलं श्रेयः = न तु अभीप्सितपरमफलसम्पादकं, किन्तु परम्परया तु हितकरमिति भावः । अहितकरं तु नैवेति ।

अत्र कारणमाह अर्थालम्बनयोगाभावे = उपयोगाभावे इति यावत् । वाचनायां = सूत्रग्रहणरुपायां प्रच्छनायां = गृहीतसूत्रविषयकशङ्कादिनिवारणार्थं गुरोः सूत्रविषयकप्रश्नकरणरुपायां परावर्तनायां = सूत्रस्य पुनः पुनः पठनरुपायां तत्पदपरिज्ञानस्य = सूत्रस्य यानि पदानि, गुरुणा स्वेन वोच्चार्यमाणानि, तज्ज्ञानस्य अनुप्रेक्षाऽसंवलितत्वेन = सूत्रार्थस्य आलम्बनस्य च य उपयोगः, स एवात्रानुप्रेक्षा, तद्रहितत्वेन 'अनुपयोगो द्रव्यम्' = उपयोगस्याभावो द्रव्यम् इति कृत्वा इति शास्त्रपाठानुसारेण द्रव्यचैत्यवन्दनरूपत्वेऽपि = भावचैत्यवन्दनत्वाभावेऽपि इति भावार्थः, शेषं स्पष्टम् ।

इदमत्र रहस्यं । ये तु स्थाने उर्णे च यत्नातिशयवन्तः, अर्थे आलम्बने च स्पृहावन्तः, तेषां चैत्यवन्दनाद्यनुष्ठानं अर्थाद्युपयोगाभावात् यद्यपि द्रव्यचैत्यवन्दनमेव, तथाऽपि तत् न विपरीतफलजनकं, न वा निष्फलं । किन्तु तदनुष्ठाने यः प्रयत्नातिशयः, या चार्थादिस्पृहा वर्तते, ताभ्यां तत् तद्धेत्वनुष्ठानं भावचैत्यवन्दनानुष्ठानकारणरुपं भवति, ततश्च यद्यपि तत् न साक्षात् मोक्षं साधयति, किन्तु तत् प्रथमं भावचैत्यवन्दनं साधयति, तद्द्वारा च परम्परया मोक्षमपि साधयत्येवेति द्रव्यानुष्ठानमपि तत् केवलं श्रेयः, न तु साक्षान्मोक्षसाधकं न वाऽश्रेयोऽपीति केवलपदार्थः ।

व्याख्याता एकादशी कारिका,

<u>यशो.:</u> **स्थानादियत्नाभावे च तच्चैत्यवन्दनानुष्ठानमप्राधान्यरूपद्रव्यतामास्कन्दन्निष्फलं (विपरीतफलं )वा स्यादिति लेशतोऽपि स्थानादियोगाभाववन्तो नैतत्प्रदानयोग्या इत्युपदिशन्नाह -**

**इहरा उ कायवासियपायं अहवा महामुसावाओ ।**
**ता अणुरूवाणं चिय, कायव्वो एयविन्नासो ॥१२॥**

<u>चन्द्र.:</u> अधुना द्वादश्याः कारिकाया भूमिकामारचयति ग्रन्थकृत् <u>स्थानादियत्नाभावे च</u> इत्यादि । एकस्तावदर्थालम्बनात्मकज्ञानयोगाभावः, द्वितीयो यदि स्थानोर्णयत्नाभावोऽपि स्यात्, तर्हि तच्चैत्यवन्दनानुष्ठानं <u>अप्राधान्यरुपद्रव्यतां</u> = कार्याजनकद्रव्यतां <u>आस्कन्दन्</u> = प्राप्नुवत् <u>निष्फलं</u> = फलरहितं अननुष्ठानमिति यावत् <u>विपरीतफलं वा</u> = दुर्गत्यादिफलजनकं वा विषगरान्यतररुपमिति यावत् ।

+ यदि हि स्थानोर्णार्थालम्बनरुपाश्चत्वारोऽपि योगाः स्युः, तर्हि चैत्यवन्दनममृतानुष्ठानं स्यात्

+ यदि स्थानोर्णयत्नः स्यात्, अर्थालम्बनयोरभावेऽपि च तत्स्पृहा स्यात्, तर्हि चैत्यवन्दनानुष्ठानं तद्धेत्वनुष्ठानं स्यात्, तच्चामृतानुष्ठानकारणमिति प्रधानं द्रव्यानुष्ठानमुच्यते । अमृतानुष्ठानं च भावानुष्ठानमुच्यते ।

+ यदि च चतुर्णामपि योगानामभावः स्यात् तदा अबाध्येहपरलोकसुखेच्छाऽभावेऽननुष्ठानं स्यात् तच्च न सफलं नापि विपरीतफलकम् ।

+ यदि च चतुर्णां योगानामभावेन सह अबाध्येहलोकसुखेच्छा स्यात्, तर्हि तद् विषानुष्ठानं स्यात्, तच्च विपरीतफलकम् ।

+ यदि च चतुर्णां योगानामभावेन सह अबाध्यपरलोकेच्छा स्यात्, तर्हि तद् गरानुष्ठानं स्यात्, तदपि विपरीतफलकम् ।

एतच्च सर्वमग्रे स्फुटीभविष्यत्येव ।

<u>इति</u> = यतः स्थानादियत्नाभावे चैत्यवन्दनं निष्फलं विपरीतफलं वा स्यात्, तस्मात् कारणात्, <u>लेशतोऽपि</u> = <u>स्थानादियोगाभाववन्तो</u> <u>नैतत्प्रदानयोग्या</u> न चैत्यवन्दनप्रदानायोचिताः, गुरुणा तादृशजीवेभ्यश्चैत्यवन्दनं तत्सूत्राणि वा नैव प्रदातव्यानीति । अणुमात्रोऽपि योगो यदि स्यात्, तदा ते तन्मात्रेणाऽपि चैत्यवन्दनप्रदानयोग्याः, येषां तु अणुमात्रोऽपि योगो न भवेत्, ते चैत्यवन्दनाद्ययोग्या इति भावः ।

द्वादश्याः कारिकायाः अन्वयार्थस्त्वेवम्

→ इतरथा तु कायवासितप्रायं, अथवा महामृषावादः । तस्मादनुरुपाणामेवैतद्विन्यासः कर्त्तव्य ← इति ।

यशो.: 'इहरा उ' त्ति । 'इतरथा तु' - अर्थालम्बनयोगाभाववतां स्थानादियत्नाभावे तु तत् चैत्यवन्दनानुष्ठानं 'कायवासितप्रायं'सम्मूर्च्छनजप्रवृत्तितुल्यकायचेष्टितप्रायं मानसोपयोगशून्यत्वात्, उपलक्षणाद्वाग्वासितप्रायमपि द्रष्टव्यं, तथा चाननुष्ठान-रूपत्वान्निष्फलमेतदिति भावः ।

चन्द्र.: संमूर्च्छनजेत्यादि । सम्मूर्च्छनात् = गर्भप्रक्रियां विनैव उपपातक्रियां विनैव च तथाविधनिमित्तवशाद् ये जाताः ते सम्मूर्च्छनजा उच्यन्ते, मनोरहिता एकेन्द्रियादयो जीवा इति यावत् । तेषां या प्रवृत्तिः तत्तुल्यं यत्कायचेष्टितं तत्प्रायं = तत्सदृशमेतच्चैत्यवन्दनं भवतीति भावः ।

तत्र कारणमाह मानसोपयोगशून्यत्वात् । यथा सम्मूर्च्छनजानां गमनादिक्रिया मानसोपयोगशून्या, तथैवेतेषां जीवानामपि तादृश्येवेति सा सम्मूर्च्छनजप्रवृत्तितुल्येति भावः ।

ननु चैत्यवन्दने न केवलं कायक्रियैव, किन्तु वाक्क्रियाऽपि भवति, सा च तेषां कीदृशी इति शङ्कायामाह उपलक्षणात् = 'कायवासितप्रायं' इतिपदप्राप्तात् वाग्वासितप्रायमपि सूत्रोच्चाराद्यन्वितं तदनुष्ठानं सूत्रोच्चाराद्यंशे सम्मूर्च्छनजवाक्प्रवृत्तितुल्यवाक्चेष्टितसदृशमपि द्रष्टव्यम् ।

निष्कर्षमाह तथा च इत्यादि स्पष्टम् ।

यशो.: 'अथवा' इति दोषान्तरे, तच्चैत्यवन्दनानुष्ठानं महामृषावादः, 'स्थानमौनध्यानैरात्मानं व्युत्सृजामि' (ठाणेणं मोणेणं झाणेणं अप्पाणं वोसिरामि) इति प्रतिज्ञया विहितस्य चैत्यवन्दनकायोत्सर्गादेः स्थानादिभङ्गे मृषावादस्य स्फुटत्वात्,

चन्द्र.: दोषान्तरे = निष्फलात्मको यो दोषः, तदपेक्षयाऽन्यदोषप्रतिपादनार्थं 'अथवा' इति पदमिति भावः । महामृषावादः इति । ननु कथं एष दोषः ? इति जिज्ञासायामाह स्थानेत्यादि ।

अयं भावः अन्नत्थ इत्याद्यागारसूत्रे ठाणेणं मोणेणं इत्याद्यन्तेनैषा प्रतिज्ञा क्रियते यदुत "स्थानेन मौनेन ध्यानेन चात्मानं व्युत्सृजामि" इति । तत्र स्थानेन शरीरस्य मौनेन वाचः ध्यानेन च मनसः व्युत्सर्गकरणप्रतिज्ञाऽस्ति । एतादृशप्रतिज्ञया चैत्यवन्दनगतः यः कायोत्सर्गादिः विधीयते, तस्य ये जिनमुद्रादिरुपाः स्थानादयः, तेषां यदि भङ्गः क्रियते, तर्हि स्फुट एव मृषावादः, कृतप्रतिज्ञाया भङ्गात् ।

यशो.: स्वयं विधिविपर्ययप्रवृत्तौ परेषामेतदनुष्ठाने मिथ्यात्वबुद्धिजननद्वारा तस्य लौकिकमृषावादादतिगुरुत्वाच्च, तथा च विपरीतफलं तेषामेतदनुष्ठानं सम्पन्नम्,

चन्द्र.: ननु भवतु नाम मृषावादः, महामृषावादस्तु कथमित्यतस्तस्य महत्त्वं प्रदर्शयति स्वयं इत्यादि। यदि हि स स्वयमेवानुष्ठानेऽविधिमाचरेत्, तर्हि ये मुग्धजनास्तदनुष्ठानं पश्येयुः, तेषां "एतादृशमेवानुष्ठानं कर्त्तव्यं, एष एव विधिः, अनेन साधुना तथैव क्रियमाणत्वात्" इति बुद्धिर्भवति। सा च बुद्धिरविधौ विधिज्ञानात्मिका, अजिनवचने जिनवचनात्मिकेति मिथ्यात्वबुद्धिः, ततश्चास्यैतदनुष्ठानं परेषां मिथ्यात्वबुद्धिजनकमिति कृत्वा लौकिकमृषावादसकाशादतिगुरु इति तन्महामृषावादः इति। लौकिकमृषावादो हि न मिथ्यात्वबुद्धिजनकः, इदं च तथाऽस्तीति तस्य लौकिकमृषावादसकाशान्महत्त्वमिति भावः।

लौकिकमृषावादो नाम घटाभाववति भूतले "घटवद् भूतलं" इत्यादिवचनरुप इति।

---

**यशो.: येऽपि स्थानादिशुद्धमप्यैहिककीर्त्यादीच्छयाऽऽमुष्मिकस्वर्लोकादिविभूतीच्छया चैतदनुष्ठानं कुर्वन्ति तेषामपि मोक्षार्थकप्रतिज्ञया विहितमेतत्तद्विपरीतार्थतया क्रियमाणं विषगरानुष्ठानान्तर्भूतत्वेन महामृषावादानुबन्धित्वाद्विपरीतफलमेवेति।**

---

चन्द्र.: ननु अभव्यादयो जीवा इहलोकसुखादीच्छया चैत्यवन्दनादि कुर्वन्ति, परन्तु ते स्थानादिविधिं पालयन्त्येव, ततश्च तेषां विहितायाः प्रतिज्ञाया भङ्गो नास्तीति तेषां चैत्यवन्दनादि न मृषावादः, ततश्च तद् विपरीतफलं न स्यात्, किन्तु भवति। तत्र किं कारणमिति जिज्ञासायामाह येऽपि = ये तु स्थानादिशुद्धमपि = आस्तां तावत्तदशुद्धमित्यपिशब्दार्थः।

तेषामपि = न केवलं स्थानाद्यविधिकर्तृणामेवेत्यपिशब्दार्थः।

मोक्षार्थकप्रतिज्ञया इत्यादि। अयं भावः 'अरिहंत चेइयाणं' इतिसूत्रे यत् 'निरुवसग्गवत्तिआए' इति पदमस्ति, तस्यार्थस्त्वयमेव यदुत 'मोक्षार्थमिदं कायोत्सर्गादि करोमि' इत्यादि। ततश्च शास्त्रे इदं कायोत्सर्गादि मोक्षार्थकप्रतिज्ञया विहितमस्ति, यदि च अभव्यादिभिः मोक्षविपरीतसंसारसुखेच्छया तत् क्रियते, तर्हि तथा क्रियमाणं तत् विषानुष्ठाने गरानुष्ठाने वाऽन्तर्भवति, ततश्च तन्महामृषावादानुबन्ध्येव भवति, मोक्षार्थकप्रतिज्ञाया लोपात्। तस्मात् स्थानादिशुद्धमपि तत् विपरीतफलमेव भवतीति।

स्थानादिविधिरहितमनुष्ठानं "ठाणेणं मोणेणं..." इत्यादिपदकृतप्रतिज्ञालोपात् विपरीतफलकमेव, स्थानादिविधिशुद्धमपि अबाध्यसंसारसुखेच्छासहितं अनुष्ठानं 'निरुवसग्गवत्तिआए' इत्यादिपदकृतप्रतिज्ञालोपात् विपरीतफलमिति उभयत्र प्रतिज्ञाभङ्गात् महामृषावादः, ततश्च विपरीतफलकत्वं स्पष्टमेवेति।

ननु स्थानादिविधिरहितमनुष्ठानमननुष्ठानं निगदितम्, स्थानादिविधिशुद्धं अबाध्यफलेच्छासहितं तु विषगराद्यन्यतररुपं निगदितम्। उभयत्र विपरीतफलकत्वं प्रतिपादितम्। परन्तु तन्न घटते। किं अननुष्ठानं विषगरसदृशं ? येन तद् विषगरवत् विपरीतफलकं स्यात् ?

किञ्चाननुष्ठाने यथा मोक्षेच्छा नास्ति, तथा संसारसुखाबाध्याभिलषोऽपि नास्ति, ततश्च तत्र न प्रकटा भवाभिनन्दिता, विषगरयोस्तु संसारसुखाबाध्याभिलाषोऽस्त्येवेति तत्र प्रकटैव भवाभिनन्दिता । ततश्च विषगरापेक्षयाऽननुष्ठानमत्यल्पं अशोभनमिति कृत्वा एतेषां त्रयाणां समानमेव फलं यत्प्रतिपादितं, तन्न घटत इति चेत्,

अत्रोत्प्रेक्ष्यते ।

यदननुष्ठानमनुपयोगमात्रादेवाननुष्ठानं तन्निष्फलमेव, परन्तु यदननुष्ठानं न केवलमनुपयोगमात्रान्वितम्, किन्तु अनुष्ठानं प्रति द्वेषोऽनादरो निष्ठुरता इत्यादिरुपदोषान्वितं, तदननुष्ठानं विपरीतफलकमपीति ।

यत्र सदनुष्ठानरागाभावः, सदनुष्ठानद्वेषाभावः, सर्वथाऽनुपयोगश्च, तदननुष्ठानं निष्फलमेव, न तु विपरीतफलकम्, यत्र तु सदनुष्ठानद्वेषादिपरिणामोऽप्यस्ति, तदननुष्ठानं विपरीतफलकमपीति निष्कर्षः ।

यथा साधुः मिथ्यात्वी च निद्रादशां समापन्नौ समानौ एव दृश्येते, न तत्र साधौ साधुगुणा न वा मिथ्यात्विनि मिथ्यात्विदोषाः प्रकटा दृश्यन्ते । तथाऽपि साधोः अन्तः षष्ठगुणस्थानभावात् तदनुसारेण कर्मबन्धो भवति, मिथ्यात्विनस्तु अन्तः प्रथमगुणस्थानभावात्तदनुसारेण कर्मबन्धो भवति ।

एवं यस्य अन्तः अचरमावर्तित्वादयो दोषाः सन्ति, तस्य यदननुष्ठानं, यस्य च अन्तः अचरमावर्तित्वादयो दोषा न सन्ति, तस्य यदननुष्ठानं, एते द्वे अपि समाने एव दृश्येते, तथाऽपि अन्तोऽचरमावर्तित्वादिदोषवतोऽननुष्ठानं विपरीतफलकं भवति, अन्तोऽचरमावर्तित्वादिदोषरहितस्य त्वननुष्ठानं केवलं निष्फलमेव भवति, न तु विपरीतफलकमिति ।

इत्थं चाचरमावर्तित्वादिदोषरहितजीवगताननुष्ठानमपेक्ष्य निष्फलत्वं निगदितं, तादृशदोषयुक्तजीवगताननुष्ठानमाश्रित्य तु विपरीतफलकत्वं प्रतिपादितम् । विषगरयोस्तु स्फुटमेव भवाभिनन्दित्वादिदोषसद्भावात् विपरीतफलकत्वमेव, न तु निष्फलत्वमात्रमित्यत एव तत्र निष्फलत्वं नोक्तमिति ।

अध्यात्मसारे तु 'अकामनिर्जराङ्गत्वं कायक्लेशादिहोदितम्' इति वचनेन अननुष्ठानस्य यदकामनिर्जराकारणत्वमुक्तं, विपरीतफलकत्वं च नोक्तं, तेनापि प्रकृतोऽर्थो गम्यते इति सूक्ष्ममध्यवसेयम् ।

अत्र बहु वक्तव्यमपि विस्तरभियोपेक्ष्यते ।

---

**यशो.: विषाद्यनुष्ठानस्वरूपं चेत्थमुपदर्शितं पतञ्जल्याद्युक्तभेदान् स्वतन्त्रेण संवादयता ग्रन्थकृतैव योगबिन्दौ 'विषं गरोऽननुष्ठानं, तद्धेतुरमृतं परम् । गुर्वादिपूजानुष्ठानमपेक्षादिविधानतः' ॥ (१५५ श्लोक०) ॥ 'विषं' स्थावरजङ्गमभेदभिन्नम्, ततो विषमिव विषम्, एवं गर इव गरः, परं गरः**

कुद्रव्यसंयोगजो विषविशेषः, 'अननुष्ठानं' अनुष्ठानाभासं, 'तद्धेतुः' अनुष्ठानहेतुः, अमृतमिवामृतं अमरणहेतुत्वात्, 'अपेक्षा' इहपरलोकस्पृहा, आदिशब्दादनाभोगादेश्च यद् विधानं - विशेषस्तस्मात् ॥

---

चन्द्र.: अत्र प्रसङ्गाद् विषाद्यनुष्ठानानि निरुपयितुकामो वृत्तिकृदाह विषाद्यनुष्ठानेत्यादि । पतञ्जल्याद्युक्तेत्यादि । तथा च यद्यपि एते भेदा न साक्षाज्जिनागमे दृश्यन्ते, किन्तु पतञ्जलिप्रभृति जैनेतरकृतग्रन्थेषु दृश्यन्ते, तथाऽपि अनेकान्तवादमये जिनप्रवचने ते भेदा अपेक्षाविशेषेण संघटन्त एवेति स्याद्वादबोधपरिणतमानसैः हरिभद्रसूरिभिः ते भेदा जैनग्रन्थेऽन्तर्भाविता इति ।

किञ्च यद्यपि एते भेदाः तैरेवाभिधानैः वर्तमानकालीनशास्त्रेषु न दृश्यन्ते, तथापि अभिधानान्तरेण पदार्थरुपेण च सन्त्येव । किञ्च विच्छेदं गते चरमाङ्गे एते एव भेदा एतैरेवाभिधानैः स्युरपीति दृढं मनसि निश्चेतव्यम् ।

ग्रन्थकृतैव = योगविंशिकाकृता हरिभद्रसूरिणैव, न त्वन्येनेत्येवकारार्थः ।

योगबिन्दुगाथान्वयस्त्वेवम् → गुर्वादिपूजानुष्ठानं अपेक्षादिविधानतः विषं गरोऽननुष्ठानं तद्धेतुः परं अमृतं (च अस्ति) ← इति ।

स्थावरं = स्थिरं जङ्गमं = सर्पादि ।

अनुष्ठानं साक्षाद् न विषं, किन्तु विषसदृशकार्यकारित्वात् विषसदृशं, ततश्च "अनुष्ठानं विषं" इत्युक्तिर्न सङ्गच्छत इत्यत आह विषमिव विषं = विषसदृशमित्याशयः । एवं = विषवत् परं = विषाद् गरे यो भेदः, तत्प्रतिपादनपरं इदं 'परं' इति पदम् ।

अनाभोगादेश्च = अत्रादिपदात् क्रियापरतादिग्रहः ।

विशेषः = भेदः, तारतम्यमिति ।

---

यशो.: 'विषं लब्ध्याद्यपेक्षातः, इदं सच्चित्तमारणात् । महतोऽल्पार्थनाज्ज्ञेयं लघुत्वापादनात्तथा' ॥ (१५६ श्लोक) लब्ध्यादेः-लब्धिकीर्त्यादेः अपेक्षातः-स्पृहातः 'इदं' अनुष्ठानं विषं 'सच्चित्तमारणात्' परिशुद्धान्तःकरणपरिणामविनाशनात्, तथा महतोऽनुष्ठानस्य 'अल्पार्थनात्' - तुच्छलब्ध्यादिप्रार्थनेन लघुत्वस्यापादनादिदं विषं ज्ञेयम् ।

---

चन्द्र.: विषानुष्ठानप्रतिपादकगाथान्वयस्त्वेवम् → लब्ध्याद्यपेक्षातः इदं सच्चित्तमारणात् महतोऽल्पार्थनाल्लघुत्वापादनात्तथा विषं ज्ञेयं ← इति ।

एतद्गाथायाः वृत्तिकृदुक्तं विवरणं स्पष्टमेव । नवरं मुग्धजनावबोधाय अधिकं स्पष्टं क्रियते । तथाहि - यदनुष्ठानं लब्धिकीर्त्याद्यपेक्षया क्रियते, तदनुष्ठानं विषमुच्यते ।

ननु किमर्थं तत् विषमुच्यते इत्याशङ्कानिराकरणार्थमुच्यते-द्वाभ्यां कारणाभ्यां तद् विषमुच्यते । तत्रेदमनुष्ठानं परिशुद्धस्यान्तःकरणपरिणामस्य विनाशकमिति तद् विषमुच्यते इत्येकं कारणम् ।

तथा चैत्यवन्दनाद्यनुष्ठानं मोक्षसाधकत्वात् महत्, ततश्च तत्सकाशात्तुच्छानां संसारसुखानां प्रार्थनं यत्क्रियते, तेन तदनुष्ठानस्य हीलना लघुताऽपरपर्याया भवति, ततश्च लब्ध्याद्यपेक्षायुतमेतदनुष्ठानं विषं उच्यते इति द्वितीयं कारणम् ।

---

**यशो.: 'दिव्यभोगाभिलाषेण, गरमाहुर्मनीषिणः । एतद्विहितनीत्यैव, कालान्तरनिपातनात्' (१५७ श्लोक०) ॥ 'एतद्' अनुष्ठानं, ऐहिकभोगनिस्पृहस्य स्वर्गभोगस्पृहया गरमाहुः 'विहितनीत्यैव' विषोक्तनीत्यैव, केवलं कालान्तरे भवान्तररूपे निपातनात्- अनर्थसम्पादनात् । विषं सद्य एव विनाशहेतुः, गरश्च कालान्तरेणेत्येवमुपन्यासः ॥**

---

चन्द्र.: गरानुष्ठानप्रतिपादकगाथान्वयस्त्वेवम् → मनीषिणः एतद् दिव्यभोगाभिलाषेण विहित नीत्यैव कालान्तरनिपातनात् गरमाहुः ← इति ।

विषोक्तनीत्यैव इति । यथा विषानुष्ठानं सच्चित्तनाशकत्वात् महदनुष्ठानस्याल्पताऽऽपादक- त्वाच्च विषमुच्यते, एवमेव गरानुष्ठानमपि ताभ्यामेव कारणाभ्यां गरमुच्यते ।

ननु तर्हि अनयोः को भेद इत्यत आह केवलं इत्यादि । गरानुष्ठानं भवान्तरे सच्चित्तं नाशयति, विषानुष्ठानं च शीघ्रमेवेति कृत्वाऽनयोर्भेदः, नान्यः कश्चिदिति ।

अत्रानर्थः = सच्चित्तनाशः ।

एवमुपन्यासः = विषगरयोर्भेदेनोपन्यासः ।

इदमत्र रहस्यं ।

विषानुष्ठानकाले अबाध्या इहलोकसुखेच्छाऽस्ति, शुभश्च बाह्ययोगोऽस्ति । ततश्च शुभयोगप्रभावात् तादृशं पुण्यं बध्यते, यत्पुण्यं अनुष्ठातृपुरुषस्य इच्छानुसारेण इहलोकसुखं दद्यात् । परन्तु अबाध्येहलोकसुखेच्छायाः तीव्रमिथ्यात्वजन्यत्वात्, तदानीं तीव्रमिथ्यात्वोदयेन नूतनं तीव्रं मिथ्यात्वं बध्यते । ततश्च तत्पुण्यं तीव्रमिथ्यात्वान्वितं बध्यते इति पापानुबन्धि पुण्यकर्म बध्यते । यदा च अनुष्ठातुरिच्छानुसारेण तत्पुण्यमिहलोके उदयमायाति, तदा तस्य इहलोकसुखेच्छा पूर्णा भवति, परन्तु तदानीमेव तत्पुण्येन सह बद्धं तीव्रमिथ्यात्वमपि उदयमायाति, तच्च जीवं इहलोकसुखादिषु अत्यन्तं आसक्तं करोति, न तु वैराग्यं तस्य जीवस्य विद्यते । इत्थं

च प्राप्तेषु इहलोकसुखादिषु यस्तीव्रः रागभावो वैराग्याभावश्च स एव सच्चित्तनाश इत्युच्यते ।

अत्र "विषानुष्ठानं अनुष्ठानकाल एव सच्चित्तं विनाशयति" इति केषाञ्चिद् यन्मतं, तत् सर्वथा दुष्टम् । न हि विषानुष्ठानं अनुष्ठानकाले, किन्तु तद्भवे भोगाप्तिकाले सच्चित्तं नाशयति । तथा चाध्यात्मसारपाठः → स्थावरं जङ्गमं चापि, तत्क्षणं भक्षितं विषं, यथा हन्ति तथेदं, सच्चित्तमैहिकभोगतः ← इति । अत्र ऐहिकभोगत एव सच्चित्तनाशकत्वमुक्तं, न त्वनुष्ठानकाल एव ।

किञ्च सच्चित्तनाशः कार्यं, विषानुष्ठानं च तस्य कारणम् । कारणं च कार्यात्प्राक्कालभावि भवति । ततश्च प्रथमं विषानुष्ठानं तदनन्तरं च सच्चित्तनाशः इति अवश्यं मन्तव्यम् । विषानुष्ठानकाले तु अनुष्ठानात्प्रागेव अबाध्यैहिकसुखेच्छा समुत्पन्ना, तत्प्रेरणयैव तदनुष्ठानमारब्धमिति अनुष्ठानात्प्रागेव सच्चित्तं विनष्टं ! सच्चित्तनाशादेव च विषानुष्ठानमुत्पन्नम् । ततश्चानुष्ठानकालात्तु प्रथममेव सच्चित्तनाशः, तदनन्तरं च विषानुष्ठानमस्ति, इति विषानुष्ठानं अनुष्ठानकाले सच्चित्तनाशकं कथं वक्तुं युज्यते ?

यदि तु ऐहिकभोगाप्तिकाले विषानुष्ठानं सच्चित्तनाशकमुच्येत, तर्हि न दोषः । यतो हि विषानुष्ठानात् पापानुबन्धि पुण्यं, तस्माच्चैहिकसुखाप्तिः, किन्तु विषानुष्ठानजन्यात् पापानुबन्धात् तीव्रमिथ्यात्वमोहरुपात् तदानीं ऐहिकसुखे तीव्राभिलाषो भवति, अयमेव च सच्चित्तविनाशः, ततश्च विषानुष्ठानं स्वजन्यपापानुबन्धद्वारा, सच्चित्तविनाशजनकमिति सर्वं सुस्थम् ।

न च <u>'सद्यः'</u> इति पदं दृष्ट्वा व्यामोहः कार्यः, यथा गरानुष्ठाने <u>कालान्तरे</u> इत्यस्य <u>भवान्तरे</u> इत्यर्थः कृतः, तथैव <u>सद्यः</u> इत्यस्य इहभवे भोगाप्तिकाल इत्येवार्थः कर्त्तव्यः । सद्यपदस्य कालान्तरपदवत् रूढ्यर्थप्रतिपादकत्वौचित्यात् । किञ्चाध्यात्मसारपाठस्तु स्पष्ट एव ।

किञ्च द्वात्रिंशद्द्वात्रिंशिकायां महोपाध्यायैरुक्तं यदुत → यस्य इहपरलोकोभयसुखेच्छा स्यात्, तस्यानुष्ठानं विषं वा ? गरं वा ? उभयेच्छाया विद्यमानत्वादिति प्रश्नः, तत्र समाधानं त्विदम् यदि इहलोकसुखेच्छा परलोकसुखेच्छासकाशात्तीव्रा, तर्हि विषं, अन्यथा तु गरं ← इति ।

इत्थं च परलोकसुखेच्छा इहलोकसुखेच्छासकाशात्तीव्राऽपि सम्भवतीत्यनेन सिद्धम् । इत्थं च यदि इहलोकसुखेच्छा अनुष्ठानकाले एव सच्चित्तनाशिका, तर्हि तत्सकाशात्तीव्रा परलोकसुखेच्छा सुतरां अनुष्ठानकाले एव सच्चित्तनाशिका स्यात्, तथा च तद्युक्तमनुष्ठानं विषमेव स्यात्, न तु गरम् । प्रतिपादितं तु गरमेवेति स्पष्टमेव मन्तव्यं यदुत प्राक्प्रतिपादितमेव युक्तमिति ।

गरानुष्ठानकाले तु अबाध्या परलोकस्पृहाऽस्ति, शुभश्च बाह्ययोगो भवति । तत्रापि शुभबाह्ययोगप्रभावात् तादृशं पुण्यं बध्यते, यत् परभवे अनुष्ठातुरिच्छानुसारेण परलोकसुखं दद्यात् । परन्तु अबाध्यपरलोकसुखेच्छायाः तीव्रमिथ्यात्वमोहजन्यत्वात् तदानीं तीव्रमिथ्यात्योदयेन नूतनं तीव्रं मिथ्यात्वं बध्यते । ततश्च तत्पुण्यं तीव्रमिथ्यात्वान्वितं बध्यत इति पापानुबन्धि पुण्यं बध्यते । यदा चानुष्ठातुरिच्छानुसारेण तत्पुण्यं परलोके

उदयमायाति, तदा तस्य परलोकसुखेच्छा पूर्णा भवति, परन्तु तदानीमेव तत्पुण्येन सह बद्धं तीव्रमिथ्यात्वमपि उदयमायाति, तच्च जीवं परलोकसुखादिषु अत्यन्तं आसक्तं करोति । न तु वैराग्यं तस्य जीवस्य प्रादुर्भवति । इत्थं च प्राप्तेषु परलोकसुखादिषु यो रागभावो वैराग्याभावश्च, स एव सच्चित्तविनाश इत्युच्यते ।

अत्र गरानुष्ठानं स्वजन्यपापानुबन्धात्तीव्रमिथ्यात्वरुपात्सच्चित्तं नाशयतीति ।

इदन्तु बोध्यं मिथ्यात्वमोहनीयस्य तीव्ररसः पापानुबन्धः, ऐहिकसुखादिषु तीव्रासक्त्युपयोगाभावः सच्चित्तं, तच्च ऐहिकसुखादिप्राप्त्या तत्र तीव्रासक्त्युपयोगोद्भवाद् विनश्यतीति ।

अत्र बहु वक्तव्यमवशिष्टं, तथाऽपि विरम्यते अधिकविस्तरभयात्, सामान्यविस्तरस्तु विभ्रमापोहाय कृत एवेति ।

---

**यशो.: 'अनाभोगवतश्चैतदननुष्ठानमुच्यते । सम्प्रमुग्धं मनोऽस्येति, ततश्चैतद्यथोदितम्' ( १५८ श्लोक० ) ॥ 'अनाभोगवतः' कुत्रापि फलादावप्रणिहितमनसः 'एतद्' अनुष्ठानं 'अननुष्ठानं' अनुष्ठानमेव न भवतीत्यर्थः । सम् इति समन्ततः प्रकर्षेण मुग्धं सन्निपातोपहतस्येवानध्यवसायापन्नं मनोऽस्य, 'इतिः' पादसमाप्तौ । यत एवं ततो यथोदितं तथैव ॥**

---

चन्द्र.: अनाभोगानुष्ठानप्रतिपादकगाथामाह अनाभोगवतश्चेत्यादि । वृत्तिकृदेव गाथागतानां केषाञ्चित्पदानां अर्थमाह अनाभोगवत इत्यादि । फलादौ = आदिपदात् सूत्रार्थालम्बनादयो ग्राह्याः । अनुष्ठानाभवने कारणमाह सम् इत्यादि ।

यत एवं = यस्मात्कारणादस्य जीवस्य मनः सन्निपातोपहतजीववत् अध्यवसायरहितं भवति, ततो = तस्मात् यथोदितं = "अननुष्ठानं" इति यदुक्तं तथैव = अननुष्ठानमेवेति ।

---

**यशो.: 'एतद्रागादिदं हेतुः, श्रेष्ठो योगविदो विदुः । सदनुष्ठानभावस्य, शुभभावांशयोगतः ॥' ( १५९ श्लोक० ) ॥ 'एतद्रागात्' सदनुष्ठानबहुमानात् 'इदं' आदिधार्मिककालभावि देवपूजाद्यनुष्ठानं 'सदनुष्ठानभावस्य' तात्त्विकदेवपूजाद्याचार-परिणामस्य मुक्त्यद्वेषेण मनाग् मुक्त्यनुरागेण वा शुभभावलेशयोगात् 'श्रेष्ठो' अवन्ध्यो हेतुरिति योगविदो 'विदुः' जानते ।**

---

चन्द्र.: तद्धेत्वनुष्ठानगाथामाह एतद्रागादित्यादि ।

वृत्तिकृदेव तद्विवरणमाह एतद्रागादित्यादि ।

सदनुष्ठानबहुमानात् = मोक्षमार्गतया अभिप्रेतेऽनुष्ठाने बहुमानात् । आदिधार्मिकेत्यादि । अपुनर्बन्धकदशाभावि इत्यर्थः । देवपूजाद्यनुष्ठानं आदिशब्दाज्जपतत्त्वचिन्तनादिपरिग्रहः । तात्त्विकदेवपूजाद्याचारपरिणामस्य अमृतानुष्ठानरुपो यो देवपूजाद्याचारपरिणामः, तस्य । 'अवन्ध्यो हेतुः' इत्यनेन सहास्यान्वयः कर्त्तव्यः ।

अयं भावः तद्धेत्वनुष्ठानं अमृतानुष्ठानपरिणामस्य श्रेष्ठो हेतुः इति योगविदो विदुः । किं तत्र कारणमिति चेत्, इदं, अस्मिन्ननुष्ठाने यो मुक्त्यद्वेषरुपो मनाक् मुक्त्यनुरागरुपो वा यः शुभभावलेशो विद्यते, तत्संपर्कात् इदमनुष्ठानं अमृतस्य श्रेष्ठो हेतुरिति ।

गाथान्वयस्त्वेवम् → एतद्रागाद् इदमनुष्ठानं शुभभावांशयोगतः सदनुष्ठानभावस्य श्रेष्ठो हेतुः इति योगविदो विदुः । ← इति ।

---

**यशो.: 'जिनोदितमिति त्वाहुर्भावसारमदः पुनः । संवेगगर्भमत्यन्तममृतं मुनिपुङ्गवाः' ( १६० श्लोक० ) ।। जिनोदितमित्येव 'भावसारं' श्रद्धाप्रधानं 'अदः' अनुष्ठानं 'संवेगगर्भं'-मोक्षाभिलाषसहितं 'अत्यन्तं' अतीव अमरणहेतुत्वादमृतसंज्ञमाहुः 'मुनिपुङ्गवाः' गौतमादिमहामुनयः ।।**

---

चन्द्र.: अमृतप्रतिपादकगाथामाह जिनोदितमित्यादि ।

गाथान्वयस्त्वेवम् → जिनोदितमिति तु भावसारं अत्यन्तं संवेगगर्भं अदः पुनः मुनिपुङ्गवाः अमृतमाहुः । ← इति ।

जिनोदितमित्येव । तुरेवकारार्थः ।

---

**यशो.: एतेषु त्रयं योगाभासत्वादहितम् । द्वयं तु सद्योगत्वाद्धितमिति तत्त्वम् । यत एवं स्थानादियत्नाभाववतोऽनुष्ठाने महादोषः 'तत्' तस्मात् 'अनुरूपाणामेव'-योग्यानामेव 'एतद्विन्यासः'-चैत्यवन्दनसूत्रप्रदानरूपः कर्तव्यः ।।१२।।**

---

चन्द्र.: एवं अनुष्ठानपञ्चकं योगबिन्दुगाथानुसारेण प्रदर्श्याधुना निष्कर्षमाह - एतेषु = पञ्चसु अनुष्ठानेषु त्रयं = विषं गरमननुष्ठानं च योगाभासत्वात् = योगवदाभासन्ते, न तु परमार्थतो योगा इति योगाभासाः, तद्रुपत्वात् अहितं = निष्फलं विपरीतफलं वा । द्वयं तु = तद्धेतुरमृतं च सद्योगत्वात् = शोभनयोगरुपत्वात् हितम् = सफलमिति भावः ।

यत एवं = प्रतिपादितरीत्या ।

शेषं स्पष्टम् ।

विषाद्यनुष्ठानरहस्यं तु ग्रन्थान्तरात् अस्यैव ग्रन्थस्य परिशिष्टाद् वा विज्ञेयमिति ।

व्याख्याता द्वादशी कारिका ।

---

यशो.: के एतद्विन्यासानुरूपा इत्याकाङ्क्षायामाह -

जे देसविरइजुता, जम्हा इह वोसिरामि कायं ति ।

सुच्चइ विरईए इमं, ता सम्मं चिंतियव्वमिणं ॥१३॥

---

चन्द्र.: अधुना त्रयोदश्याः कारिकायाः प्रस्तावनामाह के एतद्विन्यासानुरुपा इत्यादि ।

त्रयोदश्याः कारिकाया अन्वयस्त्वेवम्

→ ये देशविरतियुक्ताः । यस्मादिह कायं व्युत्सृजामीति श्रूयते । इदं च विरतौ । तस्मादिदं सम्यक् चिन्तितव्यम् ← इति ।

---

यशो.: 'जे' इत्यादि । ये 'देशविरतियुक्ताः' पञ्चमगुणस्थानपरिणतिमन्तः ते इह अनुरुपा इति शेषः । कुतः ? इत्याह - यस्मात् 'इह' चैत्यवन्दनसूत्रे 'व्युत्सृजामि कायम्' इति श्रूयते, इदं च विरतौ सत्यां सम्भवति, तदभावे कायव्युत्सर्गासम्भवात्, तस्य गुप्तिरूपविरतिभेदत्वात्, ततः सम्यक् चिन्तितव्यमेतत् यदुत 'कायं व्युत्सृजामि' इति प्रतिज्ञान्यथानुपपत्त्या देशविरतिपरिणामयुक्ता एव चैत्यवन्दनानुष्ठानेऽधिकारिणः तेषामेवागमपरतन्त्रतया विधियत्नसम्भवेनामृतानुष्ठानसिद्धेरिति ।

---

चन्द्र.: पञ्चमगुणस्थानपरिणतिमन्तः = न तु बाह्यत एव श्रावकोचितक्रियामात्रपरायणा इति परिणतिपदस्यार्थः । इह = चैत्यवन्दनविन्यासे अनुरूपा = योग्याः । शेषः गाथायामनुक्तमपि 'अनुरूपा' इतिपदमत्र योज्यमिति भावः ।

कुतः = कस्मात्कारणाद् देशविरता एवानुरुपाः ? नान्ये इति ।

तदभावे = विरत्यभावे

ननु विरत्यभावे कायव्युत्सर्गः किमर्थं न स्यादित्यत आह तस्य = कायव्युत्सर्गस्य । गुप्ति इत्यादि । कायव्युत्सर्गो हि गुप्तिरुपो विरतिभेदः, तस्मात्स विरतौ सत्यामेव स्यात् । विरतिश्च पञ्चमादारभ्येति देशविरतानामनुरुपत्वमत्र निगदितमिति ।

एतदेव स्पष्टयन्नाह ततः इत्यादि । प्रतिज्ञान्यथाऽनुपपत्या इत्यादि । प्रतिज्ञायाः अन्यथा =

देशविरतिपरिणामं विना अनुपपत्या = परमार्थतयाऽघटमानत्वात् ।

देशविरतानामेवाधिकारित्वे कारणमाह तेषामेवेत्यादि । यतस्ते जिनागमपरतन्त्राः, ततस्ते आगमप्रतिपादिते विधौ यत्नं कुर्युः, ततश्च तेषाममृतानुष्ठानसिद्धिः, अन्ये तु नागमपरतन्त्राः, ततो न तेषां विधियत्नसम्भवः, ततो न तेषाममृतानुष्ठानसिद्धिरिति कृत्वा देशविरता एवात्राधिकारिण इति ।

---

**यशो.: एतच्च मध्यमाधिकारिग्रहणं तुलादण्डन्यायेनाद्यन्तग्रहणार्थम्, तेन परमामृतानुष्ठानपराः सर्वविरतास्तत्त्वत एव, तद्धेत्वनुष्ठानपराः अपुनर्बन्धका अपि च व्यवहारादिहाधिकारिणो गृह्यन्ते, कुग्रहविरहसम्पादनेनापुनर्बन्धकानामपि चैत्यवन्दनानुष्ठानस्य फलसम्पादकतायाः पञ्चाशकादिप्रसिद्धत्वादित्यवधेयम्,**

---

चन्द्र.: नन्वत्र 'देशविरतादय' इत्यादिपदं नोपात्तम् ततश्च किं साधवोऽत्रानधिकारिणः सन्ति ? तथा यदि देशविरता एव योग्याः, तर्हि किं सम्यग्दृष्टिप्रभृतीनां चैत्यवन्दनं न प्रदातव्यं ? यदि च न प्रदातव्यं, तर्हि ते कथं देशविरत्यादिकं प्राप्नुयुः, चैत्यवन्दनस्यैव तादृशगुणस्थानप्रापकत्वात् इत्यत आह –

'एतच्च' = 'देशविरता अत्र योग्या' इत्येतद् मध्यमाधिकारिग्रहणं = न प्रथमाधिकारी, न वा चरमाधिकारी किन्तु मध्यमवर्त्यधिकारी अत्र गृहितः, एतद् ग्रहणं तुलादण्डन्यायेन = यथा तुलाया मध्यभागग्रहणेनाद्यन्तभागयोर्ग्रहणमेवमेव भवति, तथैवात्रापि देशविरतग्रहणेन आद्यन्ताधिकारिणामपि ग्रहणं भवत्येव, तदर्थमेव मध्यमग्रहणं कृतमिति ।

तेन = तुलादण्डन्यायेनाद्यन्तग्रहणेन परमामृतानुष्ठानपराः = देशविरतापेक्षयाऽधिकामृतानुष्ठानपराः सर्वविरताः तत्त्वत एव = निश्चयनयेन एव, न तु व्यवहारमात्रत इत्येवकारार्थः । अस्य च इहाधिकारिणो गृह्यन्ते इत्यनेन सहान्वयः ।

व्यवहारात् = व्यवहारनयत एव इह = चैत्यवन्दने ।

अपुनर्बन्धकाः सम्यग्दृष्टयश्च आद्या अधिकारिणः, व्यवहारतश्चाधिकारिणः, न तु निश्चयतः । देशविरताः मध्यमाधिकारिणः, व्यवहारतो निश्चयतश्चाधिकारिणः, सर्वविरताः चरमाधिकारिणः व्यवहारतो निश्चयतश्चाधिकारिणः - इति ।

ननु सम्यग्दृष्टयस्तावदिहाधिकारिणो युक्ताः, सम्यग्दृष्टित्वात् अपुनर्बन्धकास्तु मिथ्यात्विन इति ते कथं योग्याः ? मिथ्यात्ववत्त्वादित्यतस्तेषां अधिकारित्वे हेतुमाह कुग्रहेत्यादि । अपुनर्बन्धकानामपि आस्तां तावत् सम्यग्दृष्टिप्रभृतीनामेव चैत्यवन्दनानुष्ठानस्य फलसम्पादकत्वं, किन्तु अपुनर्बन्धकानामपीत्यपिशब्दार्थः ।

अपुनर्बन्धकानां मिथ्यात्वप्रभवः कश्चित्कुग्रहः सम्भवति, तेषां च चैत्यवन्दनं तं कुग्रहं दूरीकरोति, तद्द्वारा

च फलं सम्पादयति । एतच्च पञ्चाशकादौ प्रसिद्धमेवेति । यतः तेषां चैत्यवन्दनं सफलं भवति, तस्मात् तेऽपि चैत्यवन्दनेऽधिकारिण इति भावः ।

ननु अपुनर्बन्धकानां चैत्यवन्दनं कुग्रहविरहसम्पादनेन सफलं भवतीत्युक्तम्, तत्किं सम्यग्दृशामपि तथैव सफलं भवति ? उतान्यथा ? इति चेत्, अन्यथैव, यतो हि सम्यग्दृष्टिप्रभृतीनां मिथ्यात्वाभावात्कुग्रह एव न भवति, येन तेषां चैत्यवन्दनं कुग्रहविरहसम्पादनद्वारा सफलं स्यादिति तेषां तत्साफल्यं अन्यथैवेति ।

---

**यशो.: ये त्वपुनर्बन्धकादिभावमप्यस्पृशन्तो विधिबहुमानादिरहिता गतानुगतिकतयैव चैत्यवन्दनाद्यनुष्ठानं कुर्वन्ति ते सर्वथाऽयोग्या एवेति व्यवस्थितम् ॥१३॥**

---

चन्द्र.: गाथायां योग्या उक्ताः, ततश्चार्थापत्त्या प्राप्तानयोग्यान् दर्शयति वृत्तिकृत् ये तु अपुनर्बन्धकादिभावमपि = आस्तां तावत् सम्यग्दृष्ट्यादिभावमपीत्यपिशब्दार्थः । अस्पृशन्तो = सकृद्बन्धकादय इति भावः । अत एव विधिबहुमानादिरहिता आदिशब्दाद् यत्नादिपरिग्रहः । गतानुगतिकतयैव एकोऽन्धो मार्गमपश्यन्नपि अजानन्नपि च कमपि मार्गज्ञं मार्गमपृष्ट्वैव एवमेव गच्छति, तस्य तद् गमनं गतं उच्यते । अन्ये च तदन्धानुसारिणः "अयमनेन मार्गेण गच्छति, तस्मादस्माभिरपि अनेनैव गन्तव्यम्" इत्येवं तमनुसरन्ति, ततश्च गतस्य पश्चाद् = अनु गतिः येषां ते गतानुगतिकाः उच्यन्ते तद्भावः गतानुगतिकता, तयैवेति ।

सकृद्बन्धकादयो हि विधिबहुमानादिरहिता भवन्ति, तथाऽपि केषाञ्चिद् यथातथा क्रियमाणं अविधिप्रचुरं चैत्यवन्दनादि दृष्ट्वा तेऽपि तथैव कर्तुमारभन्ते । यथा च तेऽन्धानुसारिणः अन्धवद्गर्तादौ निपतनेनानर्थमाप्नुवन्ति, एवमेते सकृद्बन्धकादयोऽपीति ।

ननु पञ्चाशकपाठात् सकृद्बन्धकानामपि चैत्यवन्दनं कुग्रहविरहसम्पादनद्वारा सफलं भवतीति कृत्वा तेषां योग्यत्वं किमत्र न प्रतिपादितम् ? पञ्चाशकमूलपाठस्त्वेवम् → दिक्खाविहाणमेअं भाविज्जंतं तु तंतणीइए । सइअपुणबन्धगाणं कुग्गहविरहं लहुं कुणइ । ← इति द्वितीयपञ्चाशकान्तिमगाथा । तत्सामान्यार्थस्त्वेवम् → तन्त्रनीत्या = शास्त्रनीत्या भाव्यमानं तु एतत् दीक्षाविधानं = चैत्यवन्दनादिरुपो विधिः सकृद्वन्धकानामपुनर्बन्धकानां च शीघ्रं कुग्रहविरहं करोति । ← इति ।

अत्रोच्यते, अल्पानामेव सकृद्बन्धकानां तत्कुग्रहविरहसम्पादकम्, मुख्यवृत्त्या त्वपुनर्बन्धकानामेवेति तेषामेवात्राधिकारितया ग्रहणं कृतमिति ।

व्याख्याता त्रयोदशी कारिका ।

---

**यशो.: नन्वविधिनाऽपि चैत्यवन्दनाद्यनुष्ठाने तीर्थप्रवृत्तिरव्यवच्छिन्ना स्यात्, विधेरेवान्वेषणे तु द्वित्राणामेव विधिपराणां लाभात् क्रमेण तीर्थोच्छेदः स्यादिति**

तदनुच्छेदायाविध्यनुष्ठानमप्यादरणीयमित्याशङ्कायामाह -

तित्थस्सुच्छेयाइ वि, नालंबणमित्थ जं स एमेव ।
सुत्तकिरियाइ नासो, एसो असमंजसविहाणा ॥१४॥

---

चन्द्र.: अधुना चतुर्दश्याः कारिकायाः प्रस्तावनार्थं पूर्वपक्षं प्रदर्शयति वृत्तिकृत् नन्वविधिनाऽपि । प्रश्नकारस्यायमाशयः—'अपुनर्बन्धकादिभावरहिताः गतानुगतिकतया अविधिप्रचुरं अनुष्ठानं कुर्वाणाश्चैत्यवन्दनाद्यनुष्ठानायानधिकारिण' इति प्रागुक्तम् । अत्रान्तर्गतो भावस्तु दुर्ज्ञेय इति बाह्यविधिपालनयत्नादिदर्शनेनाधिकारित्वं तददर्शनेन चानधिकारित्वं निश्चित्य चैत्यवन्दनादि देयं इति निश्चितम् । अर्थात् ये जनाः विधिकरणपरा ज्ञायन्ते, तेषामेव चैत्यवन्दनादि देयम्, ये तु तत्परा न ज्ञायन्ते, तेषां तन्न देयम् इति फलितम् ।

इत्थं चाविधियुतमनुष्ठानं अनादरणीयं, विधियुतमेव चादरणीयमिति निष्कर्षः फलितः । परन्तु अयं आग्रहो न युक्तः, यतो हि विधिमात्रस्यादरे तु द्वौ त्रयो वा जना एव विधिपराः लभ्येरन्, तदन्ये चाविधिपराः इति । तेषां च तददाने ते न चैत्यवन्दनादि कुर्युः, ये च द्वौ त्रयो वा विधियुतं कुर्युः, ते क्रमशो विनश्येयुरिति कालातिक्रमे सति विधिनाऽविधिना वा चैत्यवन्दनं कुर्वाणा न केऽपि भवन्ति, इत्थं च सर्वथा चैत्यवन्दनाद्यनुष्ठानविच्छेदः, इत्थं च तीर्थविच्छेदः, चैत्यवन्दनाद्यनुष्ठानानां तद्युतजनानां वा तीर्थत्वात् इति ।

अक्षरार्थस्त्वेवम् अविधिनाऽपि = न केवलं विधिनैवेति अपिशब्दार्थः तीर्थप्रवृत्तिः = तीर्थसत्ता । विधेरेव = न त्वविधेरपीत्येवकारार्थः । द्वित्राणामेव = द्वौ वा त्रयो वेति द्वित्राः, तेषामेव, न त्वधिकानामित्येवकारार्थः, विधिपालनस्य दुःशकत्वात् । क्रमेण = विधिपराणां विनाशक्रमेण इति = एतस्मात्कारणात् तदनुच्छेदाय = तीर्थरक्षायै इति भावः । अविध्यनुष्ठानमपि = न केवलं विध्यनुष्ठानमेवेत्यपिशब्दार्थः । अविध्यनुष्ठानं कुर्वाणास्तु बहवो लभ्यन्ते इति तादृशानुष्ठानरुपं तत्कर्तृसमूहरुपं वा तीर्थं न व्यवच्छिद्यत इति गर्भार्थः ।

चतुर्दश्याः कारिकायाः अन्वयस्त्वेवम् → अत्र तीर्थस्योच्छेदादिरपि नालम्बनम्, यस्मात् एवमेवासमञ्जसविधानात् सूत्रक्रियायाः नाशः, स एष ← इति ।

---

यशो.: 'तित्थस्स' इत्यादि । 'अत्र' अविध्यनुष्ठाने 'तीर्थोच्छेदाद्यपि नालम्बनं' तीर्थानुच्छेदायाविध्यनुष्ठानमपि कर्तव्यमिति नालम्बनीयम् । 'यद्' - यस्मात् 'एवमेव' अविध्यनुष्ठाने क्रियमाण एव 'असमञ्जसविधानात्' विहितान्यथाकरणादशुद्ध-पारम्पर्यप्रवृत्त्या सूत्रक्रियाया विनाशः, 'स' एष तीर्थोच्छेदः ॥

---

चन्द्र.: विहितान्यथाकरणात् = विहितस्य = शास्त्रे प्रतिपादितस्य यद् अन्यथाकरणं = विपरीततया आचरणं, अविधिकरणमिति यावत्, तस्मात् अशुद्धपारम्पर्यप्रवृत्त्या एकोऽशुद्धमनुष्ठानं करोति, तं दृष्ट्वाऽन्योऽपि करोति, तं दृष्ट्वाऽन्योऽपीत्येवं अशुद्धस्य यत्पारम्पर्यं, तद्भवनात् सूत्रक्रियायाः = शास्त्रोक्तायाः विधिरुपायाः क्रियायाः विनाशः ।

स = विनाशः ।

---

**यशो.: न हि तीर्थनाम्ना जनसमुदाय एव तीर्थम्, आज्ञारहितस्य तस्यास्थिसंघातरूपत्वप्रतिपादनात्, किन्तु सूत्रविहितयथोचितक्रियाविशिष्ट-साधुसाध्वीश्रावकश्राविकासमुदायः, तथा चाविधिकरणे सूत्रक्रियाविनाशा-त्परमार्थतस्तीर्थविनाश एवेति तीर्थोच्छेदालम्बनेनाविधिस्थापने लाभमिच्छतो मूलक्षतिरायातेत्यर्थः ॥१४॥**

---

चन्द्र.: ननु सूत्रक्रियायाः विनाशो भवतु नाम, किन्तु अविधिसमन्वितचैत्यवन्दनाद्यनुष्ठानवतां साधुप्रभृतीनां समुदायरुपं तीर्थं तु न विनश्येत्, ततश्च कथं तीर्थोच्छेदः ? इत्याशङ्कायामाह न हि इत्यादि । जनसमुदाय एव = अविधिसमन्वितानुष्ठानवतां समुदाय एव, तस्यातीर्थत्वे कारणमाह आज्ञारहितस्य = तत्तदनुष्ठानोचिता या द्रव्यक्षेत्रकालभावादिरुपा जिनाज्ञा, तद्रहितस्य अविधिसमाचरणनिरतस्येति यावत् । तस्य = जनसमुदायस्य अस्थिसंघातरुपत्वप्रतिपादनात् 'आणाजुत्तो संघो सेसो पुण अट्ठिसंघाओ' इत्यादिना गच्छाचारप्रकीर्णकादौ अस्थिसमूहात्मकत्वस्य निरुपणात् । तथा च न केवलो जनसमुदायस्तीर्थमिति निष्कर्षः ।

ननु किं तर्हि तीर्थमित्यत आह किन्तु इत्यादि । सूत्रे जिनागमे विहिता निगदिता या यथोचिता = तत्तदनुष्ठानोचिता या क्रिया तया विशिष्टानां साधुसाध्वीश्रावकश्राविकाणां समुदायः तीर्थम् ।

निष्कर्षमाह तथा चाविधिकरणे अयोग्यानामपि सूत्रक्रियादाने सति तैरविधिकरणे सूत्रक्रियाविनाशात् = अपुनर्बन्धकादिभावयुतक्रियाया विध्वंसात् परमार्थतस्तीर्थविनाश एव इति = अस्मात् कारणात् तीर्थोच्छेदेत्यादि । मूलक्षतिः = मूलं नाम नीवि, "मूडी" इति गुर्जरभाषायाम् ।

तीर्थस्यानुच्छेदोऽत्र फलं पूर्वपक्षस्येष्टम्, तत्प्राप्त्यर्थं सकृद्बन्धकादीनामपि क्रियादानं तैः युक्तं प्रतिपादितम् । किन्तु तीर्थानुच्छेदरुपं फलं तु दूरे, अपुनर्बन्धकादिक्रियारुपं यत्तीर्थं भवेत्, तदपि अशुद्धपारम्पर्यप्रवृत्त्या विनश्येदिति प्रवर्तमानतीर्थरुपस्य मूलस्यैव क्षतिर्भवेदिति न कथमपि पूर्वपक्षस्याभिप्रायो युक्त इति ।

यथा लाभार्थं व्यापारं कुर्वन् कश्चिन्मुग्धो लाभं तु नैव प्राप्नोति, प्रत्युत व्यापाराय प्रयुक्तं मूलधनमपि

विगमयति । एवमेव तीर्थरक्षार्थं अविध्यनुष्ठानमपि कर्त्तव्यं मन्यमानः प्ररुपयंश्च तीर्थरक्षान्तु नैव प्राप्नोति, प्रत्युत प्रवर्तमानं विध्यनुष्ठानरुपं यत्किञ्चित्तीर्थमपि विनाशयतीति ।

व्याख्याता चतुर्दशी कारिका ।

---

**यशो.: सूत्रक्रियाविनाशस्यैवाहितावहतां स्पष्टयन्नाह -**

**सो एस वंकओ चिय, न य सयमयमारियाणमविसेसो ।**
**एयं पि भावियव्वं, इह तित्थुच्छेयभीरुहिं ॥१५॥**

---

चन्द्र.: अधुना पञ्चदश्याः कारिकाया अवतरणिकामाह सूत्रक्रियेत्यादि ।

कारिकान्वयस्त्वेवम् → स एष वक्र एव, न च स्वयं मृतमारितयोरविशेषः । तीर्थोच्छेदभीरुभिः इह एतदपि भावनीयम् ← इति ।

---

**यशो.: 'सो एस' त्ति । 'स एष' सूत्रक्रियाविनाशः 'वक्र एव' तीर्थोच्छेदपर्यवसायितया दुरन्तदुःखफल एव ।**

---

चन्द्र.: स एषः = अनन्तरं प्रतिपादित, अत एव प्रसिद्धः । तीर्थोच्छेदेत्यादि । यतः सूत्रक्रियाविनाशः तीर्थोच्छेदरुपतया पर्यवस्यति, परिणमति, स्वयमेव तीर्थोच्छेदरुपो भवतीति यावत्, तस्मात् दुरन्तेत्यादि । दुःखेनान्तः यस्य तद् दुरन्तं, दुरन्तं दुःखं फलं यस्य स, दुरन्तदुःखफलः । दीर्घसंसारदुःखदायी इति ।

---

**यशो.: ननु शुद्धक्रियाया एव पक्षपाते क्रियमाणे शुद्धायास्तस्या अलाभादशुद्धायाश्चानङ्गीकारादानुश्रोतसिक्या वृत्त्याऽक्रियापरिणामस्य स्वत उपनिपातात्तीर्थोच्छेदः स्यादेव, यथाकथञ्चिदनुष्ठानावलम्बने च जैनक्रियाविशिष्टजनसमुदायरूपं तीर्थं न व्यवच्छिद्यते, न च कर्तुरविधिक्रियया गुरोरूपदेशकस्य कश्चिद्दोषः, अक्रियाकर्तुस्तस्य स्वपरिणामाधीनप्रवृत्तिकत्वात्, केवलं क्रियाप्रवर्तनेन गुरोस्तीर्थव्यवहाररक्षणाद् गुण एवेत्याशङ्कायामाह -**

---

चन्द्र.: अत्र पूर्वपक्षः प्राह - ननु शुद्धक्रियाया इत्यादि । पूर्वपक्षस्यायमभिप्रायः → द्विविधं हि तीर्थं, चैत्यवन्दनादिक्रियामात्रसहितो जनसमुदायः प्रथमं तीर्थं, तत्र क्रिया विधियुता तदन्या वेति काऽपि भवतु । विधियुतक्रियासहितो जनसमुदायो द्वितीयं तीर्थमिति । यदि च विध्यन्वितानुष्ठानस्यैवाग्रहः क्रियेत, तर्हि प्रागुक्तरीत्या क्रमशः तेषां विनाशेन द्वितीयं तीर्थं विच्छिद्येत, अविध्यन्वितानुष्ठानस्य च निषिद्धत्वात्

तादृशक्रियामात्रसहितजनसमुदायरुपं प्रथममपि तीर्थं विच्छिद्येत इति उभयापेक्षया तीर्थविच्छेदः ।

यदि चाविध्यनुष्ठानमनुमन्येत, तर्हि द्वितीयं विध्यनुष्ठानसमन्वितजनसमुदायरुपं तीर्थं विच्छिद्यतां नाम, तथाऽपि चैत्यवन्दनादिक्रियामात्रसहितजनसमुदायरुपं प्रथमं तीर्थं तु न विच्छिद्येतेति एकापेक्षयैव तीर्थविच्छेदः । इत्थं च "सर्वनाशे समुत्पन्नेऽर्धं त्यजति पण्डितः" इति वचनात् सर्वथा विधिपक्षपातकरणे सर्वनाशसम्भवात् अर्धविनाशप्रयोजकमविधिपक्षपातम-वलम्ब्याविध्यनुष्ठानमपि आदरणीयमेवेति ।

अक्षरार्थस्त्वयम् आनुश्रोतसिक्या वृत्त्या = सुखशीलतयेति भावः । तदुक्तं ज्ञानसारे 'आनुस्त्रोतसिकी वृत्तिर्बालानां सुखशीलता' इति । जगति जीवाः प्रायः सुखशीलाः, अत एव विधिपालने स्वयं उल्लासवन्तो न भवन्ति । इत्थं च यदा ते उपदेशं शृण्वन्ति यथा "विधिनैवानुष्ठानं कर्त्तव्यं, न तु कदापि अविधिना" इति, तदा ते विध्यनुष्ठानेऽनुत्साहात् अविध्यनुष्ठानस्य च निषेधात् सुखशीलतामवलम्ब्य 'अनुष्ठानमेव न करणीयम्' इति अक्रियापरिणाममेवाबिभ्रतीति । द्वौ पक्षौ तेषां समीपे उपतिष्ठतः (१) विधिनैव कर्त्तव्यम् (२) न कर्त्तव्यम् वा इति । ततश्च ते सुखशीलतापरायणा द्वितीयमेव विकल्पमङ्गीकुर्वन्तीति भावः ।

यदि वा शुद्धक्रियाऽनभ्यासादिकारणवशात् शुद्धक्रियायाः अलाभः, अशुद्धायाश्च निषेध इति 'अनुष्ठानं न कर्त्तव्यमेव, शुद्धं तु नैव लभ्यते, अशुद्धं तु लभ्यमानमपि त्याज्यमुक्तं' इति परिणामो जीवानां स्वत एवोपनिपततीति ।

स्वत उपनिपातात् इति । 'विधिरेव कर्त्तव्यः, न त्वविधिः' इत्युपदेशकेनोक्तं, न तु 'अनुष्ठानं न करणीयम्' इति । तथाऽपि सुखशीलतया तेषां उपदेशकवचनानुसारेण 'अनुष्ठानं न कर्त्तव्यं' इति परिणामः स्वत एवोपनिपततीति ।

ननु क्रियाकर्ता यद्यविधिं कुर्यात्, तर्हि क्रियोपदेशकस्य गुरोः दोषः स्यादिति चेन्न, अक्रियाकर्तुस्तस्य स्वपरिणामेत्यादि । स्वपरिणामाधीना प्रवृत्तिर्यस्य स, स्वपरिणामाधीनप्रवृत्तिकः, तत्त्वात् । गुरुरेतावदेव वदति यदुत "चैत्यवन्दनं कर्त्तव्यं" इति । न तु "अविधिनाऽपि कर्त्तव्यं" इति । किन्तु श्रोता "मया विधिवत् कर्तुं न शक्यते, अलाभादिकारणवशात्, तस्मादहं यथा तथाऽपि करोमि" इति स्वपरिणामेनैवाविधिमाचरति । ततश्च चैत्यवन्दनं गुरुवचनाधीनं, किन्तु तदविधिस्तु कर्तृपरिणामाधीनैवेति । गुरुस्तु चैत्यवन्दनक्रियाप्रवर्तनद्वारा "चैत्यवन्दनमस्ति" इत्यादिरुपस्य तीर्थव्यवहारस्य रक्षणे प्रयोजको भवतीति गुरोः तीर्थव्यवहारप्रयोजकत्वाल्लाभ एवेति ।

अत्र समाप्तः पूर्वपक्षः ।

---

**यशो.: 'न च स्वयंमृतमारितयोरविशेषः', किन्तु विशेष एव, स्वयंमृते स्वदुष्टाशयस्यानिमित्तत्वात् मारिते च मार्यमाणकर्मविपाकसमुपनिपातेऽपि स्वदुष्टाशयस्य**

निमित्तत्वात् तद्वदिह स्वयमक्रियाप्रवृत्तं जीवमपेक्ष्य गुरोर्न दूषणम्, तदीयाविधिप्ररूपणमवलम्ब्य श्रोतुरविधिप्रवृत्तौ च तस्योन्मार्गप्रवर्तनपरिणामादवश्यं महादूषणमेव,

चन्द्र.: समाधानमाह न च स्वयं इत्यादि। यः कश्चिन्मनुष्यः स्वयं मृतः, यश्चास्माभिर्मारितः, तत्र महान् भेद इति। तत्र कारणमाह स्वयं मृते इत्यादि । स्वदुष्टाशयस्य = अस्मदशोभनभावस्य "मारयाम्येनं" इत्यादिरुपस्य अनिमित्तत्वात् = अकारणत्वात् ।

मार्यमाणेत्यादि । यद्यपि मार्यमाणः स्वायुःकर्मोपक्रमतीव्राशातोदयादिवशान्म्रियते, तथाऽपि तत्रास्मदशुभभावोऽपि निमित्तं कारणम् ।

तद्वद् = प्रतिपादितदृष्टान्तवद् इह = प्रकृते स्वयं = गुरूपदेशं विना । तदीयेत्यादि । गुरुणा कृतं यदविधिनिरुपणं, तत् इति । तस्य = गुरोः । महादूषणमेव = न तु दूषणाभाव इत्येवकारार्थः ।

यशो.: तथा च श्रुतकेवलिनो वचनम् 'जह सरणमुवगयाणं, जीवाण सिरो निकिंतए जो उ । एवं आयरिओ वि हु, उस्सुत्तं पण्णवेंतो य ।

चन्द्र.: श्रुतकेवलिनो = भद्रबाहुस्वामिन आवश्यकनिर्युक्तौ ।

गाथान्वयस्त्वेवम् - यथा शरणमुपागतानां जीवानां शिरः यो निकृन्तति, एवं उत्सूत्रं प्रज्ञापयन् आचार्योऽपि शरणमुपागतानां जीवानां शिरः निकृन्तति ← इति । तदहितं करोतीति भावः ।

यशो.: न केवलमविधिप्ररूपणे दोषः, किन्त्वविधिप्ररूपणाभोगेऽविधिनिषेधासम्भवात् तदाशंसनानुमोदनापत्तेः फलतस्तत्प्रवर्तकत्वाद्दोष एव । तस्मात् 'स्वयमेतेऽविधिप्रवृत्ता नात्रास्माकं दोषो, वयं हि क्रियामेवोपदिशामो न त्वविधिम्' एतावन्मात्रमपुष्टालम्बनमवलम्ब्य नोदासितव्यं परहितनिरतेन धर्माचार्येण, किन्तु सर्वोद्यमेनाविधिनिषेधेन विधावेव श्रोतारः प्रवर्तनीयाः, एवं हि ते मार्गे प्रवेशिता अन्यथा तून्मार्गप्रवेशनेन नाशिताः ।

चन्द्र.: ननु प्रतिपादितमेवास्माभिः यदुत न गुरुर्विध्युपदेशं ददाति, केवलं क्रियामेवोपदिशति। अविधिस्तु श्रोता स्वयमेवाचरति, केवलं गुरुस्तन्निषेधं न करोति । ततश्चात्राविधिप्ररुपणाऽभावादेव न गुरोर्दोष इत्याशङ्कायामाह न केवलं इत्यादि । अविधिप्ररुपणाभोगे = 'मयाऽविधिनिषेधो न कर्त्तव्यः' इत्याभोगः

अर्थापत्त्या 'मयाऽविधिप्ररुपणं कर्त्तव्यं' इत्याभोगरुप एव, यतो हि अनिषेधोऽनुमतिः, ततश्च अविधेरनिषेधो अविध्यनुमतिरेव सञ्जाता, सा चाविधिप्ररुपणाभोगरुपाऽपि वक्तुं शक्यत एव । ततश्च तादृशाभोगे सति ।

तदाशंसनानुमोदनापत्तेः = 'भवत्वविधिः, न कश्चिद् दोषः' इत्यादिरुपा याऽविध्याशंसना, 'अविधिनाऽपि करोति, तत्सुष्ठु' इत्यादिरूपा च याऽनुमोदना, तदापत्तेः कारणात् फलतः = न तु स्वरुपतः, साक्षाद् अविधिनिरुपणाभावात्, किन्तु तादृशं निरुपणं कृतं, येन श्रोताऽविधौ प्रवृत्तोऽभवदिति कृत्वा फलमपेक्ष्य तत्प्रवर्तकत्वात् = अविधिप्रवृत्तिजनकत्वात् दोषः एव ।

शेषं स्पष्टम् यावन्नाशिताः इति ।

---

**यशो.: एतदपि भावयितव्यमिह तीर्थोच्छेदभीरूभिः - विधिव्यवस्थापनेनैव ह्येकस्यापि जीवस्य सम्यग् बोधिलाभे चतुर्दशरज्ज्वात्मकलोकेऽमारिपटहवादनात्तीर्थोन्नतिः, अविधिस्थापने च विपर्ययात्तीर्थोच्छेद एवेति ।**

---

चन्द्र.: सम्यग्बोधिलाभे इत्यादि । बोधिलाभः सम्यग्दर्शनप्राप्तिः, सम्यग्बोधिलाभश्च सर्वविरतिप्राप्तिः । उपदेशको हि सम्यगुपदेशद्वारा यदि श्रोतारं विधौ व्यवस्थाप्य सर्वविरतिं प्रापयति, तर्हि एकस्याऽपि जीवस्य तत्सत्त्वे तज्जीवद्वारा सकलेऽपि लोके अमारिपटहवादनं भवति । यतः स जीवो न कमपि जीवं हनिष्यति । ततश्च तीर्थोन्नतिः ।

विपर्ययात् = सम्यग् बोधिलाभाभावात् तीर्थोच्छेद् एव । न हि सम्यक्त्वाभावे सर्वविरत्यभावे च तात्त्विकं तीर्थं, ततश्च स्फुट एव तीर्थोच्छेदः ।

---

**यशो.: यस्तु श्रोता विधिशास्त्रश्रवणकालेऽपि न संवेगभागी तस्य धर्मश्रावणेऽपि महादोष एव, तथा चोक्तं ग्रन्थकृतैव षोडशके - यः श्रृण्वन् सिद्धान्तं, विषयपिपासातिरेकतः पापः । प्राप्नोति न संवेगं, तदापि यः सोऽचिकित्स्य इति ॥१॥ नैवंविधस्य शस्तं, मण्डल्युपवेशनप्रदानमपि । कुर्वन्नेतद् गुरुरपि, तदधिकदोषोऽवगन्तव्यः ॥२॥ (१०षो० ४-१५) 'मण्डल्युपवेशनं' सिद्धान्तदानेऽर्थमण्डल्युपवेशनम् । 'तदधिकदोषः' - अयोग्यश्रोतुरधिकदोषः, पापकर्तुरपेक्षया तत्कारयितुर्महादोषत्वात् । तस्माद्विधिश्रवणरसिकं श्रोतारमुद्दिश्य विधिप्रापणेनैव गुरुस्तीर्थव्यवस्थापको भवति, विधिप्रवृत्त्यैव च तीर्थमव्यवच्छिन्नं भवतीति सिद्धम् ॥१५॥**

---

चन्द्र.: ननु सत्यं विधिव्यवस्थापनेनैव महान्लाभः, परन्तु स तदा सम्भवति, यदा श्रोता विशिष्टो भवति। यदि श्रोता विधिश्रवणरसिको न स्यात्, तर्हि विधिव्यवस्थापनं तु दूरे, विधिनिरुपणमपि तत्र श्रोतुः अप्रीतिकरं स्यात्। ततश्च तत्र किं कर्तव्यम्? अविधिरेवादरणीयतया निरुपणीय इत्यस्माकमभिप्राय इत्यत आह यस्तु इत्यादि। विधिशास्त्रश्रवणकालेऽपि = आस्तां श्रवणकालानन्तरमित्यपिशब्दार्थः। न संवेगभागी = न विधिबहुमानादिशुभपरिणामवान्। धर्मश्रावणेऽपि = धर्मश्रवणकारणेऽपि, धर्मप्रदाने तु महादोषो भवेदेवेत्येवकारार्थः।

षोडशकगाथान्वयस्त्वयम् → यः पापः सिद्धान्तं श्रृण्वन्नपि विषयपिपासातिरेकतः तदापि संवेगं न प्राप्नोति, सोऽचिकित्स्य इति। ←

अत्र विषयाणां शब्दादिरुपाणां या पिपासा = अभिलाषा, तस्याः योऽतिरेकः आधिक्यं, तस्मात्। तदापि = धर्मशास्त्रश्रवणकालेऽपि। अचिकित्स्यः = धर्मौषधेनासाध्यव्याधिमानिति।

षोडशकगाथान्वयस्त्वयम् → एवंविधस्य मण्डल्युपवेशनप्रदानमपि न शस्तं, एतत्कुर्वन्गुरुरपि तदधिकदोषोऽवगन्तव्यः ← इति।

वृत्तिकृदेव विषमपदव्याख्यानमाह मण्डल्युपवेशनेत्यादि। सिद्धान्तदानेऽर्थमण्डल्युपवेशनम्। ननु सूत्रमण्डलीनिषेधः किमर्थं न कृतः? अपात्रस्य हि सूत्रमण्डल्युपवेशनं निषेधनीयमेवेति चेत्, सत्यं, परन्तु सूत्रमण्डलीसकाशात्प्राक् स जीवो योग्यो न वा? इति निर्णयो दुःशकः छद्मस्थानां, परन्तु सूत्रमण्डल्यां सामान्यतो योऽर्थः प्रदीयते, तच्छ्रवणे स जीवः संवेगयुतो भवति न वा? इति सम्यग्ज्ञायते, ततश्च यदि 'स संवेगयुतो न भवति' इति ज्ञायते, तर्हि तमयोग्यं मत्वाऽर्थमण्डली तस्य निषिध्यते। योग्यं तु मत्वाऽनुमन्यते। तस्मादत्र अर्थमण्डल्युपवेशनमेव निषिद्धम्, सुशकत्वात्, न तु सूत्रमण्डल्युपवेशनं, दुःशकत्वादिति।

अयोग्यश्रोतृसकाशाद् उपदेशकस्य गुरोरधिकदोषत्वे कारणमाह पापकर्तुरपेक्षयेत्यादि। अयोग्यस्य अर्थमण्डल्युपवेशनं पापं, गुरुश्च श्रोतुरयोग्यतां जानन्नपि तत्पापकारयितेति स महादोषवानिति।

निष्कर्षमाह तस्माद् = विध्यरसिकं प्रति धर्मोपदेश एव न दातव्य इत्यादिकारणात्। विधिप्रापणेनैव = न त्वविधियुतानुष्ठानसंरक्षणमात्रेणेति एवकारार्थः। विधिप्रवृत्त्यैव = न तु अविध्यनुष्ठानमात्रेणैवेति एवकारार्थः।

---

यशो.: ननु किमेतावद्गूढार्थगवेषणया? यद्बहुभिर्जनैः क्रियते तदेव कर्तव्यं 'महाजनो येन गतः स पन्थाः' इति वचनात्, जीतव्यवहारस्यैवेदानीं बाहुल्येन प्रवृत्तेस्तस्यैवाऽऽतीर्थकालभावित्वेन तीर्थव्यवस्थापकत्वादित्याशङ्कायामाह-

मुत्तूण लोगसन्नं, उड्ढूण य साहुसमयसब्भावं।
सम्मं पयट्टियव्वं, बुहेणमइनिउणबुद्धीए ॥१६॥

---

चन्द्र.: व्याख्याता पञ्चदशमी कारिका ।

अधुना षोडशीं कारिकां प्रस्तावयति ननु किमित्यादि । अतिसूक्ष्मपदार्थविचारणाव्याकुलीभूतः सन् पूर्वपक्षः प्रश्नयति यदुत एतावान् गूढार्थो न गवेषणीयः । यदि च कश्चित्पूर्वपक्षमाह यदुत 'गूढार्थगवेषणाभावे 'चैत्यवन्दनादिप्रवृत्तिः कथं कर्तव्या ?' इति सम्यग् निर्णयः कथं स्यात् ?' इति । ततः पूर्वपक्षः प्राह यद् बहुभिः इत्यादि ।

ननु बहुजनकृतमेव कर्त्तव्यं, इति कथं युक्तं ? बहुजनकृतमयुक्तमपि सम्भवेदित्यतः पूर्वपक्षः प्राह महाजनो = बहुजन इति पूर्वपक्षाभिप्रायः । तथा च बहवो जना येन मार्गेण गच्छन्ति, स सम्यग् मार्गः इति तत्र गमने न कोऽपि दोषः, तस्य युक्तत्वात्, सम्यग्मार्गोऽयुक्तो न भवतीति ।

ननु अस्माभिः सूत्रानुसारेणैव प्रवृत्तिः कर्तव्या, न तु बहुजनानुसारेण । शास्त्रस्य बहुजनादधिकप्रामाणिकत्वादिति शङ्कायामाह पूर्वपक्षः जीतव्यवहारस्यैव = बहुजनैर्यदाचरितं, तद् जीतव्यवहारः, तस्यैव, न तु आगमादिव्यवहारस्येति एवकारार्थः । इदानीं = वर्तमानकाले, प्राचीनकाले तु आगमादिव्यवहारोऽपि प्रवृत्त आसीदिति 'इदानीं' पदग्रहणम् । बाहुल्येन = न तु सर्वथा, कदाचित् कुत्रचित् श्रुतादिव्यवहारस्यापि दर्शनात् इति कृत्वा 'बाहुल्येन' पदग्रहणम् । तस्यैव = जीतव्यवहारस्यैव, न त्वन्येषामित्येवकारार्थः । आतीर्थकालभावित्वेन यावत्कालं प्रस्तुततीर्थं भविष्यति, तावत्कालं भावित्वात् तीर्थव्यवस्थापकत्वात् । यतो जीतव्यवहारस्यैव बाहुल्येन प्रवृत्तिः, ततः स एव आतीर्थकालभावी, ततः स एव तीर्थव्यवस्थापकः, तस्मात् बहुजनकृतरुपो जीतव्यवहार एवादरणीयः, शास्त्रीयगूढार्थगवेषणयाऽलमिति ।

व्यवहारः पञ्चधा आगमः श्रुतं आज्ञा धारणा जीतं च, तत्स्वरुपं तु ग्रन्थान्तरादवसेयमिति ।

पूर्वपक्षं निराकर्तुमाह षोडशीं कारिकां मुत्तूणेत्यादि ।

गाथान्वयस्त्वेवम् → लोकसंज्ञां मुक्त्वा साधु समयसद्भावं च वोड्ढवा बुधेनातिनिपुणमत्या सम्यक् वर्तितव्यम् ← इति ।

---

**यशो.: 'मुत्तूण' त्ति । मुक्त्वा 'लोकसंज्ञां' - 'लोक एव प्रमाणं' इत्येवंरुपां शास्त्रनिरपेक्षां मतिं 'उड्ढूण य' त्ति वोड्ढ्वा च 'साधुसमयसद्भावं' समीचीनसिद्धान्तरहस्यं 'सम्यग्' - विधिनीत्या प्रवर्तितव्यं चैत्यवन्दनादौ 'बुधेन' पण्डितेन 'अतिनिपुणबुद्ध्या' अतिशयितसूक्ष्मभावानुधाविन्या मत्या ।**

---

चन्द्र.: लोक एव = बहुजन एव । शास्त्रनिरपेक्षां = शास्त्रवचनापेक्षाविरहितां, यत्र शास्त्रवचनस्य उपेक्षा क्रियते, तादृशीं लोकसंज्ञामित्यर्थः, सर्वाऽपि लोकसंज्ञा शास्त्रनिरपेक्षैव भवतीति स्वरुपदर्शकमिदं विशेषणम्,

न तु शास्त्रसापेक्षलोकसंज्ञाव्यवच्छेदकम्, शास्त्रसापेक्षाया: लोकसंज्ञात्वस्यैवाभावादिति ।

अतिशयितेत्यादि । अतिशयिता ये सूक्ष्मभावा:, तदनुधाविन्या मत्या । शास्त्ररहस्यपरिशीलनसमर्थया प्रज्ञया इति भाव: ।

---

**यशो.: साधुसमयसद्भावश्चायम् - लोकमालम्ब्य कर्तव्यं, कृतं बहुभिरेव चेत् । तदा मिथ्यादृशां धर्मो, न त्याज्य: स्यात्कदाचन ॥१॥ (ज्ञानसारे २३-४) स्तोका आर्या अनार्येभ्यो, स्तोका जैनाश्च तेष्वपि । सुश्राद्धास्तेष्वपि स्तोका:, स्तोकास्तेष्वपि सत्क्रिया: ॥२॥ श्रेयोऽर्थिनो हि भूयांसो, लोके लोकोत्तरे च न । स्तोका हि रत्नवणिज:, स्तोकाश्च स्वात्मशोधका: ॥३॥ (ज्ञानसारे २३-५)**

---

चन्द्र.: ननु शोभन: समयसद्भाव: क: ? यं वोढ्वा प्रवर्तितव्यम् ? इति जिज्ञासायामाह साधुसमयेत्यादि । अयं = वक्ष्यमाण: ।

न त्याज्य: स्यात् कदाचन = मिथ्यादृष्टिजना: सदैव बहव:, ततश्च तै: कृतमेव प्रमाणं इति तद्धर्म: कदापि त्याज्यो न स्यात्, भवदुक्तरीत्या सदैव बहुजनकृतत्वात् ।

स्तोका आर्या अनार्येभ्य: तस्मात् आर्यधर्मं परित्यज्य बहुभिरनार्यै: कृतमादरणीयं स्यात् स्तोका जैनाश्च तेष्वपि = तेष्वपि = आर्येष्वपि, तथा च जैनधर्मं परित्यज्य बहुभिरार्यै: कृतमादरणीयं स्यात् । सुश्राद्धा: = विशिष्टश्रद्धावन्त: सम्यग्दृष्टय: तेष्वपि = जैनेष्वपि । तेष्वपि = सुश्राद्धेष्वपि सत्क्रिया: = विरतिपरिणामवन्त: साधव: श्रावकाश्च ।

इत्थं च सर्वश्रेष्ठानां सर्वाल्पत्वात् सर्वकनिष्ठानां च सर्वाधिकत्वात् न सङ्ख्याबाहुल्यानुसारेण प्रामाणिकत्वादिनिर्णयो न्याय्य इति ।

श्रेयोऽर्थिनो इत्यादि । लोके लोकोत्तरे च श्रेयोऽर्थिनो भूयांसो न भवन्ति । लोके रत्नवणिका: स्तोका एव, लोकात्तरे च स्वात्मसाधका: स्तोका एवेति ।

इत्थं च 'बहुजनकृतं प्रमाणं, महाजनो येन गत:, स पन्था: इति वचनात्' इत्यादिपूर्वपक्षो निराकृत: ।

---

**यशो.: एकोऽपि शास्त्रनीत्या यो, वर्तते स महाजन: । किमज्ञसार्थै: ? शतमप्यन्धानां नैव पश्यति ॥४॥**

---

चन्द्र.: ननु तर्हि महाजनो येन.... इत्यादिवचनानि किमप्रामाणिकानि इति चेत्

न, प्रामाणिकान्येव, किन्तु तदर्थो भवता न सम्यक्कृत:, न हि 'महाजनो नाम बहुजन:' किन्तु एकोऽपि

= आसतां बहवः इत्यपिशब्दार्थः । न पश्यति । अन्धा हि शतसङ्ख्याका अपि न किमपि दृष्टुं शक्ताः, चक्षुष्मानेकोऽपि सर्वं दृष्टुं समर्थ इति ।

---

**यशो.: यत्संविग्नजनाचीर्णं, श्रुतवाक्यैरबाधितम् । तज्जीतं व्यवहाराख्यं, पारम्पर्यविशुद्धिमत् ॥५॥ यदाचीर्णमसंविग्नैः, श्रुतार्थानवलम्बिभिः । न जीतं व्यवहारस्तदन्धसंततिसम्भवम् ॥६॥**

---

चन्द्र.: यत् "जीतव्यवहारस्यैवेदानीं बाहुल्येन प्रवृत्तेः" इति पूर्वपक्षवचनम्, तत्र बहुजनाचरितं जीतव्यवहार इति पूर्वपक्षाभिप्रायः, स तु मन्दः, यस्मात् यत्संविग्नेत्यादि । संविग्नजनाचरितं श्रुतवाक्यैरबाधितं यत् तत् जीतव्यवहारः तच्च पारम्पर्यविशुद्धिकृत् = परम्परया विशुद्धिकरमिति । तथा चासंविग्नैः बहुभिः अपि जनैः आचरितं श्रुतवाक्यैर्बाधितं नैव जीतव्यवहार इति । एतदेवाह यदाचीर्णमित्यादि । गाथान्वयस्तु → श्रुतार्थानवलम्बिभिरसंविग्नैः यदाचरितं, अन्धसन्ततिसम्भवं तन्न जीतं व्यवहारः ।

---

**यशो.: आकल्पव्यवहारार्थं, श्रुतं न व्यवहारकम् । इतिवक्तुर्महत्तन्त्रे, प्रायश्चित्तं प्रदर्शितम् ॥७॥ तस्माच्छ्रुतानुसारेण, विध्येकरसिकैर्जनैः । संविग्नजीतमालम्ब्यमित्याज्ञा पारमेश्वरी ॥८॥**

---

चन्द्र.: "तस्यैवातीर्थकालभावित्वेन..." इत्यादि यदुक्तं पूर्वपक्षेण, तत्राह आकल्पेत्यादि ।

आकल्पव्यवहारार्थं = कल्पं यावत्, तीर्थं यावत् पञ्चमारकान्तं यावत् इति भावः, यः व्यवहारः प्रायश्चित्तादिरुपः, तदर्थं, तत्करणार्थं श्रुतं न व्यवहारकं = न प्रामाणिकं, किन्तु जीतमेवेति । इतिवक्तुः = अनन्तरोक्तं वदतः तन्त्रे = शास्त्रे महत्प्रायश्चित्तं प्रदर्शितम् ।

तथा च आतीर्थं जीतमेव इत्यादि भवद्वचनं भवतां महाप्रायश्चित्तप्रापकमिति ।

निष्कर्षमाह तस्मादित्यादि । → तस्मात् विध्येकरसिकैर्जनैः श्रुतानुसारेण संविग्नजीतमालम्ब्यं इति पारमेश्वरी आज्ञा ← इत्यन्वयः ।

---

**यशो.: ननु यद्येवं सर्वादरेण विधिपक्षपातः क्रियते तदा- 'अविहिकया वरमकयं, असूयवयणं भणंति सव्वन्नू । पायच्छित्तं जम्हा, अकए गुरुयं कए लहुअं ॥१॥' इत्यादि वचनानां का गतिः ? इति चेत्,**

---

चन्द्र.: पूर्वपक्षः प्राह ननु इत्यादि । अविहि इत्यादि । → सर्वज्ञाः 'अविधिकृतादकृतं वरं' इति केषाञ्चिद्

वचनं असूत्रवचनं = उत्सूत्रवचनं भणन्ति । यस्मात् अकृते गुरुकं प्रायश्चित्तं, अविधि कृते लघुकम् ← इत्यादिरुपाणि यानि वचनानि, तेषां का गतिः ? = कोऽर्थः, निरर्थकान्येव तानि वचनानि भवेयुरिति ।

पूर्वपक्षस्यायमभिप्रायः → 'विधियुतमेवानुष्ठानं कर्त्तव्यं' इति भवतामभिप्रायः, ततश्च अविधियुतं नैव कर्त्तव्यमित्यापन्नम् । इत्थं चाविध्यनुष्ठानसकाशादनुष्ठानाकरणमेव श्रेय इति भवदभिप्रायः । परन्तु प्रस्तुतशास्त्रपाठे तु 'अविधिकृतादकृतं वरं' इति वचनमुत्सूत्रं निगदितं, अविधिकृतेऽल्पं प्रायश्चित्तं, अकृते चाधिकमित्यादिना तद्वचनस्योत्सूत्रत्वमपि दृढीकृतम् । इत्थं च प्रस्तुतवचनात् अविधिकृतं अकृतात्श्रेष्ठमिति सिद्ध्यति, भवदभिप्रायेण तु अकृतमविधि कृतात्श्रेष्ठमिति विपरीतमेव सिद्ध्यति । ततश्च परस्परं विरोधः, यदि च भवद्वचनं सत्यं, तर्हि किं प्रस्तुतं वचनमसत्यम् ? ← इति

---

**यशो.: नैतानि वचनानि मूलत एवाविधिप्रवृत्तिविधायकानि, किन्तु विधिप्रवृत्तावप्यनाभोगादिनाऽविधिदोषच्छद्मस्थस्य भवतीति तद्भिया न क्रियात्यागो विधेयः । प्रथमाभ्यासे तथाविधज्ञानाभावादन्यदापि वा प्रज्ञापनीयस्याविधिदोषो निरनुबन्ध इति तस्य तादृशानुष्ठानमपि न दोषाय, विधिबहुमानाद् गुर्वाज्ञायोगाच्च तस्य फलतो विधिरूपत्वादित्येतावन्मात्रप्रतिपादनपराणीति न कश्चिद्दोषः । अवोचाम चाध्यात्मसारप्रकरणे - 'अशुद्धापि हि शुद्धायाः, क्रिया हेतुः सदाशयात् । ताम्रं रसानुवेधेन, स्वर्णत्वमुपगच्छति ॥१॥' (२-१६ श्लो.)**

---

चन्द्र.: समाधानमाह नैतानि = 'अविहिकया' इत्यादिरुपाणि वचनानि मूलत एव प्रथमत एव अविधिप्रवृत्तिविधायकानि = 'अविधिनाऽपि अनुष्ठानं कुर्यात्' इति प्रतिपादकानि ।

ननु तर्हि कस्यार्थस्य प्रतिपादकानि तानीति शङ्कावकाशे आह-किन्तु विधिमाहात्म्यं अविधिदोषं च गुरूक्तं श्रुत्वा विधिप्रवृत्तौ अपि विधिकरणेऽपि अनाभोगादिना अनुपयोगानादिसंस्कारप्रमादकषायादिना अविधिदोषः अविधिरुपो यो दोषः, स छद्मस्थस्य भवति इति = एतस्मात्कारणात् विधिकरणेऽपि अवश्यमविधिसम्भवरुपात् तद्भिया = अविधिदोषभिया न क्रियात्यागो चैत्यवन्दनादिपरिहारः विधेयः ।

ननु तत्रभवन्नविधिदोषो महानर्थकरः किं न स्यात् ? स्यादेव, ततश्च न कर्त्तव्यमेव तदनुष्ठानं, येनाविध्यसम्भवान्महानर्थो न स्यादित्यत आह-प्रथमाभ्यासे = प्रथम द्वितीयतृतीयादिचैत्यवन्दनानुष्ठाने तथाविधज्ञानाभावाद् = चैत्यवन्दनादिविधिविषयकस्य संपूर्णज्ञानस्याभावात् अविधिदोषो निरनुबन्ध इत्येवमन्वयः कर्त्तव्यः । अन्यदाऽपि वा = अभ्यास प्राप्त्यनन्तरमपि, विधिविषयकस्य ज्ञानस्य सद्भावेऽपि प्रज्ञापनीयस्य = 'अविधिदोषो न कर्त्तव्यः' इत्यादिप्रज्ञापनां श्रोतुमर्हस्य, तच्छ्रवणे रसिकस्य, अविधिदोषस्य

पश्चात्तापं कुर्वतः, 'विधिरेव कर्त्तव्यः' इति मन्यमानस्य इत्यादि । अविधिदोषो निरनुबन्धः = अविध्यनुबन्धरहितः, यदि वा दोषानुबन्धरहितः, अत एव अनर्थकरोऽपि नेति ।

वाक्यान्वयस्त्वेवम् → प्रथमाभ्यासे तथाविधज्ञानाभावाद् अविधिदोषो निरनुबन्धः, अन्यदाऽपि वा = अप्रथमाभ्यासेऽपि, अभ्यस्तदशायामपि, तथाविधज्ञानसत्वेऽपीति भावः प्रज्ञापनीयस्य न तु कदाग्रहिणः निष्ठुरस्य अविधिदोषो निरनुबन्ध ← इति ।

इति = अविधिदोषस्य निरनुबन्धत्वात् तस्य = प्रथमाभ्यासिनः अभ्यस्तदशावर्तिप्रज्ञापनीयस्य वा तादृशानुष्ठानमपि = अविध्यनुष्ठानमपि, विध्यनुष्ठानं तु दोषाय नैव भवति, किन्तु अविध्यनुष्ठानमपि न भवतीत्यपिशब्दार्थः न दोषाय ।

अविध्यनुष्ठानस्य निर्दोषत्वे कारणमाह विधिबहुमानादित्यादि । तयोर्हि विधिबहुमानं गुर्वाज्ञायोगश्च अस्ति, ततश्च कालक्रमेण तयोरनुष्ठानं विधियुतं भविष्यत्येवेति तयोरविध्यनुष्ठानस्य स्वरुपतोऽविधिरुपत्वेऽपि फलतः = कालक्रमभाविविध्यात्मकं फलमपेक्ष्य यदि वा विधिजन्यं यत्फलं, तत्प्राप्तिकारकत्वमपेक्ष्य विधिरुपत्वात् प्रकृतं अविध्यनुष्ठानमपि विध्यनुष्ठानकारणत्वात् कारणे कार्योपचाराद् विधिजन्यफलजनकत्वाद्वा विध्यनुष्ठानमेवेति भावः ।

एतावन्मात्रप्रतिपादनपराणि = 'विधिप्रवृत्तावपि' इत्यादिनाऽऽरभ्य 'फलतो विधिरुपत्वात्' इत्यन्तं यदुक्तं, तावन्मात्रप्रतिपादनपराणि 'अविहिकया' इत्यादिवचनानीति ।

न कश्चिद् दोषः न परस्परं विरोधः ।

अत्रार्थे वृत्तिकृत्स्वकृतग्रन्थस्यैव गाथां प्रदर्शयति अवोचाम इत्यादि ।

गाथान्वयस्त्वेवम् → अशुद्धाऽपि क्रिया सदाशयात् शुद्धायाः हेतुः । ताम्रं रसानुवेधेन स्वर्णत्वमुपगच्छति । ← इति । अत्र सदाशयात् = विधिबहुमानादिरुपात् शोभनाध्यवसायात् । रसानुवेधेन = सुवर्णरससंपर्केण । शेषं सुगमम् ।

---

**यशो.: यस्तु विध्यबहुमानादविधिक्रियामासेवते तत्कर्तुरपेक्षया विधिव्यवस्थापनरसिकस्तदकर्ताऽपि भव्य एव, तदुक्तं-योगदृष्टिसमुच्चये ग्रन्थकृतैव-**

**'तात्त्विकः पक्षपातश्च, भावशून्या च या क्रिया । अनयोरन्तरं ज्ञेयं, भानुखद्योतयोरिव ॥१॥' (२२३ श्लो.०) इत्यादि ।**

---

चन्द्र.: एवं 'अकृतादविधिकृतं वरं' इति प्रतिष्ठापितम्, किन्त्वत्र अविधिकृतं विधिबहुमानाद्दिशुभभावमाश्रित्योक्तम् । अधुना 'अविधिकृतादकृतं वरं' इति व्यवस्थापयन्नाह यस्तु इत्यादि सुगमम् । तथा

च विध्यबहुमानादियुतमविध्यनुष्ठानं विधिबहुमानान्वितेन जनेनाकृतादानुष्ठानाद् जघन्यमिति ।

अत्र चायं विवेक:

+ विधिबहुमानादिशुभभावरहितोऽविध्यनुष्ठानकर्ता न प्रशस्त:

+ विधिबहुमानादिशुभभावरहितोऽविध्यनुष्ठानस्याकर्ता न प्रशस्त:

+ विधिबहुमानादिशुभभावरहितो विध्यनुष्ठानस्य कर्ता न प्रशस्त:

+ विधिबहुमानादिशुभभावसहितोऽविध्यनुष्ठानस्याकर्ता प्रशस्त:

+ विधिबहुमानादिशुभभावसहितोऽविध्यनुष्ठानस्य कर्ताऽनन्तरोक्तजीवात्प्रशस्ततर:

विधिबहुमानादिशुभभावसहितो विध्यनुष्ठानस्य कर्ताऽनन्तरोक्तजीवात्प्रशस्ततम:

अत्र बहु वक्तव्यं, तत्तु विस्तरभियोपेक्ष्यते ।

तात्त्विक इत्यादि । विधिबहुमानादिरुपस्तात्त्विको विधिपक्षपात: भानुसदृश:, विधिबहुमानादिरुपभावशून्या बाह्यविधिसमन्विताऽपि क्रिया खद्योतसदृशीति तात्पर्यार्थ: ।

---

**यशो.: न चैवं तादृशषष्ठसप्तमगुणस्थानपरिणतिप्रयोज्यविधिव्यवहाराभावादस्मदादीनामिदानीन्तनमावश्यकाद्याचरणमकर्तव्यमेव प्रसक्तमिति शङ्कनीयम्,**

---

चन्द्र.: शङ्कते न चेत्यादि । एवं = 'पंडितेनातिनिपुणबुद्ध्या विधिनीत्या चैत्यवन्दनादौ प्रवर्तितव्यम्' इति यत्प्रतिपादितम्, तदनुसारेण विधिपालनस्यैवादरणीयत्वे तादृशेत्यादि ।

अयं भाव: या सामान्या षष्ठसप्तमगुणस्थानपरिणति:, तत्प्रयोज्यो विधिव्यवहार: सामान्य एव, स तु इदानीमपि सम्भवति, सामान्यपरिणतेरिदानीमपि सद्भावात् । या तु विशिष्टा परिणति:, तत्प्रयोज्यो विधिव्यवहारो विशिष्ट एव, स तु इदानीं न सम्भवेत्, तादृशपरिणतेरभावात् । तथा च विशिष्टो विधिव्यवहारो नास्त्येव, ततश्च यदि विशिष्टस्यैव विधिव्यवहारस्याग्रह:, तदाऽस्मदादीनामिदानीन्तनं चैत्यवन्दनादि अनाचरणीयमेव भवेत्, विशिष्टविधिव्यवहाराभावात् इति ।

---

**यशो.: विकलानुष्ठानानामपि 'जा जा हविज्ज जयणा, सा सा से णिज्जरा होइ ।' इत्यादिवचनप्रामाण्यात् यत्किञ्चिद्विध्यनुष्ठानस्येच्छायोगसंपादकतदितरस्यापि ( ?संपादकत्वेनेतरस्यापि ) बालाद्यनुग्रहसम्पादकत्वेनाकर्तव्यत्वासिद्धे:**

---

चन्द्र.: समाधत्ते विकलानुष्ठानानामपि इत्यादि । जा जा इत्यादि । संपूर्णगाथा त्वियम् → हीणस्स वि सुद्धपरूवगस्स संविग्गपक्खवायस्स । जा जा हविज्ज जयणा सा सा से णिज्जरा होइ ← इति । तदर्थस्त्वयम् → हीनस्यापि = विधिविकलतायुक्तस्यापि शुद्धप्ररूपकस्य = सम्यग् विधिप्ररूपकस्य संविग्नपक्षपातस्य =

संविग्नेषु = विधिसमन्वितेषु पक्षपात: = बहुमानादिरुपो यस्य स, संविग्नपक्षपात:, तस्य या या यतना स्थानादिषु यत्किञ्चित्प्रयत्नादिरुपा सा सा यतना तस्य = प्रकृतसाधो: निर्जरा = निर्जराकारणं भवति। यावती तस्य यतना, तावती तस्य कर्मनिर्जरेति। अत्र यद्यपि यतना न निर्जरा, तथापि सा निर्जराकारणमिति कृत्वा कारणे कार्योपचाराद्यतनैव निर्जरा उक्तेति।

इच्छायोगेत्यादि। इच्छायोगसम्पादकं यत् तदितरदनुष्ठानं, तस्यापि। अत्र तदितरन्नाम तादृशषष्ठसप्तमगुणस्थानपरिणति-प्रयोज्यविधिव्यवहारात्मकविशिष्टानुष्ठानात् इतरद् इति।

बालाद्यनुग्रहेत्यादि। अत्रादिपदान्मध्यमजीवग्रहणम्।

इदमत्र रहस्यं –

यद्यपि अधुना विशिष्टा षष्ठसप्तमगुणस्थानपरिणतिर्नास्ति, ततश्च तत्प्रयोज्य: तादृशो विधिव्यवहारोऽपि नास्ति, अर्थात् सर्वप्रकारेण विधिसहितमनुष्ठानं नास्ति। किन्तु विध्यविध्यु-भयान्वितमेवानुष्ठानमस्ति। तथाऽपि शास्त्रे उक्तं यदुत विध्यविधिमिश्रितेऽनुष्ठाने यावान् विधि:, तावती निर्जरा तु स्यादेव, तदनुसारेणात्मविकासोऽपि स्यादेव। ततश्चास्मदादिषु अधुना यदनुष्ठानमस्ति, तत् यद्यपि तादृशं विशिष्टं नास्ति, किन्तु तद्भिन्नमस्ति, तथाऽपि तदनुष्ठानं अस्मदादिषु इच्छायोगस्य सम्पादकमस्ति, विधिबहुमानादियुक्तस्य विधिविकलतायुक्तस्येच्छायोगरुपत्वात्। इच्छायोगश्च प्रवृत्तियोगादिकारणमिति अधुनातनानामस्मदादीनां बालादिजीवानां विधिविकलमपि तत् अनुग्रहसम्पादकमिति कृत्वा तत्कर्त्तव्यमेव, न त्वकर्त्तव्यमिति।

अत्र द्वितीयं मतं 'यत्किञ्चिद्विध्यनुष्ठानस्येच्छायोगसंपादकत्वेन तदितरस्यापि बालाद्यनुग्रहसम्पादकत्वेनाकर्त्तव्यत्वासिद्धे:' इति पाठमाश्रित्येदं → यत्किञ्चिद् विध्यनुष्ठानमिच्छायोगसंपादकत्वेनाकर्त्तव्यं न सिद्धं, किन्तु कर्तव्यमेव। तथा सर्वथा विधिरहितमप्यनुष्ठानं बालाद्यनुग्रहसम्पादकत्वेनाकर्त्तव्यं न सिद्धं, किन्तु कर्त्तव्यमेवेति। तत्त्वमत्र बहुश्रुता विदन्ति।

---

**यशो.: इच्छायोगवद्भिर्विकलानुष्ठायिभिर्गीतार्थै: सिद्धान्तविधिप्ररूपणे तु निर्भरो विधेयस्तस्यैव तेषां सकलकल्याणसम्पादकत्वात्, उक्तं च गच्छाचारप्रकीर्णके – 'जइ वि ण सक्कं काउं, सम्मं जिणभासियं अणुट्ठाणं। तो सम्मं भासिज्जा, जह भणियं खीणरागेहिं ॥१॥ ओसन्नो वि विहारे, कम्मं सोहेइ सुलभबोही य। चरणकरणं विशुद्धं, उववूहंतो परुवितो ॥२॥' (गाथा ३२-३४) इति।**

---

चन्द्र.: यद्यपि विधिविकलमपि अनुष्ठानं हितकरं, तथाऽपि तेनैव यदि संतुष्येत, तर्हि क्रमशो विधिबहुमानादिविगमे सति इच्छायोगो विनश्येदेव। तस्मात्सिद्धान्तविधिप्ररूपणमवश्य-मादरणीयम् इत्यभिप्रायवानाह इच्छायोगेत्यादि। गीतार्थै: अगीतार्थानां सिद्धान्तविधिप्ररूपणाऽधिकाराभावाद्

गीतार्थपदमत्रोपात्तमिति । तस्यैव = सिद्धान्तविधिप्ररूपणस्यैव तेषां = विकलानुष्ठानानां गीतार्थानां ।

गच्छाचारप्रकीर्णकगाथान्वयस्त्वेवम् → यदि जिनभाषितमनुष्ठानं सम्यक्कर्तुं अशक्यं, तर्हि सम्यक् भाषेत, यथा क्षीणरागैः भाषितम् ← इति ।

→ विहारे = संयमानुष्ठाने ओसन्नो वि = शिथिलोऽपि कर्म शोधयति, सुलभबोधिश्च भवति । किं कुर्वन्नित्याह विशुद्धं चरणकरणं उपबृंहयन् प्ररूपयंश्च ← इति ।

---

**यशो.: ये तु गीतार्थाज्ञानिरपेक्षा विध्यभिमानिन इदानीन्तनव्यवहारमुत्सृजन्ति अन्यं च विशुद्धं व्यवहारं संपादयितुं न शक्नुवन्ति ते बीजमात्रमप्युच्छिन्दन्तो महादोषभाजो भवन्ति । विधिसम्पादकानां विधिव्यवस्थापकानां च दर्शनमपि प्रत्यूहव्यूहविनाशनमिति वयं वदामः ॥१६॥**

---

चन्द्र.: ये तु इत्यादि स्पष्टमेव ।

विधिसम्पादकानां = विधिपालकानां विधिव्यवस्थापकानां च = विधिपालनाभावेऽपि विशुद्धविधिप्ररूपकानां दर्शनमपि आस्तां तावच्छुश्रुषाप्रभृतिकं इत्यपिशब्दार्थः प्रत्यूहेत्यादि । प्रत्यूहानां = विघ्नानां व्यूहस्य = समूहस्य विनाशनं = विनाशकं इति वयं = यशोविजयोपाध्यायाः ।

व्याख्याता षोडशी कारिका ।

---

**यशो.: अथेमं प्रसक्तमर्थं संक्षिपन् प्रकृतं निगमयन्नाह -**

**कयमित्थ पसंगेणं, ठाणाइसु जत्तसंगयाणं तु ।**
**हियमेयं विन्नेयं, सदणुट्ठाणत्तणेण तहा ॥१७॥**

---

चन्द्र.: अधुना सप्तदश्याः कारिकायाः प्रस्तावनामारचयति वृत्तिकृत् –

अथ इमं = अनन्तरमेव निगदितं प्रसक्तं = 'स्मृतस्योपेक्षानर्हत्वं' इति प्रसङ्गसङ्गत्याऽऽपतितं प्रतिपादितं च अर्थं संक्षिपन् इत्यादि । स्थानादियोगनिरुपणमारब्धं, तत्र विध्यविध्यनुष्ठानादि स्मृतिमागतं, तदुपेक्षा न युक्तेति तन्निरुपणं कृतं, अधुना तमर्थं समाप्य स्थानादियोगनिरुपणोपसंहारमाह इति भावः ।

सप्तदश्याः कारिकायाः अन्वयस्त्वेवम्

→ अत्र प्रसङ्गेन कृतं, स्थानादिषु यत्नसङ्गतानां तु एतत् हितं विज्ञेयम्, तथा सदनुष्ठानत्वेन ← इति ।

---

**यशो.: 'कयमित्थ' त्ति । 'कृतं' पर्याप्तं अत्र 'प्रसङ्गेन' प्ररूपणीयमध्ये स्मृतार्थविस्तारणेन 'स्थानादिषु' प्रदर्शितयोगभेदेषु 'यत्नसंगतानां तु' प्रयत्नवतामेव 'एतत्'**

चैत्यवन्दनाद्यनुष्ठानं 'हितं' मोक्षसाधकं विज्ञेयम्, चैत्यवन्दनगोचरस्थानादियोगस्य मोक्षहेतुत्वे तस्यापि तत्प्रयोजकत्वादिति भावः ।

चन्द्र.: मोक्षसाधकं विज्ञेयं इति ।

ननु स्थानादियोगाः मोक्षसाधकाः, नतु चैत्यवन्दनाद्यनुष्ठानमिति शङ्कायामाह चैत्यवन्दनेत्यादि । तथा च यद्यपि स्थानादियोगा एव मोक्षसाधकाः, तथाऽपि तेषां विषयस्तु चैत्यवन्दनाद्येवेति उपचारात् चैत्यवन्दनमपि मोक्षसाधकमुच्यते इति न कश्चिद् दोष इति ।

यशो.: 'तथा' इति प्रकारान्तरसमुच्चये । 'सदनुष्ठानत्वेन' - योगपरिणामकृतपुण्यानुबन्धिपुण्यनिक्षेपाद्विशुद्धचित्तसंस्काररूपया प्रशान्तवाहितया सहितस्य चैत्यवन्दनादेः स्वातन्त्र्येणैव मोक्षहेतुत्वादिति भावः ।

चन्द्र.: प्रकारान्तरसमुच्चये इति । चैत्यवन्दनस्य मोक्षसाधकत्वमुपचारादुक्तमित्येकः प्रकारः, अधुना चैत्यवन्दनस्य सदनुष्ठानरुपत्वादुपचारं विनैव मोक्षसाधकत्वमुच्यत इति द्वितीयः प्रकार इति ।

सदनुष्ठानत्वेन चैत्यवन्दनादि हितं = मोक्षसाधकमित्येवमन्वयः कर्त्तव्यः ।

सदनुष्ठानत्वेन तस्य मोक्षहेतुतां स्पष्टयन्नाह योगपरिणामेत्यादि । स्थानादियोगपरिणामेन कृतः यः पुण्यानुबन्धिपुण्यस्य निक्षेपः, तस्माद् । अस्य च 'मोक्षहेतुत्वात्' इत्यनेन सहान्वयः कर्त्तव्यः, या विशुद्धचित्तसंस्काररुपा प्रशान्तवाहिता, तया युक्तस्य चैत्यवन्दनादेः स्वातन्त्र्येणैव = न तु स्थानादियोगविषयत्वेनेति एवकारार्थः मोक्षहेतुत्वात् । प्रशान्तवाहितायुक्तं चैत्यवन्दनं स्वातन्त्रेणैव मोक्षसाधकम्, योगपरिणामकृतस्य पुण्यानुबन्धिपुण्यस्य निक्षेपादिति भावः ।

यशो.: प्रकारभेदोऽयं नयभेदकृत इति न कश्चिद्दोषः ॥१७॥

चन्द्र.: नन्वेवं चैत्यवन्दनादेः स्वातन्त्र्येणैव मोक्षहेतुत्वं सत्यमुत स्थानादियोगविषयत्वेनेति इति चेत्, प्रकारभेदोऽयं नयभेदकृतः अपेक्षामात्रकृत इति न कश्चिद् दोषः ।

व्याख्याता सप्तदशी कारिका ।

यशो.: सदनुष्ठानभेदानेव प्ररूपयंश्चरमतद्भेदे चरमयोगभेदमन्तर्भावयन्नाह -

एयं च पीइभत्तागमाणुगं तह असंगयाजुत्तं ।
नेयं चउव्विहं खलु, एसो चरमो हवइ जोगो ॥१८॥

चन्द्र.: चरमतद्भेदे = चरमो यः सदनुष्ठानभेदः, तस्मिन् चरमयोगभेदं = स्थानादियोगपञ्चकस्य यश्चरमो भेदोऽनालम्बनयोगरूपः, तम् ।

अष्टादश्याः कारिकायाः अन्वयस्त्वेवम्

→ एतच्च प्रीतिभक्त्यागमानुगं तथाऽसङ्गतायुतं चतुर्विधं खलु ज्ञेयम् । एष चरमो योगो भवति ← इति ।

---

यशो.: 'एयं च' त्ति । 'एतच्च'-सदनुष्ठानं प्रीतिभक्त्यागमाननुगच्छति तत् प्रीतिभक्त्यागमानुगं - प्रीत्यनुष्ठानं भक्त्यनुष्ठानं वचनानुष्ठानं चेति त्रिभेदं तथाऽसंगतया युक्तं असंगानुष्ठानमित्येवं चतुर्विधं ज्ञेयम् ।

एतेषां भेदानामिदं स्वरूपम्-यत्रानुष्ठाने प्रयत्नातिशयोऽस्ति परमा च प्रीतिरूत्पद्यते शेषत्यागेन च यत्क्रियते तत्प्रीत्यनुष्ठानम् । आह च- 'यत्रादरोऽस्ति परमः, प्रीतिश्च हितोदया भवति कर्तुः । शेषत्यागेन करोति यच्च तत्प्रीत्यनुष्ठानम्' (षो० १०-३) ॥

---

चन्द्र.: प्रीत्यनुष्ठानस्वरुपमाह यत्रेत्यादि । यथा बुभुक्षोः भोजनकरणे यत्नातिशयो विद्यते, इष्टभोजनात्परमा च प्रीतिरुत्पद्यते, बुभुक्षुः भोजनक्रियाभिन्नानां सकलानां क्रियाणां त्यागेन भोजनभिन्नानां सकलानां वस्तूनां त्यागेन च भोजनं करोति, तथैवात्र मुमुक्षोर्विज्ञेयम् ।

षोडशकगाथार्थस्तु सुगम एव । नवरं हितस्योदयो यस्मात् सा हितोदया ।

---

यशो.: एतत्तुल्यमप्यालम्बनीयस्य पूज्यत्वविशेषबुद्ध्या विशुद्धतरव्यापारं भक्त्यनुष्ठानम् । आह च - गौरवविशेषयोगाद् बुद्धिमतो यद्विशुद्धतरयोगम् । क्रिययेतरतुल्यमपि, ज्ञेयं तद्भक्त्यनुष्ठानम् ॥ (षो० १०-४) ॥ प्रीतित्वभक्तित्वे संतोष्यपूज्यकृत्यकर्तव्यताज्ञानजनितहर्षगतौ जातिविशेषौ, आह च - 'अत्यन्तवल्लभा खलु, पत्नी तद्वद्धिता च जननीति । तुल्यमपि कृत्यमनयोर्ज्ञातं स्यात्प्रीतिभक्तिगतम् ॥' (षो० १०-५) ॥ 'तुल्यमपि कृत्यं' - भोजनाच्छादनादि 'ज्ञातं' उदाहरणम् ।

---

चन्द्र.: भक्त्यनुष्ठानमाह एतत्तुल्यमपि = प्रीत्यनुष्ठानतुल्यमपि आलम्बनीयस्य = अनुष्ठानविषयस्य देवगुर्वादेः पूज्यत्वविशेषबुद्ध्या = प्रीत्यनुष्ठाने देवगुर्वादौ यादृशी पूज्यत्वबुद्धिर्भवति, तत्सकाशात् विशिष्टया पूज्यत्वबुद्ध्या विशुद्धतरव्यापारं = प्रीत्यनुष्ठानसकाशादधिको विशुद्धो मनआदिव्यापारो यस्मिन् तादृशं भक्त्यनुष्ठानम् ।

प्रीत्यनुष्ठानं भक्त्यनुष्ठानं च बाह्यदृष्ट्या तुल्यौ, किन्तु प्रीत्यनुष्ठाने देवगुर्वादिविषये या पूज्यत्वबुद्धिरस्ति,

तत्सकाशात् भक्त्यनुष्ठाने तस्मिन्नेव देवगुर्वादिविषये विशिष्टा पूज्यत्वबुद्धिरस्ति इत्येतावान् भेदः ।

षोडशकगाथान्वयस्त्वेवम् → गौरवविशेषयोगात् बुद्धिमतो यद्विशुद्धतरयोगम्, तत् क्रियया इतरतुल्यमपि भक्त्यनुष्ठानम् ← इति ।

गौरवविशेषो नाम देवादिबहुमानादिरुपो ग्राह्यः, ततश्च प्रीत्यां कर्तुः देवादिबहुमानस्य मन्दत्वाद्गौरवविशेषो नास्ति, भक्तौ च देवाधिबहुमानस्य तीव्रत्वाद् सोऽस्तीति ।

ननु प्रीत्यनुगमनुष्ठानं प्रीत्यनुष्ठानं इति उक्तम्, एवं भक्त्यनुष्ठानमपि । किन्तु का नाम प्रीतिः ? का च भक्तिः ? इत्यत आह प्रीतित्व इत्यादि । संतोष्यानां = पत्नीपुत्रभगिनीप्रभृतीनां स्नेहविषयाणां यानि कृत्यानि भोजनवस्त्रादिरुपाणि, तेषां यत् कर्त्तव्यताज्ञानं = "एते मया संतोष्याः, यत एतेषु मम स्नेहो वर्तते, मम स्वजना एते, ततश्च तेषां भोजनवस्त्रादिकार्यं सर्वं मया सम्पादनीयम्" इत्यादिरुपं ज्ञानं, तज्जनितो यो हर्षः स एव प्रीतिः, तस्मिन् प्रीतित्वजातिर्वर्तते ।

एवं पूज्यानां = मातापितृपितामहादिरुपाणां स्नेहविषयाणामुपकारिणां च यानि कृत्यानि, भोजनादिरुपाणि, तेषां यत्कर्त्तव्यताज्ञानं "एते मम स्वजनाः, ममोपकारिणश्च, तस्मादवश्यं मयैतेषां कृत्यानि करणीयानि" इत्यादिरुपं, तज्जनितो हर्षो भक्तिस्तत्र भक्तित्वजातिर्वर्तते ।

षोडशकगाथान्वयस्त्वेवम् → पत्नी खलु अत्यन्तवल्लभा, जननी तद्वद् हिता च । अनयोः तुल्यमपि कृत्यं प्रीतिभक्तिगतं ज्ञातं स्यात् ← इति ।

अत्र तद्वद् = पत्नीवदत्यन्तवल्लभा । ज्ञातं = दृष्टान्तः ।

---

**यशो.: शास्त्रार्थप्रतिसंधानपूर्वा साधोः सर्वत्रोचितप्रवृत्तिर्वचनानुष्ठानम्, आह च - 'वचनात्मिका प्रवृत्तिः सर्वत्रौचित्ययोगतो या तु । वचनानुष्ठानमिदं, चारित्रवतो नियोगेन ।' ( षो० १०-६ )**

---

चन्द्र.: वचनानुष्ठानमाह शास्त्रार्थेत्यादि । "इदं चैत्यवन्दनं शास्त्रेऽनेन विधिना कर्तव्यतयोक्तं, तस्मादनेनैव विधिना मया कर्त्तव्यम्" इत्येवं शास्त्रार्थस्य प्रतिसन्धानं पूर्वं यस्यां, तादृशी साधोः सर्वत्र = कुत्राप्यनुष्ठाने चितप्रवृत्तिः वचनानुष्ठानम् ।

षोडशकगाथा सुगमा । नवरं नियोगेन = नियमेन अवश्यंभावेनेति यावत् ।

---

**यशो.: व्यवहारकाले वचनप्रतिसंधाननिरपेक्षं दृढतरसंस्काराच्चन्दनगन्धन्यायेनात्म-ाद्भूतं जिनकल्पिकादीनां क्रियासेवनमसंगानुष्ठानम्, आह च- 'यत्त्वभ्यासातिशयात् ात्मीभूतमिव चेष्ट्यते सद्भिः । तदसंगानुष्ठानं भवति त्वेतत्तदावेधात् ॥ ( षो० १०-७ ) ॥**

'तदावेधात्'-यथाऽऽद्यं चक्रभ्रमणं दण्डव्यापारादुत्तरं च तज्जनितकेवलसंस्कारादेव, तथा भिक्षाटनादिविषयं वचनानुष्ठानं वचनव्यापाराद्, असंगानुष्ठानं च केवलतज्जनितसंस्कारादिति विशेषः, आह च - 'चक्रभ्रमणं दंडात्तदभावे चैव यत्परं भवति । वचनासंगानुष्ठानयोस्तु तज्ज्ञापकं ज्ञेयम्' ॥ ( षो० १०-८ ) इति ॥

---

चन्द्र.: असङ्गानुष्ठानमाह व्यवहारकाले = चैत्यवन्दनाद्यनुष्ठानकाले वचनप्रतिसन्धाननिरपेक्षं = 'शास्त्रे इदमनेन विधिना कर्त्तव्यतयोक्तं' इत्येवंरुपस्य वचनप्रतिसन्धानस्यापेक्षा यत्र नास्ति, तादृशं । ननु तर्हि तदनुष्ठानं विधियुतं कथं स्यात् ? शास्त्रोक्तविधिप्रतिसन्धानाभावेन विधिपालनासम्भवादित्यत आह दृढतरसंस्कारात् = प्रागनेकशो यद् वचनानुष्ठानमादृतं, तेन विधियुतानुष्ठानस्य यो दृढतरः संस्कारः सञ्जातः तस्मात्, चन्दनगन्धन्यायेन = यथा चन्दनं विना तद्गन्धो न भवति, तद्गन्धं विना च चन्दनं नेत्येवंभूतेन न्यायेन आत्मसाद्भूतं = स्वभावभूतं जिनकल्पिकादीनां = आदिपदात् प्रतिमाकल्पिकादिपरिग्रहः क्रियासेवनम् = भिक्षाटनादिरुपं असङ्गानुष्ठानम् ।

षोडशकगाथान्वयस्त्वेवम् → यत्तु अभ्यासातिशयात् सद्भिः सात्मीभूतमिव चेष्ट्यते = क्रियते, तत् असङ्गानुष्ठानं । एतत्तु तदावेधात् भवति ← इति ।

स्पष्टम् । नवरं तदावेधात् = वचनानुष्ठानजन्यसंस्कारात् । एतदेव स्पष्टमाह तदावेधात् = यथाऽऽद्यं इत्यादि ।

षोडशकगाथाभावार्थस्त्वेवम् → दण्डात् यत् चक्रभ्रमणं भवति, दण्डाभावे च यत् परं = पश्चात्कालभावि चक्रभ्रमणं भवति । तत् = उभयं चक्रभ्रमणं वचनासंगानुष्ठानयोस्तु ज्ञापकं = दृष्टान्तः ज्ञेयम् ← इति ।

दण्डजन्यं चक्रभ्रमणं वचनानुष्ठानज्ञापकं, दण्डजन्यसंस्कारजन्यं असङ्गानुष्ठानज्ञापकमिति विवेकः ।

---

यशो.: 'खलु' इति निश्चये । एतेष्वनुष्ठानभेदेषु 'एषः' एतदः समीपतरवृत्तिवाचकत्वात्समीपाभिहिताऽसङ्गानुष्ठानात्मा चरमो योगोऽनालम्बनयोगो भवति, सङ्गत्यागस्यैवानालम्बनलक्षणत्वादिति भावः ॥१८॥

---

चन्द्र.: एतदः = 'एतद्' इति सर्वनाम्नः समीपतरवृत्तिवाचकत्वात् = यत् समीपतरवर्ति, तस्य वाचकत्वात् । अयं भावः 'एयं च पीइभत्तागमाणुगं तह असंगयाजुत्तं' इत्येवं गाथायां प्रीत्यादीनि क्रमशो निरुपितानि । तत्र 'असंगतायुतं' इति अन्ते उक्तं, तस्मात्तदेव 'एष' इति सर्वनाम्नः समीपतरवर्ति, प्रीत्यादीनि तु तदपेक्षया दूरवर्तीनि, तस्मात् 'एष' इति सर्वनामपदं असङ्गानुष्ठानस्य वाचकमिति बोध्यम् ।

एतदेवाह समीपाभिहितेत्यादि । प्रीत्यादिचतुष्कस्यान्तिममनुष्ठानं असङ्गरुपं स्थानादिपञ्चकस्यान्तिमयोगरुपं अनालम्बयोगरुपं अस्ति इति भावः ।

ननु असङ्गं कथं अनालम्बनयोगो भवेत् ? द्वयोर्भिन्नत्वादित्यतो द्वयोरभेदमाह सङ्गत्यागस्यैव =

रुपिद्रव्याद्यालम्बनात्मकस्य सङ्गस्य यो त्यागः, तस्यैव अनालम्बनलक्षणत्वात् । असङ्गे वचनस्याप्यालम्बनं नास्ति, अनालम्बनेऽपि एवमेवेति बोध्यम् ।

व्याख्याता अष्टादशी कारिका ।

---

**यशो.: आलम्बनविधयैवानालम्बनस्वरूपमुपदर्शयन्नाह -**

**आलंबणं पि एयं, रूवमरूवी य इत्थ परमु त्ति ।**

**तग्गुणपरिणइरूवो, सुहुमो अणालंबणो नाम ॥१९॥**

---

चन्द्र.: अधुना एकोनविंशत्याः प्रस्तावनामाह आलम्बनविधयैव = आलम्बनप्रकारेणैव, न तु अनालम्बनविधया इति एवकारार्थः । अनालम्बनयोगोऽपि सर्वथाऽऽलम्बनरहितो नास्ति, किन्तु तत्राऽपि आलम्बनं विद्यत एव, तदेवालम्बनं प्रदर्शयितुं प्रथमं आलम्बनप्रकारौ तदनन्तरं चानालम्बने किमालम्बनमित्येतद्दर्शयितुमाह –

एकोनविंशत्याः अन्वयः एवम् → अत्र आलम्बनमपि रूपि अरूपि परमश्चेति । तद्गुणपरिणतिरूपो सूक्ष्मोऽनालम्बनो नाम ← इति ।

---

**यशो.: 'आलंबणं पि' त्ति । आलम्बनमपि 'एतत्' - प्राकरणिकबुद्धिसंनिहितं 'अत्र' योगविचारे 'रूपि' समवसरणस्थजिनरूपतत्प्रतिमादिलक्षणम्, 'च'-पुनः 'अरूपी परमः' - सिद्धात्मा इत्येवं द्विविधम् । तत्र तस्य - अरूपिपरमात्मलक्षणस्यालम्बनस्य ये गुणाः - केवलज्ञानादयस्तेषां परिणतिः समापत्तिलक्षणा तया रूप्यत इति तद्गुणपरिणतिरूपः सूक्ष्मोऽतीन्द्रियविषयत्वादनालम्बनो नाम योगः, अरूप्यालम्बनस्येषदालम्बनत्वेन 'अलवणा यवागूः' इत्यत्रेवात्र नञ्पदप्रवृत्तेरविरोधात् ।**

---

चन्द्र.: प्राकरणिकेत्यादि । प्राकरणिकानां = स्थानादियोगप्रतिपादकस्य प्रस्तुतप्रकरणस्य कर्तणां बुद्धौ संनिहितं अष्टादश्यां गाथायां यदानलम्बनपदमुक्तं, तस्माद्यदालम्बनं बुद्धौ समुपस्थितं, तस्यैव ज्ञापकमेतद्गाथावर्ति 'एतत्' इति पदम् ।

समापत्तिलक्षणा = "ध्याताऽन्तरात्मा ध्येयस्तु परमात्मा प्रकीर्तितः । ध्यानं चैकाग्र्यसंवित्तिः, समापत्तिस्तदेकता" इति ज्ञानसारवचनानुसारेण परमात्मनि एकाग्रतासंवेदनानन्तरभाविनी या परमात्मैकताऽनुभूतिः सैव समापत्तिः, तया = समापत्तिलक्षणया परिणत्या रूप्यते स्वरूपं प्राप्यते । तादृशसमापत्तिरेव यस्य रूपं अस्ति, स तद्गुणपरिणतिरूप इति भावः । सूक्ष्मो इति ।

नन्वयं सूक्ष्मः किमर्थमित्यत आह अतीन्द्रियविषयत्वात् = इन्द्रियैरग्राह्यः सिद्धस्वरूपो विषयः यस्य,

तादृशत्वात् अनालम्बनो योगः ।

नन्वेवमनालम्बनेऽपि आलम्बनं त्वस्त्येवेति कथं तस्यानालम्बनत्वकथनमुचितमित्यत आह अरूप्यालम्बनस्य इषदालम्बनत्वेन = अल्पालम्बनत्वेन ।

अयमाशयः यथा यवागुः अल्पलवणवती सती 'अलवणा' इति व्यवह्रीयते । तत्र 'अलवणा' इत्यत्र नञ्पदप्रवृत्तिः 'अल्पं अविवक्षितं' इति न्यायाददुष्टा । तथैवानालम्बनयोगः अल्पालम्बनवान् सन् 'अनालम्बन' इति व्यवह्रीयते, तत्र 'अनालम्बन' इत्यत्र नञ्पदप्रवृत्तिः 'अल्पस्य विवक्षा नास्ति' इति न्यायाददुष्टेति ।

---

**यशो.: 'सुहुमो आलंबणो नाम' त्ति क्वचित्पाठस्तत्रापि सूक्ष्मालम्बनो नामैष योगस्ततोऽनालम्बन एवेति भाव उन्नेयः, उक्तं चात्राधिकारे चतुर्दशषोडशके ग्रन्थकृतैव - 'सालम्बनो निरालम्बनश्च योगः परो द्विधा ज्ञेयः । जिनरूपध्यानं खल्वाद्यस्तत्तत्त्वगस्त्वपरः' ॥१॥ सहालम्बनेन चक्षुरादिज्ञानविषयेण प्रतिमादिना वर्तत इति सालम्बनः । आलम्बनात् विषयभावापत्तिरूपान्निष्क्रान्तो निरालम्बनः, यो हि छद्मस्थेन ध्यायते न च स्वरूपेण दृश्यते तद्विषयो निरालम्बन इति यावत् । जिनरूपस्य-समवसरणस्थस्य ध्यानं खलु 'आद्यः'-सालम्बनो योगः । तस्यैव-जिनस्य तत्त्वं-केवलजीवप्रदेशसंघातरूपं केवलज्ञानादिस्वभावं तस्मिन् गच्छतीति तत्तत्त्वगः, 'तुः' एवार्थे, 'अपरः' अनालम्बनः,**

---

चन्द्र.: ततो = सूक्ष्मानालम्बनत्वादेव । भाव उन्नेयः = भावार्थो भावनीयः । अर्थात् 'सुहुमो अणालम्बणो नाम' इत्यस्य 'सुहुमो आलम्बणो नाम' इत्यस्य च परमार्थस्तुल्य एव ।

अत्राधिकारे = योगाधिकारे ।

षोडशकगाथान्वयस्त्वेवम् → योगो द्विधा ज्ञेयः सालम्बनः परो निरालम्बनश्चेति । [परः = उत्कृष्टः, द्वितीयो वेति] आद्यः खलु जिनरूपध्यानं, अपरस्तु तत्तत्त्वगः ← इति ।

वृत्तिकृदेव स्पष्टमर्थमाह सहालम्बनेनेत्यादि । यो योगः चक्षुरादिज्ञानविषयेण प्रतिमादिना सह वर्तते, स योगः सालम्बन इति भावः । अत्रादिशब्दात् श्रोत्रग्रहणं, द्वितीयादिशब्दाच्छास्त्रवचनादीनि ग्राह्याणि ।

विषयभावापत्तिरूपात् इति । अयं भावः यदा प्रतिमायाः ज्ञानं भवति, तदा ज्ञानस्य विषयः प्रतिमा भवति, ततश्च प्रतिमायां विषयतायाः विषयभावात्मिकायाः आपत्तिर्भवति, तस्मादेव प्रतिमा आलम्बनमित्युच्यते । ततश्चात्र विषयभावापत्तिरेवालम्बनमित्युक्तम् । वस्तुतः यस्मिन् विषयभावापत्तिर्भवति, तत् आलम्बनं, किन्तु आधाराधेययोः कथञ्चिदभेदात् विषयभावापत्तिरूप आधेय एवात्रालम्बनं उक्त इति । तादृशादालम्बनात्

निष्क्रान्तः आलम्बनाभाववान् इति भावः ।

ननु निरालम्बने किं सर्वथाऽऽलम्बनं नास्ति इत्याशङ्कायामाह यो हि इत्यादि । तथा च निरालम्बनेऽपि आलम्बनं विद्यते एव, केवलं तत् केवलं छद्मस्थध्यानविषयं, न तु छद्मस्थप्रत्यक्षविषयमिति कृत्वा तदालम्बनमत्यन्तसूक्ष्ममिति तद्विषयो योगो निरालम्बन इति । केवलेत्यादि । न तु समवसरणादिबाह्यस्वरूपं तत्रान्तःप्रविष्टं ग्राह्यमितिकेवलपदार्थः । केवलज्ञानादि इत्यादि । केवलज्ञानादयो गुणाः स्वभावः यस्य, तादृशं । तत्तत्त्वगः = तत्तत्त्वविषयक इति । तुः एवार्थे तस्य च 'तत्तत्त्वगः' इत्यनन्तरमेवान्वयः, तथा च तत्तत्त्वग एव अनालम्बनः, न तु तत्तत्त्वान्यविषयक इति एवकारार्थः ।

---

**यशो.: अत्रारूपितत्त्वस्य स्फुटविषयत्वाभावादनालम्बनत्वमुक्तम् । अधिकृतग्रन्थ-गाथायां च विषयतामात्रेण तस्यालम्बनत्वमनूद्यापि तद्विषययोगस्येषदालम्बनत्वा-दनालम्बनत्वमेव प्रासाधीति फलतो न कश्चिद्विशेष इति स्मर्तव्यम् ।**

---

चन्द्र.: अत्र षोडशकस्य योगविंशिकायाश्च मध्ये निरालम्बननिरुपणे स्वरुपतो यो भेदः, फलतश्च यत्साम्यं, तत्प्रदर्शयितुमाह अत्र = षोडशके स्फुटविषयत्वाभावादित्यादि । अरुपितत्त्वं अस्फुटो विषयः, तस्मात् तत् न आलम्बनं, ततश्च तद्विषयको योगोऽनालम्बन इति षोडशकाभिप्राय इति । अधिकृतगाथायां च = योगविंशिकाया एकोनविंशतितमगाथायां प्रस्तुतायां विषयतामात्रेण = तत्तत्त्वं विषयो भवति, इत्येतावन्मात्रापेक्षया तस्य = अरूपितत्त्वस्य आलम्बनत्वं अनूद्यापि = अनुवादं कृत्वाऽपि । तद्विषयेत्यादि । अरूपितत्त्वं अनालम्बनयोगे विषयस्तु भवत्येव, स स्फुटोऽस्फुटो वा इति पश्चाच्चिन्तनीयम् । किन्तु यतः तत् विषयः, तस्मात् तदालम्बनम्, विषयस्यालम्बनत्वात् । परन्तु तदालम्बनमिषदेवेति कृत्वा तद्विषयो योगोऽनालम्बन इति ।

षोडशके विषयस्यैवानालम्बनत्वमुक्त्वा योगस्यानालम्बनत्वमुक्तम्

योगविंशिकायान्तु विषयस्यालम्बनत्वमुक्त्वाऽपि योगस्यानालम्बनत्वमुक्तम् इत्येतावान् भेदः, फलतस्तु भयत्र योगस्यानालम्बनत्वं समानमेव ।

षोडशके विषयस्यास्फुटत्वं प्रथममेव गृहीत्वाऽनालम्बनत्वं निगदितम्, योगविंशिकायान्तु प्रथमं स्यास्फुटत्वं न गृहीतं, किन्तु विषयतां गृहीत्वाऽऽलम्बनत्वं च कथयित्वा पश्चादस्फुटत्वमुक्तमिति भावार्थः ।

---

**यशो.: अयं चानालम्बनयोगः 'शास्त्रसंदर्शितोपायस्तदतिक्रान्तगोचरः । क्त्युद्रेकाद्विशेषेण, सामर्थ्याख्योऽयमुत्तमः ॥३॥' (योग० समु०) इति श्लोकोक्तस्वरूपक्षपकश्रेणीद्वितीयापूर्वकरणभाविक्षायोपशमिकक्षान्त्यादि-र्मसंन्यासरूपसामर्थ्ययोगतो निस्सङ्गानवरतप्रवृत्ता या परतत्त्वदर्शनेच्छा तल्लक्षणो मन्तव्यः ।**

---

चन्द्र.: अधुनाऽनालम्बनयोगस्य स्वरूपमाह अयञ्चानालम्बनयोग इत्यादि ।

योगदृष्टिसमुच्चयगाथान्वयस्त्वेवम् → शास्त्रसन्दर्शितोपाय:, शक्त्युद्रेकाद् विशेषेण तदतिक्रान्तगोचर:, अयं सामर्थ्याख्यो उत्तम: (योग:) ← इति ।

प्रथमं तावत्समासा उच्यन्ते । तत्र शास्त्रेण सन्दर्शिता: उपाया: यस्य, तादृशोऽयं सामर्थ्ययोगोऽस्ति । तथा तस्मात् = शास्त्रात् अतिक्रान्त: गोचर: = विषयो यस्य, तादृशोऽयं योगोऽस्ति । यस्य विषय: शास्त्रेण निरुपयितुं न शक्यत इति । शक्त्युद्रेकात् = शक्तिप्राबल्यात् । सामर्थ्यं इति आख्या = नाम अस्ति यस्य, तादृशोऽयं सामर्थ्याख्यो योगोऽस्ति ।

अधुना भावार्थ: ।

यथा कश्चिन्मार्गज्ञ: पथिकान् मार्गोपायान् प्रदर्शयितुं समर्थो भवति, यथा "अमुकेन प्रकारेणायं मार्ग: प्राप्स्यत" इत्यादि, तथा स मार्गस्य सामान्यं स्वरूपमपि कथयितुं समर्थो भवति "यथाऽयं मार्ग: शोभन: कण्टकप्रचुरो वा" इत्यादि । किन्तु मार्गस्य विशेषं स्वरुपं कथयितुं समर्थो न भवति, यथा "अस्मिन्मार्गे कियन्तो वृक्षा: ?, ते च वृक्षा: के के ? प्रथम: क: ? द्वितीय: क: ?" इत्यादि । यतो मार्गस्य विशेषस्वरूपकथनमशक्यम् ।

एवं शास्त्रं सामर्थ्ययोगस्योपायान् दर्शयति यथा "अप्रमादभावप्रभृतय: गुणा: सामर्थ्ययोगस्य उपाया:" इति । तथा सामर्थ्ययोगस्य सामान्यं स्वरूपमपि दर्शयति यथा "अयं योग: क्षपकश्रेण्यां अष्टमगुणस्थानकादारभ्य भवति, स च जीवस्य वर्धमानशुभपरिणामरूप:" इत्यादि । किन्तु सामर्थ्ययोगे जीवशक्तिप्राबल्यवशात्सामर्थ्ययोग एतादृशो भवति, येन तस्य विशेषेण विषयं तु शास्त्रं न कथयितुं समर्थं भवति, यथा "सामर्थ्ययोगगताध्यवसायस्य कीदृश आकार: ? किमेतादृशरूप:, अन्यादृशो वा ?" इति । ततश्च तस्य योगस्य विषय: शास्त्रातीतोऽस्तीति ।

अत्र षोडशकश्लोकानुसारेण सामर्थ्ययोगस्य यत्स्वरुपं प्राप्तं, तदेव वृत्तिकृत् स्पष्टमेव दर्शयति इति श्लोकोक्तेत्यादि सामर्थ्ययोगपदस्य त्रीणि विशेषणानि, प्रथमं 'इतिश्लोकोक्तस्वरूप' इति । द्वितीयं 'क्षपकश्रेणीद्वितीयापूर्वकरणभावि' इति । तृतीयं तु क्षायोपशमिकक्षान्त्यादिधर्मसन्न्यासरूपं' इति ।

त्रयाणामपि विशेषणानामयमर्थ: । → इतिश्लोकेन = प्रतिपादितेन षोडशकश्लोकेन उक्तं स्वरूपं यस्य तादृशस्सामर्थ्ययोग: ← इति प्रथमविशेषणार्थ: । तथा → क्षपकश्रेण्यां यत् द्वितीयं = सम्यक्त्वप्राप्तिकालभाव्यपूर्वकरणापेक्षया द्वितीयं अपूर्वकरणं, तत्र भावी अयं सामर्थ्ययोग: ← इति द्वितीयविशेषणार्थ: । तथा → क्षायोपशमिकानां क्षान्त्यादिधर्माणां सन्न्यास: = त्याग: एव रूपं = स्वरूपं यस्य, एतादृशस्सामर्थ्ययोग: । क्षपकश्रेणेरर्वाक् क्षायोपशमिका क्षान्त्यादयो धर्मा भवन्ति, क्षपकश्रेणौ तु सर्वथा क्रोधक्षयात् क्षायोपशमिकक्षान्तेस्त्याग:, क्षायिकक्षान्तेश्च प्राप्तिर्भवति । एवं सर्वथा मानक्षयात्

क्षायोपशमिकमार्दवस्य त्यागः, क्षायिकमार्दवस्य च प्राप्तिर्भवति । एवं मायालोभादिक्षयात् क्षायोपशमिकार्जवनिर्लोभतादीनां त्यागः, क्षायिकार्जवनिर्लोभतादीनां च प्राप्तिर्भवति ← इति ।

तथा चैतादृशसामर्थ्ययोगतः निस्सङ्गा = सङ्गरहिता, रागांशरहितेति यावत् यदिवा वचनाद्यालम्बनरहितेति । अनवरतप्रवृत्ता = विच्छेदं विना प्रतिसमयं वर्तमाना या परतत्त्वदर्शनेच्छा = सिद्धस्वरूपाऽभिन्नात्मस्वरूपात्मकस्य परतत्त्वस्य दर्शनेच्छा । तल्लक्षणो = सा इच्छा एव लक्षणं यस्य एतादृशोऽनालम्बनयोगोऽवगन्तव्य इति ।

---

**यशो.: आह च 'सामर्थ्ययोगतो या, तत्र दिदृक्षेत्यसङ्गशक्त्याढ्या । साऽनालम्बनयोगः, प्रोक्तस्तददर्शनं यावत् ॥ ( षो० १५-८ ) ॥' 'तत्र' परतत्त्वे द्रष्टुमिच्छा दिदृक्षा 'इति' एवंस्वरूपा असङ्गशक्त्या निरभिष्वङ्गाविच्छिन्नप्रवृत्त्या आढ्या-पूर्णा 'सा' परमात्मदर्शनेच्छा अनालम्बनयोगः, परतत्त्वस्याऽदर्शनं-अनुपलम्भं यावत्, परमात्मस्वरूपदर्शने तु केवलज्ञानेनानालम्बनयोगो न भवति, तस्य तदालम्बनत्वात् ।**

---

चन्द्र.: अत्र षोडशकगाथामाह सामर्थ्येत्यादि ।

अन्वयस्त्वेवम् → सामर्थ्ययोगतो तत्र = परतत्त्वे विषये असङ्गशक्त्याढ्या या दीदृक्षा = दृष्टुमिच्छा, सा = इच्छा तददर्शनं यावत् = परतत्त्वादर्शनं यावत्, केवलज्ञानप्राप्तिर्यावन्न भवेत् तावदिति भावः, अनालम्बनयोगः प्रोक्तः । परतत्त्वस्य तदानीं स्फुटविषयत्वाभावाद्योगस्यानालम्बनत्वमिति ।

---

**यशो.: अलब्धपरतत्त्वस्तल्लाभाय ध्यानरूपेण प्रवृत्तौ ह्यनालम्बनयोगः, स च क्षपकेन धनुर्धरेण क्षपकश्रेण्याख्यधनुर्दण्डे लक्ष्यपरतत्त्वाभिमुखं तद्वेधाविसंवादितया व्यापारितो यो बाणस्तत्स्थानीयः, यावत्तस्य न मोचनं तावदनालम्बनयोगव्यापारः, यदा तु ध्यानान्तरिकाख्यं तन्मोचनं तदाऽविसंवादितत्पतनमात्रादेव लक्ष्यवेध इतीषुपातकल्पः सालम्बनः केवलज्ञानप्रकाश एव भवति, न त्वनालम्बनयोगव्यापारः, फलस्य सिद्धत्वादिति निर्गलितार्थः ।**

---

चन्द्र.: अस्या एव गाथाया स्पष्टमर्थं वृत्तिकृदाह अलब्धेत्यादि । अत्र योपमा प्रदत्ता, तत्र क्षपकः धनुर्धरः, क्षपकश्रेणी धनुर्दण्डः, परतत्त्वं लक्ष्यं, अनालम्बनयोगः बाणः इति सादृश्यं स्पष्टम् । यथा हि धनुर्धरः धनुर्दण्डात् लक्ष्याभिमुखं बाणं क्षिपति, एवं क्षपकः क्षपकश्रेण्याः सकाशात् अनालम्बनयोगं परतत्त्वाभिमुखं क्षिपति, यावत्कालं बाणः लक्ष्यं न विध्यति, तावत्कालं तस्य व्यापारः, लक्ष्यवेधे तु सति बाणव्यापारो न

स्यादेव, कार्यस्य सिद्धत्वात् । एवं यावत्कालं अनालम्बनयोगः परतत्त्वं न विध्यति, अर्थात् केवलज्ञानं न प्रापयति, तावत्कालं तस्य व्यापारः, केवलज्ञाने तु सति अनालम्बनयोगव्यापारो न स्यादेव, कार्यस्य सिद्धत्वात् ।

अनालम्बनयोगः शुक्लध्यानरूपोऽस्ति, यतः अनालम्बनयोगः क्षपकश्रेणौ भवति, शुक्लध्यानस्य प्रथमौ द्वौ भेदौ अपि तत्रैव स्तः, इति अनालम्बनयोगः शुक्लध्यानाद्यभेदद्वयं च अभिन्ना एवेति ।

क्षपकश्रेणीगतोऽनालम्बनयोगोऽवश्यं केवलज्ञानं प्रापयत्येवेति स केवलज्ञानात्मकलक्ष्यवेधाविसंवादी भण्यते ।

तथा जीवः क्षपकश्रेणौ ध्यानद्वयं प्राप्नोति, त्रयोदशगुणस्थाने तु ध्यानं न प्राप्नोति, किन्तु तदन्ते चतुर्दशगुणस्थाने च शुक्लध्यानस्य चरमभेदद्वयं प्राप्नोति, इत्थं च त्रयोदशगुणस्थाने शुक्लध्यानप्रथमभेदद्वयस्य शुक्लध्यानचरमभेदद्वयस्य चान्तरं भवति, एतदेवान्तरं 'ध्यानान्तरिका' इत्युच्यते ।

अनालम्बनयोगस्य मोचनं नाम तस्य व्यापारविरमणं, तत्तु त्रयोदशगुणस्थानप्राप्तौ सत्यां भवति, ध्यानान्तरिकाऽपि तदेवैति अनालम्बनयोगमोचनमेव ध्यानान्तरिकेति ।

अत्र बाणस्य मोचनं बाणस्य धनुर्दण्डान्निर्गमनमिति अर्थो न कार्यः, किन्तु बाणस्य यो व्यापारः, तस्य विरमणं, बाणस्य लक्ष्ये पतनमित्यर्थो ग्राह्यः, एवमेव दार्ष्टान्तिकेऽपि अनालम्बनयोगमोचनार्थो बोध्यः ।

तथा केवलज्ञाने परतत्त्वं स्पष्टमेव भासते, न तु अस्फुटमिति केवलज्ञानं न अस्फुटविषयकमिति तत् अनालम्बनयोगो न भवेत् । किन्तु यथा प्रतिमायाः दर्शनं स्फुटविषयकमिति कृत्वा सालम्बनो योगः, तथैव केवलज्ञानमपि स्फुटविषयमिति कृत्वा सालम्बनः प्रकाश इति ।

एतत्सर्वं सम्यग् मनसि स्थिरीकृत्य वृत्तिश्चिन्तनीयेति ।

निर्गलितार्थः = सारभूतोऽर्थः ।

---

**यशो.: आह च - 'तत्राऽप्रतिष्ठितोऽयं, यतः प्रवृत्तश्च तत्त्वतस्तत्र । सर्वोत्तमानुजः खलु, तेनानालम्बनो गीतः ॥९॥ ( षो० १५ ) द्रागस्मात्तद्दर्शनमिषुपातज्ञातमात्रतो ज्ञेयम् । एतच्च केवलं तत्, ज्ञानं यत्तत्परं ज्योतिः ॥१०॥' ( षो० १५ ) । 'तत्र' परतत्त्वे 'अप्रतिष्ठितः' अलब्धप्रतिष्ठः सर्वोत्तमस्य योगस्य-अयोगाख्यस्य अनुजः - पृष्ठभावी, 'तद्दर्शनं' परतत्त्वदर्शनं, 'एतच्च' परतत्त्वदर्शनं 'केवलं' संपूर्णं 'तत्' प्रसिद्धं यत् तत् केवलज्ञानं 'परं' प्रकृष्टं ज्योतिः ।**

---

चन्द्र.: अत्रार्थे षोडशकगाथामाह तत्राप्रतिष्ठितो इत्यादि । अस्याः सान्वयो भावार्थोऽयम् → यतः अयं = अनालम्बनयोगः तत्र = परतत्त्वे अप्रतिष्ठितः = अप्राप्तः, तत्त्वतश्च = परमार्थतः, लक्ष्यवेधाविसंवादेनेति यावत् तत्र = परतत्त्वे प्रवृत्तः = तदभिमुखं प्रवृत्तः । सर्वोत्तमानुजः खलु, तेनानालम्बनो गीतः ← इति ।

वृत्तिकृदेव विषमपदव्याख्यामाह पृष्ठभावी । प्रथममनालम्बनयोगो भवति, पश्चात् अयोगाख्यो योगो भवतीति ।

अधुना षोडशकस्यैव द्वितीयां गाथामाह द्रागस्मात् इत्यादि । तदन्वयस्त्वेवम् → अस्मात् = अनालम्बनयोगात् इषुपातज्ञातमात्रतो तद्दर्शनं ज्ञेयम् । एतच्च तत् केवलं ज्ञानं, यत् तत् = केवलज्ञानरूपं परं ज्योतिः ← इति ।

परतत्त्वदर्शनं तत् केवलज्ञानं अस्ति, यत्केवलज्ञानं प्रकृष्टं ज्योतिरस्तीति ।

---

**यशो.: स्याद् अत्र कस्यचिदाशङ्का इषुपातज्ञातात्परतत्त्वदर्शने सति केवलज्ञानोत्तरमनालम्बनयोगप्रवृत्तिर्मा भूत्, सालम्बनयोगप्रवृत्तिस्तु विशिष्टतरा काचित्स्यादेव, केवलज्ञानस्य लब्धत्वेऽपि मोक्षस्याद्यापि योजनीयत्वात् ।**

---

चन्द्र.: स्यादत्र इत्यादि । अनालम्बनयोगप्रवृत्तिर्मा भूत् स्फुटालम्बनसद्भावादिति । विशिष्टतरा = अनालम्बनयोगात्प्राक् या प्रतिमादिदर्शनादिरूपा सालम्बनयोगप्रवृत्तिः, तदपेक्षया विशिष्टतरा काचित् = अद्य यावदनिश्चितनाम्नी अत एवानिश्चिता स्यादेव । प्रतिमादिविषयकं चक्षुर्दर्शनादि इन्द्रियजन्यज्ञानत्वात् विशिष्टसालम्बनयोगः, किन्तु परतत्त्वविषयकं केवलज्ञानं तु इन्द्रियव्यापाररहितज्ञानत्वात् अत एव स्फुटतरविषयकत्वात् विशिष्टतरः सालम्बनयोगः स्यादेवेति भावः ।

ननु 'योजनाद्योगः' इति हि योगस्य व्युत्पत्तिः, अत्र च केवलज्ञानेन सह योगोऽभूदेव, ततश्चाधुना सालम्बनयोगो वक्तुं न युक्तः, केवलज्ञानेन सह योगस्य सिद्धत्वात् । यः केवलज्ञानेन सह जीवं योजयति, स हि योगः, तच्च केवलज्ञानयोजनं सिद्धमेवेति अधुना सालम्बनयोगो न घटेत, यतो हि न स जीवं केवलेन सह योजयतीति भाव इत्याशङ्कायां पूर्वपक्षः आह केवलज्ञानस्येत्यादि । तथा च सालम्बनयोगोऽधुनाऽपिवक्तुं शक्यते, यतः स मोक्षेण सह जीवं योजयति, तस्मात्स योग इत्यर्थस्य घटमानत्वादिति समाप्तः पूर्वपक्षः ।

---

**यशो.: मैवम् - केवलिनः स्वात्मनि मोक्षस्य योजनीयत्वेऽपि ज्ञानाकाङ्क्षाया अविषयतया ध्यानानालम्बनत्वात्क्षपकश्रेणिकालसम्भविविशिष्टतरयोगप्रयत्नाभावा-द्‍आवर्जीकरणोत्तरयोगनिरोधप्रयत्नाभावाच्चार्वाक्तनकेवलिव्यापारस्य ध्यानरूपत्वा-भावादुक्तान्यतरयोगपरिणतेरेव ध्यानलक्षणत्वात् ।**

---

चन्द्र.: समाधानमाह मैवमित्यादि । ज्ञानाकाङ्क्षाया इत्यादि । अयं भावः यथा प्रतिमायाः ध्यानं कुर्वतः पुरुषस्य "मम प्रतिमायाः सम्यग्ज्ञानं भवतु" इत्येवंरूपा प्रतिमाज्ञानाकाङ्क्षा भवति, तदर्थमेव च स ध्यानं करोति । ततश्च सा प्रतिमा तद्ध्यानस्य आलम्बनं भवति । प्रकृते तु "मम मोक्षस्य सम्यग्ज्ञानं भवतु"

इत्येवंरूपा मोक्षज्ञानस्याकाङ्क्षा केवलिनो न भवति, यतो मोक्षस्य सम्यग्ज्ञानं केवलज्ञानेन सञ्जातमेव । ततश्च तादृशज्ञानार्थं ध्यानं केवलिनोऽसंभवि । ततश्च स मोक्षः ध्यानालम्बनं न भवत्येव, ततश्च केवलिनो विशिष्टतरं सालम्बनं ध्यानं न कथमपि घटते ।

यदि हि केवलिनो "मम मोक्षस्य सम्यग्ज्ञानं भवतु" इत्येवंरूपा मोक्षज्ञानस्याकाङ्क्षा स्यात्, तर्हि मोक्षः प्रतिमावत् तादृशाकाङ्क्षाया विषयः स्यात्, तर्हि केवलिनः प्रतिमाज्ञानार्थमिव मोक्षज्ञानार्थं ध्यानं स्यात्, तर्हि तद्ध्यानस्यालम्बनं मोक्षः स्यात्, तर्हि केवलिनः सालम्बनं ध्यानं स्यात् । परन्तु एतत्सर्वं न भवति, तस्मान्न केवलिनः सालम्बनं ध्यानमिति ।

ननु 'प्रतिमाज्ञानार्थं प्रतिमाध्यानं' इत्येतत्कथमिति चेत् ? तद्विषयकं ध्यानं तद्विषयकसम्यग्ज्ञानजनकमिति कार्यकारणभावोऽस्ति, तस्मात् प्रतिमाज्ञानात्मककार्यार्थं प्रतिमाध्यानात्मकं कारणमाश्रीयते । तथा चोक्तं योगशास्त्रे → मोक्षः कर्मक्षयादेव, स चात्मज्ञानतो भवेत्, ध्यानसाध्यं मतं तच्च, तद्ध्यानं हितमात्मनः ← इति । अत्र हि आत्मज्ञानं आत्मध्यानस्य कार्यं प्रतिपादितमेव । एवमेव मोक्षज्ञानमपि मोक्षध्यानस्य कार्यम् । परन्तु मोक्षज्ञानस्येच्छैव नास्ति, ततश्च मोक्षध्यानं न भवतीति ।

अयमत्र क्रमः स्यात् ।

प्रथमं मोक्षज्ञानेच्छा, ततस्तज्जन्यं मोक्षविषयकं ध्यानं, ततस्तज्जन्यं मोक्षविषयकं ज्ञानमिति । यथा प्रथमं प्रतिमाज्ञानेच्छा, ततस्तज्जन्यं प्रतिमाविषयकं ध्यानं, ततस्तज्जन्यं प्रतिमाविषयकं ज्ञानमिति ।

ननु मा भवतु केवलिनः सालम्बनध्यानात्मकः सालम्बनो योगः, किन्तु केवलिनः यः कश्चिन्मनोवाक्कायव्यापारोऽस्ति, स कोऽपि योगस्तु ध्यानरूपो भवेदेव, अर्थात् तस्य कोऽपि ध्यानरूपो योगो मन्तव्य एवेत्याग्रहे सत्याह क्षपकश्रेणि इत्यादि ।

द्विविधं हि ध्यानं भवति, सुदृढप्रयत्नव्यापाररूपं विद्यमानकरणत्रिकनिरोधरूपं च, तत्र केवलिन एकमपि न सम्भवति । यतो हि सुदृढप्रयत्नव्यापाररूपं ध्यानं क्षपकश्रेणिकाले सम्भवति, तत्र विशिष्टतरयोगप्रयत्नसद्भावात्, केवलिनस्तु तदभावान्न तद् ध्यानं । तथा विद्यमानकरणनिरोधरूपमपि न सम्भवति, यतो हि तत् आवर्जीकरणोत्तरकाले सम्भवति, तत्पूर्वं तु केवलिनस्तन्न सम्भवति, ततश्च आवर्जीकरणपूर्वकालीनः केवलिव्यापारः न सुदृढप्रयत्नव्यापारात्मकं ध्यानम्, न वा विद्यमानकरणनिरोधात्मकं ध्यानमिति तस्य न ध्यानम्, न ध्यानरूपो योग इति यावत् ।

ननु सुदृढप्रयत्नव्यापारः करणनिरोधश्चेत्येवं द्विविधमेव ध्यानं इति कथं ? अन्यदपि ध्यानं कथं न भवेदित्यत आह उक्तान्यतरयोगपरिणतेरेव इत्यादि ।

---

यशो.: **आह च महाभाष्यकारः -**

'सुदढप्पयत्तवावारणं णिरोहो व विज्जमाणाण । झाणं करणाण मयं, ण उ चित्तणिरोहमित्तागं ॥१॥' ( विशेषावश्यक-गाथा ३०७१ ) इति ।

---

चन्द्र.: अत्रार्थे साक्षिपाठमाह आह च इत्यादि ।

विशेषावश्यकभाष्यान्वयस्त्वेवम् → सुदृढप्रयत्नव्यापारणं विद्यमानानां वा करणानां निरोधो ध्यानं मतं, न तु चित्तनिरोधमात्रम् ← इति ।

---

यशो.: स्यादेतद्, यदि क्षपकश्रेणिद्वितीयापूर्वकरणभावी सामर्थ्ययोग एवानालम्बनयोगो ग्रंथकृताऽभिहितस्तदा तदप्राप्तिमतामप्रमत्तगुणस्थानानामुपरत-सकलविकल्पकल्लोलमालानां चिन्मात्रप्रतिबन्धोपलब्धरत्नत्रयसाम्राज्यानां जिनकल्पिकादीनामपि निरालम्बनध्यानमसंगताभिधानं स्यादिति ।

---

चन्द्र.: आशङ्कते स्यादेतद् यदि इत्यादिना । सामर्थ्ययोग एवानालम्बनयोग इत्यादि । यद्यपि प्राक् सामर्थ्ययोगतो या दिदृक्षा साऽनालम्बनयोग इत्युक्तम् । एवं च सामर्थ्ययोगः कारणमनालम्बनयोगश्च कार्यमिति फलितं भवति । अधुना तु स एवानालम्बनयोग उच्यत इंति विरोधः । तथाऽपि यथा 'मृदः घटो भवति' इत्यत्र 'मृदेव घटो भवति' इति । तथैव सामर्थ्ययोगादनालम्बनयोग इत्यत्र 'सामर्थ्ययोग एवानालम्बनयोगः' इत्यर्थो गृह्यत इति न विरोधः । यदिवा कारणे कार्योपचारादपि 'सामर्थ्ययोग एवानालम्बनयोगः' इति वचनं युज्यते वक्तुं इति ।

तदप्राप्तिमतां = क्षपकश्रेण्यप्राप्तिमतां अप्रमत्तगुणस्थानानां = निरतिचारचारित्राणाम् उपरतेत्यादि । उपरताः सकलविकल्परूपाः कल्लोलमालाः येषां, तादृशानां चिन्मात्रेत्यादि । चिन्मात्रे यः प्रतिबन्धः = लीनता, तेनोपलब्धं रत्नत्रयसाम्राज्यं यैस्तेषां जिनकल्पिकादीनामपि आस्तां तावत्प्रमत्तसंयतादीनां स्थविरकल्पिकानामिति 'अपि' शब्दार्थः ।

अयं भावः जिनकल्पिकादयो हि अप्रमत्ततादिबहुगुणसंपन्नाः, ततश्च तादृशानां तेषां निरालम्बनध्यानं भवेदेव, वृत्तिकृताऽपि प्राक् तेषां तदभिहितमेव । परन्त्वत्र क्षपकश्रेण्यां तदभिहितं, क्षपकश्रेणी च जिनकल्पिकादीनां नास्ति, ततश्च तेषां निरालम्बनध्यानसत्ताकथन-मसङ्गतमेव स्यादिति ।

---

यशो.: मैवम् - यद्यपि तत्त्वतः परतत्त्वलक्ष्यवेधाभिमुखस्तदविसंवादी सामर्थ्ययोग एव निरालम्बनस्तथापि परतत्त्वलक्ष्यवेधप्रगुणतापरिणतिमात्रादर्वाक्तनं परमात्मगुणध्यानमपि मुख्यनिरालम्बनप्रापकत्वादेकध्येयाकारपरिणतिशक्तियोगाच्च निरालम्बनमेव ।

---

चन्द्र.: समाधानमाह मैवं इत्यादि । तत्त्वतः = निश्चयतः, अस्य च निरालम्बनः इतिपदेन सहान्वयः ।

तथापि = निश्चयत एवं सत्यपि परतत्त्वेत्यादि ।

परतत्त्वरुपं यल्लक्ष्यं, तस्य यो वेधः, केवलज्ञानप्राप्तिरिति भावः । तस्य या प्रगुणता, तस्या या परिणतिः, तन्मात्रादेवेति समासः ।

सामर्थ्ययोगो हि परतत्त्वलक्ष्यवेधाभिमुखः, तदविसंवादी च भवति, किन्तु जिनकल्पिकादीनां परमात्मगुणध्यानं न परतत्त्वलक्ष्यवेधाभिमुखं, न वा तदविसंवादी, तथाऽपि तत् परतत्त्वलक्ष्यवेधप्रगुणं तु अस्त्येव, अर्थात् तत् परमात्मगुणध्यानं जिनकल्पिकादिषु तादृशीं योग्यतां तु जनयत्येव, येन ते झटिति परतत्त्ववेधं साधयेयुः । इत्थं च परमात्मगुणध्याने या परतत्त्वलक्ष्यवेधप्रगुणतायाः परिणतिः = पर्यायः अस्ति, तन्मात्रादेव इति भावः ।

अर्वाक्तनं = सामर्थ्ययोगात्मकान्निरालम्बनात् प्राक्कालभावि परमात्मगुणध्यानमपि = न केवलं निरालम्बनयोग एवेत्यपि शब्दार्थः । मुख्यनिरालम्बनप्रापकत्वात् = सामर्थ्ययोगात्मकस्य निरालम्बनस्य जनकत्वात् । 'निरालम्बनमेव' इत्यनेन सहास्यान्वयः । तथा च यतो जिनगुणध्यानं निरालम्बनकारणम्, तत एव कारणे कार्योपचारात्तदपि अनालम्बनयोग एवेति ।

परमात्मगुणध्यानस्यानालम्बनत्वे युक्त्यन्तरमाह एकध्येयाकारेत्यादि । सामर्थ्ययोगभाविध्येयाकाराभिन्नध्येयाकारपरिणतिशक्तियोगात् परमात्मगुणध्यानं निरालम्बनमेवेति भावः । जिनकल्पिकादीनां यस्मात्परमात्मगुणध्यानं सामर्थ्ययोगगतध्येयाकाराभिन्नध्येयाकारपरिणति- शक्तियोगवद् भवति तस्मात्तदनालम्बनमिति ।

---

**यशो.: अत एवावस्थात्रयभावने रूपातीतसिद्धगुणप्रणिधानवेलायामप्रमत्तानां शुक्लध्यानांशो निरालम्बनोऽनुभवसिद्ध एव ।**

---

चन्द्र.: अत एव = क्षपकश्रेणीं विनाऽपि प्रतिपादितरीत्याऽनालम्बनयोगस्य सिद्धत्वादेव अवस्थात्रयभावने = पिण्डस्थपदस्थरूपातीतात्मकावस्थात्रयस्य भावनायां । अनुभवसिद्ध एव । तथा च षष्ठसप्तमादिगुणस्थानेष्वपि अनालम्बनयोगः उपचारादिप्रकारेण युक्त एवेति ।

---

**यशो.: संसार्यात्मनोऽपि च व्यवहारनयसिद्धमौपाधिकं रूपमाच्छाद्य शुद्धनिश्चयनयपरिकल्पितसहजात्मगुणविभावने निरालम्बनध्यानं दुरपह्नवमेव, परमात्मतुल्यतयाऽऽत्मज्ञानस्यैव निरालम्बनध्यानांशत्वात् तस्यैव च मोहनाशकत्वात् ।**

---

चन्द्र.: नन्वेवमपि साधूनामेवानालम्बनध्यानं सिद्धम्, श्रावकादीनां तु जिनभक्त्यादौ किं तत्र सम्भवतीत्यत आह संसार्यात्मनोऽपि च = देशविरतसम्यग्दृष्टिप्रभृतीनां व्यवहारनयसिद्धं =

जिनस्याष्टप्रातिहार्यपञ्चत्रिंशदतिशयादिरूपं स्वस्य च शरीरादिरूपं इन्द्रियग्राह्यं औपाधिकं = जिननामकर्मादिरूपा औदारिकशरीरनामकर्मादिरूपा च या उपाधिः, तज्जन्यं रूपं = जिनस्य स्वस्य च बाह्यस्वरूपं आच्छाद्य = गौणीकृत्य शुद्धेत्यादि शुद्धनिश्चयनयेन परिकल्पिताः ये सहजाः = आत्मसहकालभाविनः, तेषां विभावने इति। दुरपह्नवमेव = दुःखेनापह्नोतुं शक्यं, अनिषेधनीयमेवेति यावत्। तत्र कारणमाह परमात्मेत्यादि।

---

यशो.: आह च - 'जो जाणइ अरिहंते, दव्वत्तगुणत्तपज्जयत्तेहिं। सो जाणइ अप्पाणं, मोहो खलु जाइ तस्स लयं ॥ प्र.सा. १-८०॥' इति। तस्माद्रूपिद्रव्यविषयं ध्यानं सालम्बनं अरूपिविषयं च निरालम्बनमिति स्थितम् ॥१९॥

---

चन्द्र.: 'जो जाणइ' इत्यादिगाथासङ्क्षेपार्थस्त्वयम् → यः अर्हतः द्रव्यत्वगुणत्वपर्यायत्वैः जानाति, स आत्मानं जानाति, तस्य मोहः खलु लयं = विनाशं याति ← इति।

निष्कर्षमाह तस्मादित्यादि।

व्याख्याता एकोनविंशतितमा कारिका।

---

यशो.: अथ निरालम्बनध्यानस्यैव फलपरम्परामाह -

एयम्मि मोहसागरतरणं सेढी य केवलं चेव।

तत्तो अजोगजोगो, कमेण परमं च निव्वाणं ॥२०॥

---

चन्द्र.: अधुना विंशतितमां चरमगाथां प्रस्तावयन्नाह अथ

गाथान्वयस्त्वेवम् → एतस्मिन् (सति) मोहसागरतरणं, श्रेणी च, केवलं चैव, ततोऽयोगयोगः, क्रमेण परमं च निर्वाणम् ← इति।

---

यशो.: 'एयम्मि' त्ति। 'एतस्मिन्' - निरालम्बनध्याने लब्धे मोहसागरस्य - दुरन्तरागादिभावसंतानसमुद्रस्य तरणं भवति। ततश्च 'श्रेणिः' क्षपकश्रेणिर्निर्व्यूढा भवति, सा ह्यध्यात्मादियोगप्रकर्षगर्भिताशयविशेषरूपा। एष एव सम्प्रज्ञातः समाधिस्तीर्थान्तरीयैर्गीयते, एतदपि सम्यग् यथावत् प्रकर्षेण = सवितर्कनिश्चयात्मकत्वेनात्मपर्यायाणामर्थानां च द्विपादीनामिह ज्ञायमानत्वादर्थतो नानुपपन्नम्,

ततश्च 'केवलमेव' केवलज्ञानमेव भवति। अयं चासम्प्रज्ञातः समाधिरिति परैर्गीयते,

तत्रापि अर्थतो नानुपपत्तिः, केवलज्ञानेऽशेषवृत्त्यादि-निरोधाल्लब्धात्मस्वभावस्य मानसविज्ञानवैकल्यादसम्प्रज्ञातत्वसिद्धेः ।

अयं चासम्प्रज्ञातः समाधिर्द्विधा - सयोगिकेवलिभावी अयोगिकेवलिभावी च, आद्यो मनोवृत्तीनां विकल्पज्ञानरूपाणामत्यन्तोच्छेदात्सम्पद्यते । अन्त्यश्च परिस्पन्दरूपाणाम्, अयं च केवलज्ञानस्य फलभूतः । एतदेवाह-'ततश्च' केवलज्ञानलाभादनन्तरं च 'अयोगयोगः' वृत्तिबीजदाहादयोगाख्यः समाधिर्भवति, अयं च 'धर्ममेघः' इति पातञ्जलैर्गीयते, 'अमृतात्मा' इत्यन्यैः, 'भवशत्रुः' इत्यपरैः, 'शिवोदयः' इत्यन्यैः, 'सत्त्वानन्दः' इत्येकैः, 'परश्च' इत्यपरैः । 'क्रमेण' उपदर्शितपारम्पर्येण ततोऽयोगयोगात् 'परमं' सर्वोत्कृष्टफलं निर्वाणं भवति ॥२०॥

इति महोपाध्यायश्रीकल्याणविजयगणिशिष्यमुख्यपण्डित-श्रीजीतविजय-गणिसतीर्थ्यपण्डित-श्रीनयविजयगणिचरणकमलचञ्चरीकपण्डित-श्रीपद्मविजय-गणिसहोदरोपाध्याय श्रीजसविजयगणिसमर्थितायां विंशिकाप्रकरण-व्याख्यायां योगविंशिकाविवरणं सम्पूर्णम् ॥

---

चन्द्र.: निर्व्यूढा = समाप्ता भवति । क्षपकश्रेणी अष्टमगुणस्थानादारभ्यते, ततश्च मोहनीयकर्मप्रकृतीनां यथाक्रमं क्षयो भवति, दशमगुणस्थानान्ते तु मोहनीयकर्मक्षयो भवति, एतदेव मोहसागरतरणमुच्यते । तदनन्तरं द्वादशगुणस्थानान्ते श्रेणी समाप्ता भवतीति ।

सा च श्रेणी कीदृशीत्याह सा हि अध्यात्मेत्यादि = अध्यात्मादियोगानां यः प्रकर्षः, तद्गर्भितो य आशयविशेषः तद्रूपेति ।

तीर्थान्तरीयैः = पतञ्जलिऋषिप्रभृतीभिः ।

एतदपि = "सम्प्रज्ञात" इति नामापि । अस्य च 'नानुपपन्नम्' इत्यनेन सहान्वयः । सम्प्रज्ञातनाम उपपन्नमेवेत्यत्र कारणमाह सम्यग् इत्यादि ।

सवितर्केत्यादि = 'नानानयाश्रितं तत्र वितर्कः पूर्वगं श्रुतं' इत्यध्यात्मसारपाठात् वितर्को नाम अनेकनयाश्रितं श्रुतं, तद्युक्तो यो निश्चयः, स सवितर्को निश्चयः । नानानयाश्रितेन श्रुतेन यो निश्चयः सञ्जातः, तद्रूपत्वेनेति ।

अर्थतो = अस्माभिः 'क्षपकश्रेणी' उच्यते, तीर्थान्तरीयैः 'सम्प्रज्ञातः' इत्युच्यत इति शब्दतो भेदः, तथाऽपि अर्थतो न काचिदापत्तिः । यतो हि क्षपकश्रेण्यां शुक्लध्यानस्य प्रथमौ द्वौ भेदौ भवतः । तत्र

नानानयाश्रितेन पूर्वश्रुतेनात्मपर्यायादीनां यथावद् बोधो भवत्येव । ततश्च सम् = यथावत् प्र = नानानयाश्रितेन श्रुतेन आत्मपर्याया अत्र ज्ञाता: भवन्तीति अयं योग: सम्प्रज्ञात उच्यत एवेति ।

अयञ्चेत्यादि । केवलज्ञानपदस्य नपुंसकलिङ्गत्वेऽपि असम्प्रज्ञातपदस्य विधेयवाचकस्य प्राधान्यमाश्रित्यात्र पुल्लिङ्गपदं गृहीतमिति ।

तत्रापि = 'असम्प्रज्ञात' इति परोक्तनामनि अपि, न केवलं 'सम्प्रज्ञात' इति परोक्तनाम्न्येवेति अपिशब्दार्थ: । अर्थतो इति शब्दतस्तु केवलज्ञानपदस्य असम्प्रज्ञातपदस्य य स्पष्टं भेदोऽस्त्येवेति । अशेषवृत्त्यादिनिरोधात् = मनोविकल्परूपा या: अशेषा: मतिश्रुतज्ञानात्मिका वृत्तय:, तथाऽऽदिपदात्तत्कारणभूतानि यानि ज्ञानावरणीयादिकर्माणि, तेषां निरोधात् लब्धात्मस्वभावस्य = लब्ध: वृत्त्यादिरहित आत्मस्वभाव: येन स, तस्य । असम्प्रज्ञातत्वसिद्धे: क्षायोपशमिकज्ञानै: यत् सम्यक् प्रकर्षेण ज्ञानं प्राग् भवदासीत्, तदधुना क्षायिकज्ञानकाले न भवतीति असंप्रज्ञाततासिद्धिरिति अत्र अर्थतो नाऽनुपपत्ति: । वृत्तिबीजदाहाद् = मनोवाक्काययोगरूपाणां वृत्तीनां तत्कारणभूतानां तत्तत्कर्मोदयानां च विनाशात् अयोगाख्य: समाधिर्भवति ।

अयोगयोगात् = मनोवाक्काययोगाभावात् अयोगनामा मोक्षयोजनाच्च योगनामा योऽयोगयोगनामा योग:, तस्मात् ।

व्याख्याता विंशतितमकारिका ।

अत्र च अनाभोगादिवशत: सम्भवन्ति मम क्षतय:, तच्छोधयन्तु संविग्नबहुश्रुतगीतार्था: ।

इति श्री सिद्धान्तमहोदधिप्रेमसूरीश्वरशिष्यरत्नपरमशासन प्रभावकपंन्यासप्रवर गुरुवर्यश्रीचन्द्रशेखरविजयचरणकिङ्करमुनिश्रीगुणहंसविजयकृतं योगविंशिकावृत्तिविवरणं समाप्तम् ।

**शुभं भवतु श्रमणसंघस्य**

यदीयसम्यक्त्वबलात् प्रतीमो,
भवादृशानां परमस्वभावम् ।
कुवासनापाशविनाशनाय,
नमोऽस्तु तस्मै जिनशासनाय ॥

# द्वे परिशिष्टे

## (१) योगविंशिकावृत्तौ प्रतिपादितानि तत्तत्पदार्थानां लक्षणानि

(१) मोक्षकारणीभूतात्मव्यापारत्वं योगत्वं ।

(२) अधिकृतधर्मस्थानस्य हीनगुणद्वेषाभावपरोपकारवासनाविशिष्टः कर्तव्यतोपयोगः प्रणिधानम् ।

(३) अधिकृतधर्मस्थानोद्देशेन तदुपायविषय इतिकर्त्तव्यताशुद्धः शीघ्रक्रियासमाप्तीच्छादिलक्षणौत्सुक्यविरहितः प्रयत्नातिशयः प्रवृत्तिः ।

(४) धर्मान्तरायनिवर्तकः परिणामः विघ्नजयः ।

(५) अधिकगुणे गुर्वादौ विनयवैयावृत्त्यबहुमानाद्यन्विता हीनगुणे निर्गुणे वा दयादानव्यसनपतितदुःखापहारादिगुणप्रधाना मध्यमगुणे चोपकारफलवती अधिकृतधर्मस्थानस्याहिंसादेः अतिचाररहिता प्राप्तिः सिद्धिः ।

(६) स्वप्राप्तधर्मस्थानस्य यथोपायं परस्मिन्नपि सम्पादकत्वं विनियोगः ।

(७) रागादिमलविगमेन पुष्टिशुद्धिमच्चित्तं धर्मः ।

(८) पुण्योपचयः पुष्टिः ।

(९) घातिकर्मणां पापानां क्षये या काचिन्निर्मलता सा शुद्धिः ।

(१०) उचितप्रवृत्तेर्व्रतभृतो मैत्र्यादिभावगर्भं शास्त्राज्जीवादितत्त्वचिन्तनम् अध्यात्मं ।

(११) अध्यात्मस्यैव प्रतिदिनं प्रवर्धमानश्चित्तवृत्तिनिरोधयुक्तोऽभ्यासः भावना ।

(१२) प्रशस्तैकार्थविषयं स्थिरप्रदीपसदृशमुत्पादादिविषयसूक्ष्मोपयोगयुतं चित्तं आध्यानम् ।

(१३) अविद्याकल्पितेष्टत्वानिष्टत्वसंज्ञापरिहारेण शुभाशुभानां विषयाणां तुल्यताभावनम् समता ।

(१४) मनोद्वारा विकल्परूपाणां शरीरद्वारा परिस्पन्दरूपाणामन्य-संयोगात्मकवृत्तीनामपुनर्भावेन निरोधः वृत्तिसंक्षयः ।

(१५) द्रव्यक्षेत्राद्यसामग्र्येणाङ्गसाकल्याभावेऽपि यथाविहित-स्थानादियोगेच्छया यथाशक्ति क्रियमाणं स्थानादि इच्छारूपम् ।

(१६) वीर्यातिशयाद् यथाशास्त्रमङ्गसाकल्येन उपशमसारं विधीयमानं स्थानादि प्रवृत्तिरूपम् ।

(१७) प्रवृत्तिसदृशं पाल्यमानस्य स्थानादेर्बाधकचिन्तारहितं स्थिरत्वं ।

(१८) स्वस्मिन्नुपशमविशेषादिफलं जनयदेव स्वसन्निहितानां स्थानादियोगशुद्ध्य-भाववतामपि तत्सिद्धिविधानद्वारा परगतस्वसदृशफलसंपादकं स्थानादि सिद्धिः ।

(१९) यथाशक्ति दुःखितदुःखपरिहारेच्छा अनुकम्पा ।

(२०) नैर्गुण्यपरिज्ञानेन भवचारकाद्विरक्तता निर्वेदः ।

(२१) मोक्षाभिलाषः = संवेगः ।

(२२) क्रोधकण्डुविषयतृष्णोपशमः प्रशमः ।

(२३) सूत्रविहितयथोचितक्रियाविशिष्टसाधुसाध्वीश्रावकश्राविकासमुदायः तीर्थम् ।

(२४) यत्रानुष्ठाने प्रयत्नातिशयोऽस्ति परमा च प्रीतिरुत्पद्यते शेषत्यागेन च यत्क्रियते तत्प्रीत्यनुष्ठानं ।

(२५) प्रीतितुल्यमपि आलम्बनीयस्य पूज्यत्वविशेषबुद्ध्या विशुद्धतरव्यापारं भक्त्यनुष्ठानं ।

(२६) शास्त्रार्थप्रतिसन्धानपूर्वा साधोः सर्वत्रोचितप्रवृत्तिर्वचनानुष्ठानम् ।

(२७) व्यवहारकाले वचनप्रतिसन्धाननिरपेक्षं दृढतरसंस्काराच्चन्दनगन्धन्यायेनात्मसाद्भूतं जिनकल्पिकादीनां क्रियासेवनमसङ्गानुष्ठानम् ।

(२८) क्षपकश्रेणिद्वितीयापूर्वकरणभावी क्षायोपशमिकक्षान्त्यादिधर्मसन्न्यासरूपः शास्त्रसन्दर्शितोपायः शक्त्युद्रेकाद् विशेषेण शास्त्रातिक्रान्तविषयः यः सामर्थ्ययोगः, तस्मात् निस्सङ्गानवरतप्रवृत्ता या परतत्त्वदर्शनेच्छा, सा अनालम्बनयोगः ।

(२९) अध्यात्मादियोगप्रकर्षगर्भिताशयविशेषः क्षपकश्रेणिः ।

## ( २ ) पञ्च विषाद्यनुष्ठानानि

दृश्यमानेषु जिनागमेषु विषाद्यनुष्ठानानि साक्षादुक्तानि न लभ्यन्ते, तानि पतञ्जलिकृतग्रन्थेषूपलभ्यन्ते, सूरिपुरन्दरहरिभद्रसूरिभिः स्याद्वादमालम्ब्य यथासम्भवं तेषां जिनमतेऽन्तर्भावः कृतः । अत्र तेषामेवानुष्ठानानां स्वरूपं निरूप्यते । तत्र प्रथममध्यात्मसारग्रन्थानुसारेण तेषां व्याख्यानं सङ्क्षेपतः क्रियते ।

आहारोपधिपूजर्द्धिप्रभृत्याशंसया कृतं ।
शीघ्रं सच्चित्तहन्तृत्वाद्, विषानुष्ठानमुच्यते ॥

आहारादिरूपा ये इहलौकिकाः पदार्थाः, तेषामिच्छया "अस्माज्जिनपूजाद्यनुष्ठानाद् ममाहारादीनां प्राप्तिर्भवतु" इत्यादिरूपया कृतं जिनपूजाद्यनुष्ठानं यस्मात् शीघ्रं सच्चित्तं = शोभनं चित्तं हन्ति, तस्मात् तत् जिनपूजादि विषानुष्ठानं उच्यते ।

स्थावरं जङ्गमं चापि, तत्क्षणं भक्षितं विषं ।
यथा हन्ति तथेदं, सच्चित्तमैहिकभोगतः ॥

यथा स्थावरं = स्थिरस्वभावं जङ्गमं च = सर्पादिगतं विषं भक्षितं सत् तत्क्षणमेव हन्ति, तथा इदं = विषानुष्ठानं ऐहिकभोगतः सच्चित्तं हन्ति । ऐहिकभोगप्राप्तिद्वारा शोभनं अध्यवसायं विनाशयतीति यावत् ।

दिव्यभोगाभिलाषेण, कालान्तरपरिक्षयात् ।
स्वादृष्टफलसंपूर्तेः, गरानुष्ठानमुच्यते ॥

देवसम्बन्धिनो ये भोगाः, तदभिलाषेण यज्जिनपूजादि क्रियते, तद् गरानुष्ठानम् । तच्च कालान्तरे सच्चित्तं

हन्ति। तथाहि-प्रकृतानुष्ठानेन यत् पुण्यलक्षणं अदृष्टं बध्यते, तस्य फलं देवभोगाप्तिर्यदा भवति, तदा स जीवस्तस्मिन्निमग्नो भवतीत्येवं तस्य सच्चित्तं विनश्यति। एष गाथाभावार्थः एतदनुसारेणाक्षरार्थः स्वयं विभावनीयः।

यथा कुद्रव्यसंयोगजनितं गरसंज्ञितम्।
विषं कालान्तरे हन्ति, तथेदमपि तत्त्वतः॥

तथा = गरविषवत् इदमपि = गरानुष्ठानमपि तत्त्वतः = परमार्थतः कालान्तरे हन्ति। अत्र कालान्तरे = भवान्तरे इति योगविंशिकावृत्तौ व्याख्यातम्। तस्मात् गरानुष्ठानं भवान्तरे सच्चित्तं विनाशयतीति फलितम्। शेषं स्पष्टम्।

निषेधायानयोरेव विचित्रानर्थदायिनोः।
सर्वत्रैवानिदानत्वं जिनेन्द्रैः प्रतिपादितम्॥

विचित्रानर्थदायिनोरनयोर्निषेधायैव जिनेन्द्रैः सर्वत्रैव = कुत्राऽप्यनुष्ठाने अनिदानत्वं = इहपरलोकफलाशंसारहितत्वं प्रतिपादितम् कर्त्तव्यतयेति शेषः।

प्रणिधानाद्यभावेन कर्मानध्यवसायिणः।
संमूर्च्छिमप्रवृत्याभमननुष्ठानमुच्यते॥

अनध्यवसायिणः प्रणिधानाद्यभावेन संमूर्च्छिमप्रवृत्त्याभं कर्म अननुष्ठानं उच्यते।

अकामनिर्जराङ्गत्वं कायक्लेशादिहोदितम्।
सकामनिर्जरा तु स्यात्सोपयोगप्रवृत्तितः॥

इह = अननुष्ठाने कायक्लेशात् अकामनिर्जराङ्गत्वं = अकामनिर्जराकारणत्वं। सकामनिर्जरा तु सोपयोगप्रवृत्तितः स्यात्।

सदनुष्ठानरागेण तद्धेतुर्मार्गगामिनाम्।
एतच्च चरमावर्तेऽनाभोगादेर्विना भवेत्॥

मार्गगामिनां सदनुष्ठानरागेण तद्धेतुः = तस्य = वक्ष्यमाणामृतानुष्ठानस्य हेतुः भवेत्। एतच्च = तद्धेत्वनुष्ठानं च चरमावर्तेऽनाभोगादीनामभावे सति भवेत्।

जैनीमाज्ञां पुरस्कृत्य प्रवृत्तं चित्तशुद्धितः।
संवेगगर्भमत्यन्तं अमृतं तद्विदो विदुः॥

जैनीं आज्ञां पुरस्कृत्य चित्तशुद्धितः प्रवृत्तं अत्यन्तं संवेगगर्भं अनुष्ठानं तद्विदो = अमृतस्वरूपविदो अमृतं विदुः।

शास्त्रार्थालोचनं सम्यक् प्रणिधानं च कर्मणि।

कालाद्यङ्गाविपर्यासोऽमृतानुष्ठानमुच्यते ॥

(१) सम्यक् शास्त्रार्थालोचनं (२) कर्मणि च प्रणिधानं (३) कालाद्यङ्गाविपर्यासः = कालादीनां अनुष्ठानावयवानां अविपर्यासः अमृतानुष्ठानं उच्यते ।

एवं तावत्संङ्क्षेपतः पञ्चानामप्यनुष्ठानानां स्वरुपमभिहितमध्यात्मसारस्य कतिचिद्गाथाः अनुसृत्य ।

अधुना किञ्चिच्चिन्तनमत्र प्रस्तूयते । तच्च सुबोधार्थं प्रश्नोत्तरविधानेनात्र प्रतिपाद्यते ।

प्रश्नः ननु किं विषं गरं च अचरमावर्ते एव भवति, यदि वा चरमावर्तेऽपि भवति ?

उत्तरः विषं गरं च अचरमावर्ते तु भवत्येव, चरमावर्तेऽपि भवति ।

प्रश्नः ननु चरमावर्तेऽपि भवतीति कुतः सिद्धम् ?

उत्तरः शास्त्रपाठात् । तथाहि → एतेषु च यच्चरमावर्ते स्यात्तदाह

चतुर्थं = तुरीयम्, एतदनुष्ठानं - तद्धेतुनामकं **प्रायेण** बाहुल्येन **ज्ञेयमस्य** चरमावर्तभाज आदिधार्मिकस्य महात्मनः-प्रशस्तभावस्य, अनाभोगादिभ्यः कदाचिदन्यथाऽपि स्यादिदमिति प्रायोग्रहणम् । ← इति । एष योगबिन्दौ १६३ गाथायाः पाठः ।

अत्र स्पष्टमेवोक्तं यदुत 'अनाभोगादिभ्यः कदाचिदन्यथाऽपि स्यादिदम्' इति । ततश्च चरमावर्तेऽपि विषं गरमननुष्ठानं च सम्भवतीति सिद्धम् ।

तथा

→ न चैवं निह्नवादेर्भग्नश्रुतशीलस्य नवमग्रैवेयकानुत्पत्तिप्रसङ्गः । गरानुष्ठानात्तदुत्पत्तावपि तत्र तद्धेत्वमृतानुष्ठानेन सर्वोपपत्तेः, तयोरेव शीलरूपदेशत्वादिति विभावनीयम् ← इति । एष आराधकविराधकचतुर्भङ्गीग्रन्थस्यान्तिमगाथायाः पाठः ।

अत्र निह्नवा भग्नश्रुतशीला उक्ताः, अर्थात् तेऽवश्यं अर्धचरमावर्तिन एव, अन्यथा श्रुतशीलप्राप्तेरेवासम्भवेन तद्भङ्गस्याप्यसम्भवात् । तेषां ग्रैवेयकेषूत्पत्तिः गरानुष्ठानाद् भवति, न तु तद्धेत्वादिभिरिति । अत्र उपयोगी अंशस्तु एतावानेव यदुत → अर्धचरमावर्तिनां, निह्नवानां स्पष्टमेव गरानुष्ठानमुक्तम् ← इति, अन्यत्तु अधुनाऽनुपयोगीति कृत्वोपेक्ष्यते ।

तथा

द्वात्रिंशद्द्वात्रिंशिकायामपि महोपाध्यायैः योगबिन्दुग्रन्थमनुसृत्य चरमावर्ते विषाद्यनुष्ठानं निगदितं, तत्पाठस्तु योगबिन्दुसदृश इति कृत्वा न दर्श्यते ।

ननु निह्नवानां गरानुष्ठानमुक्तं, परन्तु तन्न घटते । यतो हि परलोकसुखेच्छया क्रियमाणं अनुष्ठानं गरं भवति, निह्नवानां तु परलोकसुखेच्छा न श्रूयते, ते हि केवलं स्वमतकदाग्रहादेव मिथ्यात्विनो भवन्ति, न तु परलोकसुखतीव्रलालसयेति चेत् ।

न, यदि हि तद् न गरं, तर्हि भवानेव वदतु किं तत् ? न हि तद् विषं, तत्र इहलोकसुखेच्छाऽभावात्, न हि तदननुष्ठानं उपयोगशून्यताऽभावात्, न हि निह्नवा उपयोगशून्यमेव आवश्यकादि कुर्वन्ति, तथा सति ग्रैवेयकोत्पत्त्यसम्भवप्रसङ्गात् । न हि तत् तद्धेतुरमृतं वा, तस्य सदनुष्ठानत्वाभावात् तद्धेतोरमृतस्य च सदनुष्ठानत्वात् । ततश्च निह्नवानामावश्यकाद्यनुष्ठानं किं ? इति भवानेव वदतु ।

यदि न जानासि उत्तरं, तर्हि श्रुणु समाधानम् । यद्यपि तेषां परलोकसुखेच्छा मा भूत्, तथाऽपि गरानुष्ठानस्य यत्फलं, तदेव तेषामनुष्ठानानां फलं । तथाहि-निह्नवानां अनुष्ठानानि पुण्यबन्धं कारयित्वा देवलोकादिसुखं प्रापयित्वा सच्चित्तं नाशयन्ति । इत्थं च भवान्तरे सच्चित्तविनाशकरणात्मकं कार्यं तेषां भवत्येवेति फलापेक्षया तेषामनुष्ठानं गरमेवेति बोध्यम् ।

अबाध्यपरलोकसुखेच्छासमन्वितत्वं हि गरस्य स्वरूपं, भवान्तरे पुण्यविपाकद्वारा सच्चित्तनाशकत्वं गरस्य फलम्, निह्नवानुष्ठानानां गरस्वरूपाभावेऽपि गरफलसद्भावाद् गरत्वं वक्तुं युक्तमेवेति निर्गलितार्थः ।

ननु योगबिन्दौ १६१ गाथायां → पुद्गलानां चरमे परावर्ते गुरुदेवादिपूजनं कर्तृभेदेन अन्यादृशं स्थितम् ← इति निगदितम् । तद्वृत्तौ च → अचरमावर्तभाविदेवपूजनादिसकाशाद् विलक्षणं अनुष्ठानं चरमावर्ते भवति ← इति भावार्थः प्रतिपादितः ।

तथा १६२ गाथावृत्तौ → चरमावर्तदेवादिपूजनस्यान्यावर्तदेवादिपूजनादन्यादृशत्वम् ← इति स्पष्टः पाठः । तथा च अचरमावर्ते यादृशं अनुष्ठानं भवेत्, तादृशं चरमावर्ते न भवेदेव, ततश्च यदि अचरमावर्ते विषं गरं अननुष्ठानमेव वा भवति, तर्हि चरमावर्ते एतत्त्रितयसकाशाद् भिन्नमेव भवेदिति सिद्धम् । इत्थं च चरमावर्ते तद्धेतुरमृतमेव वा, न त्वन्यदित्येव सम्यगिति चेत्,

न, तदनन्तरमेव १६३ गाथायां चरमावर्तेऽपि विषाद्यनुष्ठानस्य सत्त्वं स्पष्टमेव निगदितम् । प्रदर्शितं चास्माभिः ।

तथा च अचरमावर्ते विषादीनि त्रीण्येव ।

चरमावर्ते तु पञ्चापि इति सारः ।

<u>प्रश्नः</u> विषं अनुष्ठानकाल एव सच्चित्तं विनाशयति, गरं तु कालान्तर इत्येतावाननयोर्भेदः ।

इत्थं च विषं गरात्सकाशादधिकं भयावहं, शीघ्रमेव सच्चित्तविनाशनादिति किं सत्यं ?

<u>उत्तरः</u> भवतामुत्प्रेक्षाऽनुचितेति मन्यामहे वयम् । तथा हि विषं <u>'शीघ्रं'</u> सच्चित्तं विनाशयति इत्यत्र 'शीघ्रं = अनुष्ठानकरणकाल एव' इत्यर्थो भवता कथं निर्णीतः ? शास्त्रे तु कुत्रापि न दृश्यते । केवलं 'शीघ्रं' इति पदमेव दृश्यते ।

<u>प्रश्नः</u> ननु 'शीघ्रं' इति पदस्यार्थः स्पष्ट एव यदुत 'तत्काल एव' इति । न तत्र किञ्चिदपि वक्तव्यमिति ।

<u>उत्तरः</u> न, शीघ्रपदस्यार्थो हि सापेक्षः । तथाहि-प्रहरद्वयेन यः समागतः, तदपेक्षयैकप्रहरेण य आगतः, स शीघ्रमागत उच्यते । तथा वर्षद्वादशकेन यः अपठत्, तदपेक्षया वर्षषट्केन योऽपठत्, स 'शीघ्रमपठत्' इत्युच्यते । इत्थं

च शीघ्रपदं सापेक्षमेव ।

एवमत्रापि विषं गरापेक्षयैव शीघ्रं विनाशकमुच्यते, न तु तत्र 'अनुष्ठानकरणकाले एव' इति शीघ्रपदस्यार्थः कर्त्तव्यः ।

प्रश्नः ननु तादृशार्थकरणे का क्षतिः ?

उत्तरः महती क्षतिः ।

तथा हि-विषं अनुष्ठानकाल एव सच्चित्तनाशकं, तत्र किं कारणम् ?

प्रश्नः तदानीं इहलोकफलापेक्षाऽस्ति, सैवानुष्ठानकाले सच्चित्तनाशकारणम् ।

उत्तरः एवं तु गरमपि अनुष्ठानकाल एव सच्चित्तनाशकं स्यात्, यस्मात् गरेऽपि परलोकफलापेक्षा त्वस्त्येव, सैवानुष्ठानकाले सच्चित्तनाशकारणं किमर्थं न स्यात् ?

प्रश्नः ननु इहलोकफलापेक्षा परलोकफलापेक्षायाः सकाशात्तीव्रा भवति, तस्मात्साऽनुष्ठानकाल एव सच्चित्तं नाशयेत्, परलोकफलापेक्षा तु अनुष्ठानकाले सम्भवन्त्यपि मन्दत्वान्न सच्चित्तनाशिकेति ।

उत्तरः नैतद्युक्तं, यस्मात्परलोकफलापेक्षाऽपि इहलोकफलापेक्षायाः सकाशात्तीव्रा किमर्थं न सम्भवेत् ? तथाहि-द्वात्रिंशद्द्वात्रिंशिकायां महोपाध्यायैरित्थं पूर्वपक्ष उपन्यस्तः यदुत → यस्येहलोकफलापेक्षा परलोकफलापेक्षा चोभयमपि स्यात्, तस्यानुष्ठानं किं विषं गरं वा ? ← इति । तत्समाधानञ्चेदं प्रदत्तं यदुत → याऽपेक्षा बलवती, तदपेक्षया तत्तदनुष्ठानं भवति । तथा चेहलोकफलापेक्षायाः बलवत्त्वे विषं, परलोकफलापेक्षायाः बलवत्त्वे तु गरम् ← इति ।

इत्थं च यदि इहफलापेक्षायास्तीव्रत्वादेव अनुष्ठानकाल एव सच्चित्तनाशकत्वं, तर्हि परलोकफलापेक्षाया अपि तीव्रत्वसम्भवादेवानुष्ठानकाल एव सच्चित्तनाशकत्वम् ।

यदि च परलोकफलापेक्षा यदा मन्दा, तदा न तदानीमेव सच्चित्तनाशिकेति तदा सा कालान्तरे सच्चित्तनाशिका स्यादित्युच्येत, तर्हि इहफलापेक्षाऽपि यदा मन्दा, तदा न तदानीमेव सच्चित्तनाशिकेति सा कालान्तरे सच्चित्तनाशिका स्यादिति वक्तुं शक्यमेव । एवं च विषगरयोर्व्यवस्थैव न स्यात् ।

तस्माद् 'विषं अनुष्ठानकाल एव सच्चित्तनाशकं' इत्यादि न कथमपि सङ्घटते ।

प्रश्नः तर्हि भवानेव वदतु काऽत्र सच्चित्तविनाशप्रक्रियेति ।

उत्तरः तदर्थं प्रथमं सच्चित्तं किं ? इति निर्णयः कर्त्तव्यः ।

प्रश्नः शोभनोऽध्यवसाय एव सच्चित्तम् ।

उत्तरः किं स अभव्यादीनामचरमावर्तिनां वा भवति ?

प्रश्नः तेषां तु नैव भवति ।

उत्तरः तर्हि तेषां जिनपूजाद्यनुष्ठानं विषं गरं वा कथं भवेत्, सच्चित्तस्यैवाभावेन तन्नाशाभावात् । तदविनाशे

तु अनुष्ठानस्य विषगरत्वादिकमेव कथं सम्भवेदिति ।

प्रश्न: तेषां विषगरादिकं नास्त्येवेति मन्तव्यम् ।

उत्तर: तर्हि तेषामनुष्ठानं किं ? इति महान्प्रश्न: । किञ्च भवदुक्तरीत्या तु यदि अचरमावर्ते विषगरे न स्याताम्, तर्हि ते चरमावर्ते एव स्याताम्, तथा च तथा 'तद्धेतुनामकं चतुर्थमनुष्ठानं चरमावर्ते भवति' इति उक्तम्, एवं 'विषगरे चरमावर्ते भवत:' इत्यपि शास्त्रे उक्तं स्यात् । न चोक्तम् । तथा च ज्ञायते यदुत अचरमावर्तेऽपि विषगरे सम्भवत एवेति ।

'चतुर्थ चरमावर्ते तस्माद् धर्मानुरागत: । अनुष्ठानं विनिर्दिष्टम्' इति 'सदनुष्ठानरागेण तद्धेतुर्मार्गगामिनाम् । एतच्च चरमावर्तेऽनाभोगादेर्विना भवेत्' इति च शास्त्रपाठात् यथा चतुर्थं चरमावर्ते एव दर्शितम्, न तथा 'चरमावर्ते एव विषादिकं' इति प्रतिपादक: कोऽपि शास्त्रपाठो दृश्यते । इत्थं च निश्चीयते यदुत विषगरे अचरमावर्तेऽपि भवत:, तथा च तत्र 'किं सच्चित्तं ?' इति प्रश्नस्य समाधानं गवेषणीयमेवेति ।

प्रश्न: किमपि वस्तु त्रिप्रकारं भवति, हेतुत:, स्वरूपत:, फलतश्च । यथा घट:, तथाहि-घटस्य हेतु: मृद्, तस्मान्मृद् हेतुघट उच्यते । कम्बुग्रीवादिमत्त्वं घटस्य स्वरूपम्, तस्मात्कम्बुग्रीवादिमद्वस्तु स्वरूपघट उच्यते । जले शैत्यं घटस्य फलं, तस्मात्तत्फलघट उच्यते ।

एवं विषमपि हेतुस्वरुपफलै: त्रिविधं । तत्रेहलोकफलापेक्षा विषस्य हेतुरिति सा हेतुविषम्, तदन्विताऽनुष्ठानक्रिया विषस्य स्वरूपमिति तत्स्वरूपविषमुच्यते । तज्जन्य: सच्चित्तनाश: दुर्गत्यवाप्तिश्चेत्येवमादिकं विषस्य फलमिति तद् फलविषमुच्यते ।

अचरमावर्ते हेतुविषं स्वरूपविषं च भवत:, फलविषमपि दुर्गत्यवाप्त्यादिरूपं तु भवत्येव, परन्तु सच्चित्तस्यैवाभावात् तन्नाशात्मकं फलं नास्ति, तथाऽपि अचरमावर्ते प्रोक्तरीत्या हेतुस्वरूप- फलात्मकं विषं तु भवत्येवेति न काऽप्यनुपपत्तिरिति । एवमेव गरेऽपि वाच्यम् ।

तथा चाचरमावर्ते सच्चित्ताभावेऽपि विषगरे विद्येते इति वक्तुं शक्येतेति ।

उत्तर: भवतु नामैवं, तथाऽपि वदतु भवान्, चरमावर्ते यस्य जीवस्य विषं सच्चित्तं नाशयति, तस्य किं स्वरुपं नाम सच्चित्तमिति ।

प्रश्न: शोभनोऽध्यवसाय: सच्चित्तम् ।

उत्तर: न, तस्य यदि भौतिकफलापेक्षा विद्यते, तर्हि कथं तस्य सच्चित्तं वक्तुं युक्तम् ? न हि सा सच्चित्तसमकालभाविनी सम्भवतीति ।

प्रश्न: परिशुद्धान्त:करणपरिणाम: सच्चित्तम् इति हि योगबिन्दुवृत्तिपाठाद् ज्ञायते । भौतिकफलापेक्षासहितस्य यद्यपि परिशुद्धान्त:करणपरिणामो मोहनीयक्षयोपशमजन्यो न भवत्येव, किन्तु भौतिकफलं यावन्तं कालं तस्य न प्राप्यते, तावन्तं कालं स भौतिकफललीनो न भवति, तथा च

भौतिकफललीनताऽभाव एव सच्चित्तं तस्य । भौतिकफलप्राप्तौ तु तल्लीनत्वं भवत्येवेति भवति सच्चित्तविनाश इति ।

उत्तर: एतत्सर्वं अचरमावर्तेऽपि सम्भवत्येवेति तत्राऽपि विषगरे तज्जन्य सच्चित्तनाशश्चेत्येवमादिकं सर्वं सुस्थमेवेति ।

तथा चेयमत्र प्रक्रिया ।

यो जीव: मिथ्यात्वतीव्ररसोदयाद् भौतिकसुखेषु तीव्रगृद्धिमान् भवति, स तत्प्राप्त्यर्थं 'धर्मानुष्ठानं भौतिकसुखकारणं' इति ज्ञात्वा धर्मानुष्ठाने प्रवर्तते । तत्र च मनोवाक्काययोगानां शुभतावशात्पुण्यकर्म बध्यते, मिथ्यात्वतीव्ररसोदयात्पुनरपि तादृश एव मिथ्यात्वतीव्ररसो बध्यते । तच्च बद्धं पुण्यं भौतिकसुखेच्छानुसारेण इहलोके परलोके वा विपाकं प्रापयित्वा यदा भौतिकसुखं ददाति, तदैव तत्पुण्येन सहैव बद्ध: स एव मिथ्यात्वतीव्ररस उदयमायाति । स च भौतिकसुखे तीव्रगृद्धिमुत्पादयतीति स जीव: भौतिकसुखेऽत्यन्तं लीनो भवति । एतदेव भौतिकसुखलीनत्वं सच्चित्तनाश: । यस्माद् भौतिकसुखप्राप्तिर्यावन्तं कालं न सञ्जाता, तावन्तं कालं स कथं तत्र लीनो भवेत् ? भौतिकसुखस्यैवाभावात्, तत्प्राप्तौ एव च तस्य तल्लीनत्वं भवेत्, एतदेव च सच्चित्तविनाश इति ।

इदन्तु बोध्यम् ।

भौतिकफलापेक्षा लोभकषायजन्येति सा लोभोदयं यावत्सम्भवति, केवलं षष्ठगुणस्थानं यावत्सा स्पष्टस्वरूपा सम्भवति, सप्तमादिषु तु लोभकषायस्यात्यन्तं मन्दत्वात् न सा स्पष्टरुपेति । तथा च साधूनामपि सा सम्भवति, तर्हि सम्यग्दृष्टिप्रभृतीनां तु सुतरामेव । केवलं हेये उपादेयत्वबुद्धि: उपादेये हेयत्वबुद्धिस्तु मिथ्यात्वोदयजन्येति चतुर्थादिगुणस्थानेषु हेये भौतिकफले उपादेयत्व-बुद्धिर्न भवति । अर्थात् भौतिकफलं मिथ्यात्वक्षयोपशमप्रभावाद् हेयमेव मन्यते स जीव:, तथाऽपि लोभोदयप्रभावात् हेयत्वेनाभिमतस्याऽपि भौतिकफलस्यापेक्षां करोति स । प्रबुद्धव्यसनितुल्य: स खलु सम्यग्दृष्टिप्रभृतिजीव:, यथा हि प्रबुद्धव्यसनी प्रबोधप्रभावात् मदिरादिकं हेयमेव मन्यते, तथाऽपि व्यसनित्वादपेक्षावानपि भवत्येवेति । एवमेवात्राऽपि बोध्यम् ।

इत्थं च सम्यग्दृष्टिप्रभृतीनां सा फलापेक्षा मिथ्यात्वसहकाराभावान्मन्देति सा 'बाध्या' इत्युच्यते । गुरुपदेशादिनिमित्तवशाद् या निवारयितुं शक्यते सा बाध्येति भाव: ।

प्रश्न: अवन्तिसुकुमालस्य नलिनीगुल्मविमानजन्मापेक्षा न गुरुपदेशान्निवृत्ता, तर्हि किं साऽबाध्या ? तर्हि किं तस्यानुष्ठानं गरम् ?

उत्तर: लोभकषायश्चतुष्प्रकार:, अनन्तानुबन्धी अप्रत्याख्यानीय: प्रत्याख्यानीय: सञ्ज्वलनश्चेति । तत्र सर्वेऽपि प्रकारा: पुनश्चतुर्विधा: । तथाहि –

अनन्तानुबन्धितया दृश्यमान:, वस्तुतोऽनन्तानुबन्धी च ।

अप्रत्याख्यानीयतया दृश्यमानः, वस्तुतोऽनन्तानुबन्धी च ।

प्रत्याख्यानीयतया दृश्यमानः, वस्तुतोऽनन्तानुबन्धी च ।

सञ्ज्वलनतया दृश्यमानः, वस्तुतोऽनन्तानुबन्धी च ।

एवमेवाप्रत्याख्यानीयस्य प्रत्याख्यानीयस्य सञ्ज्वलनस्य च चत्वारश्चत्वारो भेदा ज्ञातव्याः । तत्र यः लोभकषायः सम्यकत्विनि भवति, स अप्रत्याख्यानीयो भवति, किन्तु गुरुपदेशादिनाऽपि यदि स न निवर्त्यते, तदा स अनन्तानुबन्धितया दृश्यते, वस्तुतः स अनन्तानुबन्धी न भवति ।

तथा चावन्तिसुकुमालस्य यद्यपि फलापेक्षा अबाध्येव दृश्यते, गुरुपदेशादपि निवृत्त्य- भावात्, तथाऽपि सा बाध्यैव, मिथ्यात्वसहकाराभावेन हेये उपादेयत्वबुद्ध्यभावादिति ।

न केवलं अवन्तिसुकुमालः, किन्तु षष्ठगुणस्थानवर्ती साधुरपि इहपरलोकभौतिकसुखेच्छा- वान् तत्प्रयोज्यधर्मानुष्ठानवांश्च स्यात्, सञ्ज्वलनलोभकषायपारवश्यात् । किन्तु मिथ्यात्वसहकाराभावादेव न विषं गरं वेति सूक्ष्ममीक्षणीयम् ।

<u>प्रश्नः</u> न भवतु नाम सम्यग्दृष्ट्यादेर्विषादिकम्, किन्तु योऽपुनर्बन्धकः, स तु यत्किमपि अनुष्ठानं यदि भौतिकफलापेक्षया कुर्यात्, तर्हि तद् विषं गरमेव वा, मिथ्यात्वसहकारादिति । तथा च अपुनर्बन्धकस्य भौतिकफलापेक्षासहितं किमपि धर्मानुष्ठानं विषं गरमेव वेति ।

<u>उत्तरः</u> न, यद्यपि अपुनर्बन्धकस्यावश्यं मिथ्यात्वोदयो भवत्येव, तथाऽपि तस्य रसो द्विविधस्तीव्रो मन्दश्च । तत्र यदा मिथ्यात्वस्य तीव्रो रस उदयमागच्छति, तदाऽबाध्या फलापेक्षा भवति, तदा च तस्यानुष्ठानं विषं गरं वा । यदा तु मिथ्यात्वस्य मन्दो रस उदेति, तदा बाध्या फलापेक्षा भवति, तदा चापुनर्बन्धकस्य भौतिकफलापेक्षासमन्वितमपि अनुष्ठानं न विषं गरं वा फलापेक्षायाः बाध्यत्वात् ।

<u>प्रश्नः</u> फलापेक्षा बाध्याऽबाध्येति अत्र को भेदकः ?

<u>उत्तरः</u> यथा वेश्या पुरुषे न रज्यति, किन्तु तद्दत्तधने एव । तदर्थमेव सा पुरुषं सेवते, धनाभावे तु सा पुरुषं त्यजत्येव । किन्तु पत्नी स्वस्वामिदत्तधनादौ रागवती सत्यपि स्वामिन्यपि रज्यत्येव, अत एव धनादिप्राप्तौ तदभावे वा सा स्वामिनं सेवत एव, न तु तिरस्करोति ।

अबाध्यफलापेक्षावान् जीवो वेश्यासदृशः, बाध्यफलापेक्षावान् जीवः पत्नीसदृशः, पुरुषः पतिर्वा धर्मानुष्ठानसदृशः, धनादिकं तु भौतिकसुखसदृशम् ।

अबाध्यापेक्षावतो धर्मानुष्ठाने न लेशोऽपि रागः, केवलं धर्मानुष्ठानमात्रसाध्यभौतिकफलार्थमेव स धर्मानुष्ठानं सेवते, भौतिकफलाभावे तु स धर्मानुष्ठानं त्यजत्येव ।

बाध्यापेक्षावतो धर्मानुष्ठानेऽपि रागो भवति, तथा च यद्यपि स भौतिकफलार्थं धर्मानुष्ठानं सेवते, तथाऽपि तदभावेऽपि स धर्मानुष्ठानं न मुञ्चति ।

स्थूलदृष्ट्या प्रकृतवेश्यापत्नीदृष्टान्तादेष विभागो ज्ञायत इति ।

इत्थं चापुनर्बन्धकस्य बाध्यफलापेक्षायां तद्धेतुः, अबाध्यायां तु विषं गरं वेति स्थितम् । सकृद्बन्धकादीनां तु फलापेक्षाऽबाध्यैवेति तेषां तद्युक्तमनुष्ठानं विषं गरमेव वेति ।

अत्र मिथ्यात्वमोहनीयस्य तीव्रो रसः पापानुबन्धः, मिथ्यात्वमोहनीयादिरुपा ८२ प्रकृतयः पापप्रकृतयः, सातप्रभृतयः ४२ प्रकृतयः पुण्यप्रकृतयः । अबाध्यफलापेक्षान्वितं धर्मानुष्ठानं पापानुबन्धयुतं पुण्यं बन्धयति, तदुदयश्च पापानुबन्धयुतं पापं बन्धयतीति ।

<u>प्रश्नः</u> यदा फलापेक्षाऽबाध्या भवति, तदाऽपुनर्बन्धकत्वं किं विद्यते ? किं वाऽपगच्छतीति ?

<u>उत्तरः</u> इहापुनर्बन्धकत्वं द्विविधम् । मिथ्यात्वमोहनीयस्य या उत्कृष्टा स्थितिः, तस्याः पुनर्बन्धस्य योऽभावः, तदेकमपुनर्बन्धकत्वम् । तीव्रभावेन पापाकरणं घोरसंसारबहुमानाभावः सर्वत्रौचित्यसेवनाभावश्च इत्येतद्गुणत्रयं द्वितीयमपुनर्बन्धकत्वम् । तत्राबाध्यफलापेक्षायां सत्यामपि उत्कृष्टां स्थितिं तु नैव बघ्नातीति प्रथमं अपुनर्बन्धकत्वं तु विद्यते एव, परन्तु अबाध्यफलापेक्षा घोरसंसारबहुमानरूपेति कृत्वा तस्यां सत्यां घोरसंसारबहुमानाभावरूपमपुनर्बन्धकत्वं तत्रापगच्छतीति अपेक्षातोऽपुनर्बन्धकत्वस्यापगमोऽनपगमश्च बोद्धव्यः ।

<u>प्रश्नः</u> बाध्याया अबाध्यायाश्च फलापेक्षाया निरूपणं योगबिन्दौ न दृश्यते, न वाऽध्यात्मसारे, ततश्च तत्कुत्रास्ति ?

<u>उत्तरः</u> द्वात्रिंशद्द्वात्रिंशिकायां 'अपि बाध्या फलापेक्षा' इत्यादिना महोपाध्यायैस्तन्निरूपणं कृतमिति । विस्तरार्थिना तु स ग्रन्थोऽवलोकनीयः ।

अत्र शीघ्रं विलम्बेन वा सच्चित्तनाशकत्वं न अल्पाधिककालापेक्षया, किन्तु इहपरलोकापेक्षयैवेति विवेचनीयम् । तथाहि - विंशतिवर्षायुष्केन परलोकसुखाय कृतं पूजादि तस्य पञ्चविंशतिवर्षायुष्कस्य मरणे सति देवलोकसम्पादनेन तत्रासक्त्यादिद्वारा सच्चित्तं विनाशयेत् । इत्थं च पूजादिना पञ्चवर्षानन्तरं सच्चित्तनाशः कृतः । इदं च परलोके सच्चित्तनाशकत्वाद् गरम् ।

अथ च कश्चित् विंशतिवर्षायुष्कः राजपदप्राप्तीच्छया जिनपूजादिकं कुर्यात्, तेन च तस्य षष्ठिवर्षायुष्कत्वे सति राजपदप्राप्तिः स्यात् । तर्हि जिनपूजादिकं चत्वारिंशद्वर्षानन्तरं राजपदे तीव्रासक्त्यादिना तस्य सच्चित्तं विनाशयति । इदं चेहलोके सच्चित्तनाशकत्वाद्विषमिति । अत्र च कालापेक्षया यदि चिन्त्यते, तर्हि गरेण पञ्चवर्षानन्तरं विषेण च चत्वारिंशद्वर्षानन्तरं सच्चित्तनाशः कृतः, ततः गरेणैव शीघ्रं सच्चित्तनाशः कृतः इति वक्तव्यं स्यात् । तथा च 'विषं शीघ्रं सच्चित्तनाशकं' इति वचनं मिथ्या स्यात्, तदपेक्षया गरेणैव शीघ्रं सच्चित्तनाशकरणात् ।

तस्मात् शीघ्रत्वं न अल्पाधिककालापेक्षमिति स्पष्टमेव ।

परन्त्वत्र गरेण परलोके एव सच्चित्तनाशः कृतः, विषेण चेहलोके एव सच्चित्तनाशः कृतः । 'य इहलोके

सच्चित्तनाशकं, तत् शीघ्रं विनाशकम्....' इत्यादिरुढ्या त्वत्र न कश्चिदपि दोषः ।

अतिगहनमिदं तत्त्वं सूक्ष्मदृष्ट्या विभावनीयम् ।

प्रश्नः अपुनर्बन्धकत्वस्य द्विविधत्वं पूर्वं कदाऽपि न श्रुतमस्माभिरिति ।

उत्तरः यद्यपि न श्रुतं भवता, तथाऽपि न तावन्मात्रेण तदभावो वक्तुं शक्यते । किञ्च यथा प्रमादावस्था द्विविधा, सप्तमगुणस्थानकात्षष्ठगुणस्थानाप्तिरूपा, शिथिलतारूपा च । तत्र प्रथमा तु निरतिचाराणामपि जिनकल्पिकादीनां सम्भवति, देशोनपूर्वक्रोडवर्षाणि यावत् तेषां सप्तमषष्ठगुणस्थानयोर्गमनागमनसम्भवात् । द्वितीया तु पार्श्वस्थादीनां । अवश्यं च प्रमादावस्था द्विविधा मन्तव्या, अन्यथा शिथिलानां षष्ठगुणस्थानवर्तिनिरतिचाराणां च भेदो न स्यादिति । एवमेव अपुनर्बन्धकत्वेऽपि बोध्यम् ।

इदन्तु बोध्यं । बाध्याऽपि फलापेक्षा गुरोः प्रज्ञापनाऽकुशलत्वात् अन्यस्माद् वा कारणान्न निवर्तते, तथाऽपि सा बाध्यैव, सदनुष्ठानरागादिशुभभावसत्त्वात् ।

एवं तावद् गुरूपदेशादिनाऽनिवर्तमानाऽपि फलापेक्षा बाध्या भवतीति उक्तम् । या च गुरूपदेशादिना निवर्तते, सा तु सुतरां बाध्यैवेति न कश्चित् तत्र संशय इति ।

प्रश्नः सम्यग्दृष्टिप्रभृतीनामननुष्ठानं भवति न वा ?

उत्तरः न भवति, सदनुष्ठानरागेण धर्मानुष्ठानकरणात् ।

प्रश्नः सत्यपि सदनुष्ठानरागेऽनुष्ठानगतप्रमादादिबाहुल्यात् अननुष्ठानं किं न स्यात् ?

उत्तरः सदनुष्ठानरागमात्रस्यापि धर्मानुष्ठाने तद्धेतुत्वप्रयोजकत्वात्, तत्र च प्रमादादिबाहुल्यस्यापि अकिञ्चित्करत्वात् । यदि हि मोक्षेच्छामात्रेण कृतं भृगुपातादि अत्यन्तं सावद्यानुष्ठानमपि शुभभावप्रभावात् उचितजन्मकारणं भवति, तर्हि सदनुष्ठानरागेण क्रियमाणं प्रमादबहुलमपि धर्मानुष्ठानं किमर्थं तद्धेतुः न स्यादिति चिन्त्यम् । तथा चाध्यात्मसारपाठः → सद्भावाशयलेशेनोचितं जन्म ← इत्यादि । तथा → अशुद्धाऽपि हि शुद्धायाः क्रिया हेतुः सदाशयात् ← इति ।

अत्र बहु वक्तव्यं, किन्तु विस्तरभिया नोच्यते ।

तथा च यत्र शुभभावलेशोऽपि मोहनीयक्षयोपशमजन्यो भवेत्, तद्धर्मानुष्ठानमवश्यं तद्धेतुरेवेति । एतत्तु स्पष्टीकर्त्तव्यम् यदुत प्रमादवृद्धौ सत्यां यदि शुभभावलेशोऽप्यपगच्छेत्, तर्हि भवति अननुष्ठानं । तस्मात्प्रमादपरिहारपरायणेनैव भवितव्यम् । केवलं प्रमादावस्थानमात्रेणानुष्ठानस्य अननुष्ठानत्वं न मन्तव्यम् । प्रमादश्च क्रियायामविध्याचरणरूपोऽर्थादिष्वनुपयोगरूपोऽन्यस्वरुपो वा सम्भवतीति बोध्यम् ।

प्रश्नः यथा सम्पूर्णविधिसहितमनुष्ठानममृतं, तथाऽविधिसमन्वितमनुष्ठानं अमृतं भवति न वा ?

उत्तरः अविधिर्द्विविधः, पुष्टालम्बनेन यतनया सेव्यमानः प्रमादादिना सेव्यमानश्च । तत्र यदि प्रथमाविधिसमन्वितमनुष्ठानं, तदा शुद्धापवादरूपं तत् शुद्धोत्सर्गवत् निरतिचारमोक्षमार्गरूपत्वादमृतमेव, यदि तु

द्वितीयाविधिसमन्वितमनुष्ठानं, तदा सातिचारापवादादिरूपं तत् तद्धेत्वादिरूपमेव। तत्रापि यदि अविधौ सत्यपि सदनुष्ठानरागादिरूपः शुभः परिणामो विद्यते चेत्, तर्हि तद्धेतुः, तदभावे तु फलापेक्षाद्यनुसारेण विषादि।

इत्थमतिगहनमिदं तत्त्वं पूर्वापरविमर्शेण यथाक्षयोपशममभिहितं मया, याश्चात्र क्षतयः, ताः शोधयन्तु संविग्नबहुश्रुतगीतार्था इति अलं विस्तरेण।

**नमोऽस्तु तस्मै जिनशासनाय**

યોગગ્રન્થના ભાવ ન જાણે, જાણે તો ન પ્રકાશે
ફોગટ મોટાઈ મન રાખે, તસ ગુણ દૂરે નાશે

૩૫૦ ગાથાનું સ્તવન, ઢાળ ૧૫, ગાથા ૨૧

---

પરમોપકારી મહોપાધ્યાય યશોવિજયજી મહારાજા!

આપશ્રીના સ્તવનની આ ગાથા ગોખી, અર્થ સમજ્યો, ત્યારે ચોંકી જ ગયો. 'જેઓ યોગગ્રન્થોના રહસ્યોને જાણે નહિ, જાણતા હોય તો લોકોમાં પ્રરૂપણા કરે નહિ અને મનમાં નકામો મોટાઈનો અહંકાર રાખે, એમના ગુણો ખતમ થાય.' આ અર્થ જાણ્યા બાદ મેં પણ યોગગ્રન્થોનો અભ્યાસ શરુ કર્યો, મારી શક્તિ પ્રમાણે આપની વૃત્તિ ઉપર વૃત્તિ લખી છે.

પણ

મારી પ્રજ્ઞા તો ઘણી વામણી છે. યોગગ્રન્થોના રહસ્યો એવો અગાધ દરિયો છે કે જેમાં મારી પ્રજ્ઞારૂપી નાનકડી હોડી શી રીતે સામે પાર પહોંચશે? એ મને ખબર નથી.

આપશ્રીને વિનંતિ છે મારી!

આપના હૈયામાં જે રહસ્યો રમતા હતા એ બધા મારા હૈયામાં સાક્ષાત્ થઈ જાય, એટલા આશીર્વાદ આપજો.

લિ.
આપશ્રીના અનંત ઉપકારના ઋણને
ચૂકવી શકવા સદા માટે અસમર્થ
મુનિ ગુણહંસવિજય